3

KAUMUDI-SUDHÁKARA

A

PRAKARANA.

BY

MAHÁMAHOPÁDHYÁYA CHANDRAKÁNTA TÁRKÁLANKÁRA,
PROFESSOR, SANSCRIT COLLEGE, CALCUTTA.

Published at the expense of

HARACHANDRA CHAUDHURI,
Zemindar, Sherepur, Mymensing.

CALCUTTA:

PRINTED BY G. H. ROUSE, BAPTIST MISSION PRESS.

1888.

Digitized by Google

Digitized by Google

कौमुदीसुधाकरं

नाम

प्रकरणम्।

राजकीयसंस्कृतविद्यालयाध्यापक-

महामहोपाध्याय-

श्रीचन्द्रकान्ततर्कालङ्कारविरचितम्।

सेरपुरनगरवास्तव्येन

श्रीहरचन्द्रचतुर्धुरीणेन

स्वपुत्रविवाहोत्सवे प्रकाशितम्।

कलिकातानगरीयां

वाणिज्यमिश्रयन्त्रे

मुद्रितम्।

शाकाः १८९०।

Digitized by Google

Digitized by Google

विज्ञापनम्।

मातुरङ्कोत्सङ्गस्य स्तनन्धयस्य करेण चन्द्रमसो ग्रहणेच्छावदन्तर्य्यामिप्रेरणया ममापि तनुवाग्मिभवस्य हृदये ग्रन्थनिर्म्माणाय मतिरुदयासीत्। "न कामवृत्तिर्व्वचनीयमीक्षते"—इति न्यायेन उत्कटेच्छावेगं वियमयितुरपारयता भगवत्प्रेरितेनैव मया कतिचिद्ग्रन्था निर्मिताः सन्ति। तेषु तावत् गोभिलगृह्यसूत्रभाष्यं पट्टाभिषङ्कहृदयं श्राद्धकल्पभाष्यञ्चेति ग्रन्थत्रयमस्मादृक्षसमाजैर्मुद्रितमभूत्। प्रबोधशतकं सतीपरिणयश्चेति ग्रन्थद्वयं धर्म्मैकतानहृदयेन संस्कृतविद्यावता सेरपुरनगरस्थान्यतमभूस्वामिना श्रीमद्गोविन्दकुमारचतुर्धुरीणमहाशयेन प्रचारितम्। वैशेषिकभाष्यन्तु सेरपुरनगरवास्तव्यस्य श्रीयुतराधावल्लभचतुर्धुरीणमहाशयस्य प्रयत्नेन संस्कृतविद्यानिष्णातस्य कस्यचिद्बन्धुवर्य्यस्य व्ययेन च मुद्रितमस्ति। स किल बन्धुवर्य्यो महाशयः नेच्छति स्वनामख्यापनमिति नाम तदुल्लेखः कृतः। तत्त्वावलिरानन्दतरङ्गिणी चेति ग्रन्थद्वयं मयैव कथञ्चिदायासेन मुद्रितम्। अवशिष्टानां ग्रन्थानां मुद्राव्ययोपयोगिनोऽर्थस्याभावात् तन्मुद्रणादौ निवृत्ताभिलाषएवासम्। तदेवं हतोत्साहोऽहं ग्रन्थान्तरनिर्म्माणे प्रारब्धग्रन्थानामसम्पूर्णानां सम्पूरणे च कमपि यत्नं नाकरवम्। एवं गते सेरपुरनगरवास्तव्येनान्यतमभूस्वामिना विद्योत्साहिना संस्कृतानुरागिणा वदान्येन श्रीमता हरचन्द्रचतुर्धुरीणमहाशयेन मदीयानां सर्व्वेषामेव ग्रन्थानां प्रचारव्ययादिप्रदानाय प्रतिश्रुतवता महान्-

283908

Digitized by Google

Harrassowitz. 67

मुत्साहं प्रापितोऽस्मि । आशास्महे भगवतः प्रसादादसम्पूर्णानां प्रारब्धग्रन्थानां सम्पूर्त्तिरिदानीं सम्पद्यते इति ।

तच्च तावत् कौमुदीसुधाकरं नाम प्रकरणमिदं स्वसुतयोः श्रीमतोराधुप्तनोर्हेमचन्द्र-चारुचन्द्रयोर्व्विवाहोत्सवे तेनैव प्रचारितम् । प्रार्थये त्वच किमपि दृष्टिपातं सहृदयानाम् । परमच यद्यदसङ्गतं लक्ष्यते, तत्तत् कृपया शोधनीयं विद्वद्भिः । विक्रमोर्व्वशीयस्य पुरूरवसउन्मादवर्णनस्यातिरमणीयतया तद्वीत्यैवाच सुधाकरस्योन्माद-उपवर्णितः,—इति शिवम् ।

ययोर्व्विवाहोत्सवएतदाषीत्
प्रचारितं तौ सहितौ वधूभ्याम् ।
स्यातामविघ्नं चिरजीवनाढ्यौ
कुर्य्यात्तयोर्मङ्गलमीश्वरोऽपि ॥

अन्येऽपि धनिनस्तावत् सुतोद्वाहादिमङ्गले ।
आचरन्तु महात्मानएतादृग्गमहोत्सवम् ॥

कलिकातामहानगर्य्यां
राजकीयसंस्कृतविद्यालयात् ।
आषाढ़े मासि । ग्राकाः १८१० ।

सेरपुरनगरवास्तव्यस्य
श्रीचन्द्रकान्तशर्म्मणः ।

Digitized by Google

शुद्धिपत्रम्।

पृष्ठे		पंक्तौ		अशुद्धम्।	शुद्धम्।
९	...	११	...	खद्दार	खद्दार
११	...	१	...	पल्व	पल्व (एवं परत्र)
११	...	१	...	राङ्किक	राङ्किक (एवं परत्र)
१२	...	१	...	हटः	हटाः
१९	...	९	...	मुपेहि	मुपेहि
२०	...	१९	...	निष्टत्त	निवर्त्त
२१	...	१५	...	सस्यद्द	सस्यृद्द
२२	...	११	...	समावस्था	समावस्था
२५	...	१२	...	खान	सान
२९	...	१८	...	ऽक्षेष	ऽक्षेषु
४१	...	१८	...	सुन्दर्य्य	सुन्दर्य्यै
४१	...	७	...	कामयमाना	कामयाना
४९	...	१२	...	कम्पि	किम्पि
४९	...	१७	...	अलीशङ्किते	अलीकशङ्किते
४७	...	१२	...	कमपि	किमपि
५१	...	१०	...	कधिक	मधिक
५२	...	३	...	ज्जर	ज्वर
५२	...	७	...	ज्जलति	ज्वलति
५१	...	१५	...	किमनोपचारपरि-श्रमेण क्लिश्यावै	किमनेनोपचारपरि-श्रमेण क्लिश्यते
५५	...	१०	...	ग्टङ्गातु	ग्टङ्गाङ्गु
५७	...	१७	...	धर्म्मैकतानन्तरः	धर्म्मैकतानान्तरः
६४	...	१५	...	ततः प्रविशति सुधाकरः	* * * *
६५	...	८	...	सञ्चरन्	विचरन्
७१	...	८	...	धम्म	धर्म्म
७७	...	१	...	अमुन-	अमुन-
७९	...	१	...	ग्रस्य	ग्रर्घ्य

Digitized by Google

पृष्ठे	पंक्तौ	अशुद्धम् ।	शुद्धम् ।
७९ ...	१४ ...	रचना	वचना
८० ...	१५ ...	क्रमाना	क्रमाणा
८१ ...	१५ ...	अस्मद्विधैर्ये-	अस्मद्विधानां य-
८१ ...	१ ...	आकण्ण	आकर्ण्ण (एवं परत्र)
८४ ...	१२ ...	धिणोति	धिनोति
९० ...	२ ...	मवै	मवे
९४ ...	१८ ...	राधिणं	राधिनं
१०८ ...	९ ...	क्षमापनीयः	क्षमयितव्यः
११५ ...	९ ...	क्षदानीं	क्षेदानीं
११५ ...	२१ ...	अथते	अूयते
११७ ...	१३ ...	खतामि	खतामिव
११८ ...	२० ...	अखदः	अखदैः
१२२ ...	१५ ...	सामाजिके	सामाजिकौ
१२५ ...	१३ ...	खायते नतु	खायत्येव न
१२९ ...	१९ ...	अव्याहतं मन्त्रमेतत्	अव्याहतो मन्त्र एषः
१४५ ...	५ ...	भगवतो	भगवतः
१४५ ...	७ ...	प्रात्याख्यातः	प्रत्याख्यातः
१४५ ...	१९ ...	काका	कापा
१४९ ...	४ ...	भगवन	भगवन्
१४९ ...	१० ...	नुर्त्तनेन	नुवर्त्तनेन
१४७ ...	२ ...	कापुषै	कापुरुषै
१४८ ...	१२ ...	संक्षिष्ट	संक्षिष्ट
१४९ ...	१० ...	सुका	सुधा
१५० ...	१० ...	भगुना	भगुणा
१५१ ...	१९ ...	दप	दर्प
१५२ ...	२ ...	नन्दस्व	नन्द
१५२ ...	१४ ...	मटकीमः	मटकीमः
१५९ ...	१३ ...	विलाष	विलास
१५९ ...	१९ ...	स्पृहणीयं	स्पृहणीय (एवं परत्र)

Digitized by Google

पृष्ठे		पंक्तौ		अशुद्धम्।	शुद्धम्।
१५७	...	११	...	नयिष्ये	नेष्ये
१५८	...	७	...	प्रेन्ने	प्रन्ने (एवं परत्र)
१५८	...	९	...	संप्रोक्षत्	संयास्यत्
१५८	...	१९	...	वल्वौ	वल्लौ
१५८	...	१९	...	पल्व	पल्ल (एवं परत्र)
१५९	...	२०	...	सरिस्मयम्	सविस्मयम्
१६५	...	९	...	प्राप्तर्यं	प्राप्तेयं
१६५	...	११	...	द्रूक्षतेर्दुनि	द्रूक्षतेर्दुनि
१६५	...	१२	...	सकलै	शकलै
१६६	...	९	...	वशा	वसा
१६६	...	१८	...	प्रणष्टा	प्रनष्टा (एवं परत्र)
१६८	...	१९	...	दहिता	दधिता
१६९	...	२	...	तस्मात्	तस्मात्
१७१	...	१२	...	वध्या	वद्ध्या
१७१	...	१९	...	लोचनी	लोचना (एवं परत्र)
१७२	...	३	...	अभ्यर्थयाम्येनम्	अभ्यर्थये नावदेनम्
१७८	...	९	...	विस्फुज्जथु	विस्फूर्ज्जथु
१७८	...	१२	...	स्फुटति किमति	स्फुठति किमिति
१८९	...	२२	...	अव	अव
१९०	...	१५	...	प्रार्थयामि	प्रार्थये
१९३	...	१	...	पश्चात्	नानाऽऽ—
१९८	...	१४	...	विपर्य्ययाना	विपर्य्ययाणा
२०२	...	५	...	दीर्घापाङ्गि	दीर्घापाङ्ग
२०२	...	२१	...	दीर्घापाङ्गी	दीर्घापाङ्गा
२११	...	१८	...	कर्म्मणो	कर्म्मणे
२१३	...	२१	...	अथना	अूथना

बवयोः पर्य्यावर्त्तनन्तु स्वयमेव कार्य्यम्।

Digitized by Google

Digitized by Google

कौमुदीसुधाकरं

नाम

प्रकरणम् ।

प्रथमोऽङ्कः ।

प्रत्यक्षाद्यैः प्रमितिकरणैर्लौकिकैरप्रमेयो-
वेदान्तानां निगमशिरसां वर्त्तते यः शिरःसु ।
सोऽयं शम्भुः परमपुरुषः केवलं भक्तिलभ्यो-
दिश्यात् कामं प्रलयरसिको मङ्गलं मङ्गलात्मा ॥

अपि च ।

गङ्गां दृष्ट्वा शिरसि मधुरध्वानतुङ्गोर्मिहस्तां
जातामर्षां सपदि विमुखीं हन्त शैलेन्द्रपुत्रीम् ।
किञ्चिद्वक्तुं न खलु कुशलः सम्भ्रमादिन्दुमौलि-
श्चिन्तास्लानोभवतु भवतां भूयसे मङ्गलाय ॥

(नान्द्यन्ते)

सूत्रधारः । अलमतिप्रसङ्गेन । (पुरतोऽवलोक्य) अये ! महतीयं परिषत् । तदस्यां युक्तमस्माकं शिक्षा-

Digitized by Google

नैपुण्यं प्रदर्शयितुम् । श्रुतञ्चास्माभिः प्रियसुहृदो-विश्वावसोः सकाशात्, यदेषा परिषत् कस्यापि प्रयोगस्य दर्शनाय साभिलाषा वर्त्तते इति । तत्पाचवर्गमाकृष्य यथासमीहितं करोमि । (नेपथ्याभिमुखमवलोक्य) कः कोऽत्र भोः !

पारिपार्श्विकः (प्रविश्य) भाव, अयमस्मि । को नियोगः ?

सूच । मारिष ! नन्वेते महाभागा आर्य्यमिश्रा विदग्धा भगवन्तोभूमिदेवाश्च भूस्वामिनो हरचन्द्रस्य सुतयोर्हेमचन्द्रचारुचन्द्रयोर्व्विवाहसंसदमलङ्कुर्वन्ति । दृश्यतां तावत् ।

इतोगीतमितोवाद्यमितोनृत्यमितः स्तुतिः ।
इतश्च ब्रह्मघोषोऽयं, शं दिशन्ति कुमारयोः ॥

अस्ति खल्वस्यामस्माकं वचनावसरः । कुतः ?

पुरस्तादत्रस्तं परिचितकलानां कृतधिया-
मधीतं तत्प्रीतिं जनयति परामप्रतिहताम् ।
यशोऽध्येतुः साक्षाद्वहति महतामास्यरचितं
तथा ग्रन्थादार्द्र्यं रचयति महिम्नैव महताम् ॥

पारि । कतमं पुनः प्रबन्धमभिनेयं भावोमन्यते ?

Digitized by Google

सूच । मारिष, श्रूयताम् । अस्ति किल लौहित्यसलिलपरिपीडितोपकण्ठं चातुर्वर्ण्यनिवासभूतं कैकयेषु * सेरपुराभिधानं नगरम् । तत्र च, शाण्डिल्यान्वयधुरन्धरस्य धर्म्मैकतानस्य ब्रह्मविदो ब्राह्मणस्य सिद्धान्तवागीशपदलाञ्छनस्य राधाकान्तस्यात्मसम्भवः महामहोपाध्यायपदभाक् तर्कालङ्कारपदलाञ्छनः ब्रह्ममयीपुचः कौथुमः चन्द्रकान्तोनाम ब्राह्मणः प्रतिवसति । स च स्वनिर्म्मितं कौमुदीसुधाकरं नाम प्रकरणमस्मासु समर्पितवान् । तमिमं प्रबन्धमभिनेतुमिच्छामः ।

पारि । योऽसौ मुग्धबोधसूचादीनामौलुक्यदर्शनस्य च भाष्यकर्त्ता ? तत्त्वावलिप्रभृतीमाञ्च निर्म्माता ?

सूच । अथकिम् ।

पारि । भाव, प्रमाणप्रवीणस्य काव्यनिर्म्माणं पङ्गोर्नृत्यमिव परिषद्धासायैव भविष्यति ।

सूच । ननु, न केवलं प्रमाणप्रवीणोऽयं, यावत् कविरप्यसौ । अनेन किल सतीपरिणयादीनि काव्यान्यपि निर्म्मितानि ।

---

* ब्रह्मपुत्रात् कामरूपाश्चभागे तु कैकयः ।

Digitized by Google

पारि। भाव, तथापि किमियमस्याभिनवस्य कवेः कृतिरस्याः प्रौढ़परिषदः परितोषाय भविष्यति ?

सूच। नन्वभिनवस्येति वदता भवतैव दत्तोनिर्णयः। तथाहि।

पद्मान्तरेष्वलघुनोमधुनोद्विरेफा-
यत् प्रार्थितस्य नितरां परिरम्भभाजः।
सायन्तनानि कुमुदान्यविकाशभाञ्जि
गच्छन्ति, तच्च नवतैव निदानमेका॥

पारि। भाव, तथापि नातिप्रौढ़ः स प्रबन्धः इति यत्सत्यं संशयितं मे हृदयम्।

सूच। (सवैलक्ष्यम्) किं मारिषः प्रबन्धमेनं निर्गुणमेव मन्यते ?

पारि। मा मैवम्। निर्गुणं निर्दोषमित्येतत् द्वयमपि जगति निरालम्बनमेव। परन्तु दोषभूयिष्ठं तदिति सम्भावयामः।

सूच। मारिष, अलीकं सम्भावयसि। न खल्वर्व्वाचीनाः कवयोदोषभूयिष्ठमेव कवयन्ति। अस्तु वा, तथापि परिषदः प्रेक्षणानुग्रहेणैवास्य गुणवत्ता भविष्यति। पश्य।

सम्पर्कं महतामवाप्य भजते क्षुद्रः परं गौरवं
भूकौ खातिपयः परञ्च न पुनर्मुक्ताफलं जायते।

Digitized by Google

मुद्धानां वनिताङ्गसङ्गतिवशादप्यारकूटं जना-
मन्यन्ते खलु काञ्चनं, गुणकरी श्लाघ्या यतां सङ्गतिः॥

पारि। एवमेतत्, किन्तु दोषभूयिष्ठमित्याशङ्कमानायाः परिषदः प्रेक्षणानुग्रहएव भविष्यति न वेति सन्दिह्यते।

सूत्र। मारिष, अनभिज्ञः खल्वसि सच्चरितानाम्।

गुणलेशानुरागेण दोषवन्तमपि स्फुटम्।
सत्यं सन्तोऽनुगृह्णन्ति केतकं भ्रमरादव॥

तस्य कवेः खल्वियं वाचोयुक्तिः।

कान्तानां मधुराधरप्रणयिता येषां मतास्तैरपि
प्रायः स्तोकरसं निपानविरहात् कौपं पयः पीयते।
कामं नागरिकाव्रजन्ति सततं ये राजमार्गाश्रया-
स्ते किं कार्य्यवशात् श्रयन्ति न पुनर्ग्राम्यां स्तुतिं सङ्कुलाम्॥

अपि च।

कामिनीस्तनपद्मेषु भूयोव्यापारितस्तु यः।
कठोरकरिकुम्भेषु स करः किं न दीयते॥

अस्तुवा, यथा मारिषः सम्भावयति; तथाप्यभिनयामः। कुतएतत्?

तिरस्कृतिरपि श्लाघ्या गुणज्ञानां न संशयः।
तिरस्कुर्व्वन्ति हि स्थाने सुतरान्ते कृतश्रमाः॥

Digitized by Google

अपि च।

पृथग्जनानां स्तुतिरप्यपार्था
यतेः न यावन्ति गुणान्गुणन्ते।
विलोकनीयस्य न जातु शिष्य-
स्याभ्यस्यवात् शिल्पिगुणप्रकर्षः॥

अन्यच्च।

गुणभूयिष्ठवत् दोषभूयिष्ठस्यापि प्रबन्धस्य प्रेक्षणे सवासनाः सामाजिकाएवाधिकारिणः। निर्व्वासनाः खल्वच स्तम्भकुड्यादिभ्योन विशिष्यन्ते।

पारि। किं ततः?

सूच। अधिकारपरिपालनेन आधिकारिका नोद्दिश्यन्ते। पश्य।

सहस्रपत्रं मधुरं प्रतिक्षं कुटजन्तथा।
विलिहन्त्यविशेषेण कामं मधुलिहोद्वयम्॥

एतत्ततः।

अपि च।

अप्रौढ़ाऽप्यप्रगल्भाऽपि सरसा कविनिर्म्मितिः।
बालेव हृदयालूनां भावैः स्पृशति मानसम्॥

(नेपथ्ये)

साधु भरतपुत्र, साधु। यथाह भवान्,—अप्रौढ़ापीत्यादि पठति।

Digitized by Google

हर्ष। (नेपथ्याभिमुखमवलोक्य) अये! प्रियसुहृदा सालङ्कायनेनानुगम्यमानः सुधाकरइतएवागच्छति। तदिदानीमयुक्तमिहावस्थानम्। तदेहि गच्छावः।

(इति निष्क्रान्तौ)॥

(प्रस्तावना)।

(ततः प्रविशति यथानिर्दिष्टः सुधाकरः)।

सुधा। वयस्य सालङ्कायन, कथं भवान् मन्यते,—

सम्यगाह भरतपुत्रः; अप्रौढापीत्यादि पुनः पठति।

साल। अथकिम्।

(सुधाकरोवैचित्त्यं नाटयति)।

साल। वयस्य, किं चिन्तयसि?

सुधा। (सावहित्थम्)। न किञ्चिदेवंविधम्।

साल। (सप्रश्रयोपम्)। कथं न किञ्चिदेवंविधम्!

अन्याहशएव दृश्यसे।

सम्प्रति हि।

अनवस्थितदृष्टिः वेपथुकलं विषादः
पुरतश्च न तावत् कश्चमलो क्रियासु।
वपुरपि रमणीयं कामसुभोज्यत्वं
कमपि नवमनल्पं सन्मुमभ्युन्नयन्ति॥

अथवा। निह्नुतु रहस्यम्।

Digitized by Google

सुधा । (स्वगतम्) अतिमात्रमुपालब्धोऽस्मि प्रियवयस्येन । (प्रकाशम्) वयस्य, मा मैवम् । त्वयि रहस्यं न मयि,—इति कोऽयं नयः ।

तथाहि ।

देहद्वयमुपाश्रित्य जीवितस्थितिरावयोः ।
समानुरागिणी भाति लतेवानोकहद्वयम् ॥

अपि च ।

सविधे स्वजनस्य चेतसो-
विवृतद्वारतयाऽनिवार्य्यया ।
न मनागपि कैतवं भवे-
द्भवति स्वात्मनि का विचारणा ॥

साल । कथय तर्हि भूतार्थम् ।

सुधा । कथं न कथयामि । कथाशेषावसरएव ग्रास्यसि ।

साल । तेन हि कथाशेषमेव श्रोतुमिच्छामि ।

सुधा । श्रूयताम् । ततः प्रचलितमहार्हास्तरण-क्षुद्र-घण्टिका-विन्दुजालक-नक्षत्रमालाऽलङ्कृत-कल्पित-कुञ्जरकुलः, कथं कथमप्याधोरणनिशाताङ्कुशसंयमित-विजृम्भितदुर्विहित-मत्तमातङ्गः, परार्द्ध्यपर्य्याणसनाथानवरतचर्व्यमाणखलीन-फेणपुञ्जारञ्जितसृक्क-

Digitized by Google

णीकोन्नमितवालहस्त-निरन्तरस्फीतघुरघुरायमा-
णरचितहूत्कारघोण-ह्रेषारवमुखराविष्कृतास्कन्दि-
तधौरितकरेचितवल्गितप्लुत-कुलीन-विनीत-तुर-
ङ्गमस्तोमः, पुष्परथसंवाह्यमानऋद्धिमल्लोकः, शनैः
शनैः सञ्चरत्कर्णीरथस्थकुलावलासकलः, ऊर्ध्वीक्ष-
तविचिचातपचनिकरः, स्वहस्तधृतदण्डच्छत्रनिवा-
र्य्यमाणप्रचण्डमार्त्तण्डकिरणगच्छन्मध्यवित्तनिवहः,
अनेकगजवाजिमनुजचरणपातसंजनितचटचटाश-
ब्दः, समुत्थितरेणुजालधूसरितदिग्विभागः, इतस्त-
तोविलोक्यमानव्याघ्रचर्म्मखट्वाङ्कचिभ्रूलप्रमुखोपकर-
ण-भस्मधूसरितकलेवरानेकरुद्राक्षमालावलम्बितर-
ङ्गपट्टिकानेपथ्यरुचिर-तपस्विपरिव्राजकः, उच्चाव-
चवेशविन्यासशोभाप्रेक्षणीयजनसमाजः, चतुरकथा-
रचनाचतुरधूर्त्तजनानुगम्यमानपीवरस्तनजघनम-
न्थरप्रचलद्धारविलासिनीजनः, श्रूयमाणकलकलः,
प्रवृत्तोभगवत्याः कात्यायन्या यात्रामहोत्सवः ।

साल । ततस्ततः ?

सुधा । ततोऽहमसन्निहितत्वाद्भवतोबहुतरं विलम्ब्य
समुपजातकुतूहलः शनैः शनैरेकएव गतः कात्या-
यन्यायतनम् ।

Digitized by Google

साल। कार्य्यान्तरव्याक्षेपादपराद्धोऽस्मि प्रियवयस्यस्य। हन्त भोः!

एतत्करोमि, कृतमेतदथो करिष्ये
लोकस्य नाम विफला परिकल्पनैषा।
स्वच्छन्दतो न खलु यन्त्रितसर्व्ववृत्तेः
स्पन्दोऽपि गूढ़भवितव्यतया नरस्य॥

सुधा। वयस्य, मा मैवम्।

पक्षपातो हि मनसः सुहृदां प्रीतये क्षमः।
निष्प्रत्यूहा फलप्राप्तिर्नायत्ता खलु बन्धुषु॥

अपि च। स्वजनप्रणयोऽपि रक्षणीयः। तदलमवाशङ्कया।

साल। (सहर्षम्) एवं ग्विदम्। ततस्ततः?

सुधा। ततोऽहं महता जनसंमर्देनाकुलीक्रियमाणः कथं कथमपि प्रविश्य कात्यायन्यायतनं प्रणम्य भगवतीं निर्गत्यायतनमध्यात् याचाप्रवृत्तलोकानां विचेष्टितान्यवलोकयितुमितस्ततस्तचैव कियन्तं कालमचरम्।

साल। प्रेक्षणीयं खल्वेतत्। ततस्ततः?

सुधा। ततोऽहं श्रमापनयनायैकस्मिन्नशोकतरुमूले किञ्चिदान्दोलितदीर्घिकासलिलाखोलकलहंसम-

Digitized by Google

एडलम् आहृतजलयन्त्रशीकरं सम्भृतपरागजाल-मन्थरम् आवर्जितनवपल्लवम् आपराह्णिकं समीरणमासेवमानः स्थितः ।

साल । रमणीयः खल्वयं निदाघसमये आपराह्णिकः पवनः ।

दृष्टं हि,

नवपरिमलवाही निर्मलः पाटलानां
रचयति परितोषं साधु गन्धेन्द्रियस्य ।
अमृतमिव निषिञ्चन् लक्षु साक्षाज्जनानाम्
अपनयति च दैन्यं स्वर्गनः स्वर्गरम्यः ॥

ततस्ततः ?

सुधा । ततस्तत्रैव इतस्ततो यदृच्छया दृशं व्यापारयतः कात्यायनीमन्दिराभ्यर्णस्य कुलावलाजनविश्रामनिलयस्य उपर्य्यलिन्दे निपतिता मे दृष्टिः ।

साल । ततस्ततः ?

सुधा । ततश्च सखे, दृष्टं यत् द्रष्टव्यम् ।

साल । (सोत्सुकम्) कथमिव ?

सुधा । एवं हि दृष्टम् ।

पादाग्राङ्गुलिना विलासविमुखी भूयो लिखन्ती भुवं
सख्यभ्यर्णमवर्णयन्निव घटितेवात्यन्तमस्पन्दिता ।

Digitized by Google

वाला काचिदराजपक्ष्ममधुरा लोलोत्तरे लोचने
विस्तार्य्यासमितापरव्यवसितं मामापिबन्ती स्थिता ॥

साल । (स्वगतम्) **हुं, तदिदं वैचित्त्यकारणं प्रियवयस्यस्य !** (प्रकाशम्) **ततस्ततः ?**

सुधा । किमन्यत् । अयद्वायस्कान्तमणिना, तड़िद्दिव तैजसधातुना, तस्याः प्रमुग्धकटाक्षविक्षेपेण सहसैव समाकृष्टं मे हृदयम् ।

तदानीम्,

निवर्त्तितान्यव्यवसायजातं
प्रियावलोको हृदयं मदीयम् ।
क्षणाद्गुरुर्मोहदवातिवेलं
वलादिव प्रोन्मथयाञ्चकार ॥

साल । **ततस्ततः ?**

सुधा । **ततोऽभूवं खल्वहम्;**

लिखितइव पटान्ते चित्रकर्म्मप्रवीणै—
र्घटितइव सुदक्षैर्यन्त्रवत् शिल्पिमुख्यैः ।
तड़ितइव विवर्त्तैः पृक्तमात्रः प्रियायाः
प्रणयमधुरचेष्टैर्लोचनैः स्यन्दशून्यः ॥

साल । (स्वगतम्) **कथमतिभूमिं गतश्चित्तजन्मा वयस्यस्य ।** (प्रकाशम्) **ततस्ततः ?**

Digitized by Google

सुधा। श्यामश्यामशरीरयष्टिरसकृत् दृष्ट्वाऽथ मामुत्सुकं
बाला मय्यनुरागलोलमधुरस्निग्धाः कटाक्षच्छटाः।
प्रक्षिप्य क्षणतत्परा मुकुलितैरङ्गैः कदम्बोपमा
व्यापारान् हृदयस्पृशोऽतिचतुरान् चक्रे मृगाक्षी पुनः॥

ततः प्रभृति,

लिखितेव प्रविष्टेव निखातेव दिवानिशम्।
अदृष्टाऽपि दुनोत्येषा हृदयं वेदनेव मे॥

सखे, सालङ्कायन, पश्य महिमानं मकरकेतनस्य। यदस्य निर्देशवर्त्तिनः परस्परविरुद्धा अपि पदार्थाः सप्रसवाइवैकमायतनमनुवर्त्तन्ते।

तथा हि,

अलक्ष्यपातः किल चित्तजन्मनो-
मृदुः प्रहारोऽपि दुनोति मानसम्।
जड़ीकरोत्युन्मथयत्यथो मिथः
प्रमोदयत्युन्मदयत्यनेकशः॥

साल। (स्मृत्वा) अहो प्रभावः कन्दर्पस्य!

विलासो वाग्देव्याः सुललितकलाकेलिनिलयो-
निधानं पुण्यानां नयनिधिरथो धैर्यमहिमा।
विनेता लोकानां स्थिरमनिरतीव स्थितिरतो-
विपर्य्यस्तावस्थां यदयमगमत् पुण्यविभवैः॥

Digitized by Google

भवतु, एवं तावत्। (प्रकाशम्) वयस्य, किमपि प्रष्टुकामोऽस्मि।

सुधा। विस्रब्धं पृच्छ्यताम्।

साल। इदमेव तावत् प्रथमं पृच्छ्यते; या किल विलोकनेनैव प्रियवयस्यस्य हृदयमधिष्ठिता, न सा साधारणाङ्गनाजनसदृशी भवितुमर्हति। न खलु यया कयाचित् सौदामन्या विदीर्य्यते श्लिष्टोच्चयः। तदस्त्येव कोऽप्यतिशयस्तस्याः। तत्कथय कीदृश्यसाविति।

सुधा। सखे, वञ्चितोऽसि वेधसा तदानीमसन्निहितः। न दृष्टवानसि द्रष्टव्यम्।

कुसुमादपि कमनीयं सन्तर्पणमप्यतराग्नितोऽप्यस्याः।
नवनवसुषमाभूमिर्वपुरेणदृशां निराकरणम्॥

सर्व्वथा वचसामतीत्य विषयं वर्त्तते लोकोत्तरः कोऽपि रमणीयताप्रकारस्तस्याः। सा खल्वपरिचितदोषः षष्ठइन्द्रियार्थो मर्त्यलोकस्य, कुसुमास्त्रादपि सुकुमारतरं अपूर्व्वं जैत्रमायुधं कुसुमधन्वनः, परा निर्म्माणचातुरी प्रजापतेः। किं बहुना,

मुखं राकाचन्द्रः स खलु न कलङ्काङ्कितनुर्-
दृशौ पद्मप्राये समदिननिशीथं विकसिते।

Digitized by Google

मृणालाभौ बाह्वं प्रकृतिसुभगस्निग्धमधुरौ
वपुः कान्तं तस्याः कुसुमसुकुमारं मृगदृशः ॥

नूनं तस्याएव निर्म्माणपाटवमभ्यस्यता वेधसा चन्द्र-कलादयो मानसस्पृशः सुकुमारतराः पदार्थाः पूर्व्वमुत्पादिताः। मानसी वा सृष्टिः पुनरपि प्रवृत्ता परमेष्ठिनः। कथं नु खलु करतलविघट्टनापरुषस्य तादृशं सौकुमार्य्यं वपुषः। अथवा। नैषा विषय-पराङ्मुखस्य ब्रह्मजड़स्य ब्रह्मणः सृष्टिः। किन्तु,

त्रिभुवनजयलक्ष्मीमिच्छताऽल्पैरुपायैः
सुललितवपुरेषा निर्म्मिता मन्मथेन ।
मधुरपि सुहृदोऽस्मिन् कर्म्मणि प्रार्थनीये
मुदितहृदय आसीद्द्वितीयः सहायः ॥

साल। वयस्य, नैतादृशा आकारविशेषाः स्वल्पगुणा-भविष्यन्ति। सर्व्वथा गुणनिधानं तच्चभवती। अथ, वयस्य-तच्चभवत्योस्तथाविधे अवस्थान्तरे किमपरं वृत्तम्?

सुधा। तस्मिन्नेव समये परिणतप्रायेादिवसः। अथ कुसुमामोदमन्थरे मन्दमन्दं वहति सन्ध्यासमीरणे, धूसरितदिग्विभागे, निर्व्वाणभूयिष्ठे पश्चिमाकाश-प्रान्तलम्बिनि प्रचण्डज्वलदङ्गारपिण्डइव परि-

Digitized by Google

लोहिते मार्त्तण्डमण्डले, बलाहकच्छेदमनोहरे आरक्तवारुणीविहायसि, ईषन्मेचकमेघलेशमलिनप्राये पूर्व्वाशामुखे, प्रारब्धनिवासगमनतया विरलजनसंमर्दे, तस्याः प्रियवयस्या शनैः शनैरुपरितनालिन्दात्तामवतार्य्य एकस्मिन् विरलजनसम्पाते प्रदेशे स्थित्वा संज्ञया मामाकारितवती।

साल। (सोत्सुकम्) ततस्ततः?

सुधा। ततोमिथोविदितात्मत्परिचया प्रापय्य तस्याः सकाशं सबहुमानं मामवोचत्। महाभाग, प्रणष्टोऽस्याः प्रियसख्या रक्षिवर्गः, समागतप्राया च सन्ध्या, तदहं तमन्विष्यामि, न च शक्नोम्येकाकिनीमेनामुपेक्ष्य गन्तुम्, महाभागस्तावन्मुहूर्त्तमस्याः पार्श्ववर्त्ती भूत्वा करोत्वनुग्रहमवलाजनेषु। परदुःखकातराः खलु दयालवो भवन्ति,—इति ब्रुवत्येव निष्क्रान्ता।

साल। (स्मितं कृत्वा) सुष्ठु खलु संविहितं तया। मृगयुहस्तगता मृगी न खलु दुःसाध्या भविष्यति। ततस्ततः?

सुधा। ततोऽहं महानयमनुग्रह इति पुलकितात्मा तस्या नातिदूरे स्थित्वा "भवति, विस्रब्धं स्थीयताम्,

Digitized by Google

अयन्ते रक्षिजनः पुरतएव वर्त्तते"—इत्यभिधाय स्थितः।

साल। (विहस्य) कथं नातिदूरे स्थित्वा, न पुनस्तामङ्कं नीत्वा?

सुधा। (सस्मितम्) अलं परिहासेन। कुलावला हि सा महानुभावा च न प्रसह्य ग्रहीतुं योग्या, विशेषतस्त्वत्सदृशैः।

साल। आं, ततस्ततः?

सुधा। ततस्तस्या रमणीयतां स्पष्टमवलोकयतः परमानन्दनिर्भरेण निर्वृतं मे हृदयं, सन्तर्पितानि चाङ्गानि। पुरा खलु तस्याः,

अलब्धसन्धि सौन्दर्य्यं यथावन्न विभावितम्।
सन्निधौ पुनरन्येव लक्षिता सा वराङ्गना॥

साल। अथ रहसि सन्निहिते वयस्ये कतमो व्यवसायस्तत्रभवत्या दृष्टः?

सुधा। न कश्चिदेवंविधः।

साल। शृणुमस्तावत्।

सुधा। शृणु,

मां मामप्यवलोकयद्भृशतरं नापश्यदन्यतः
स्वच्छन्दस्फुरिताधरा भ्रुग्नमभून्नैवाब्रवीत् किञ्चन।

Digitized by Google

ऐच्छद्गन्तुमितस्ततो न च ततः स्थानात् पदमागमत्
स्थाणान् केवलमुष्णदीर्घवपुषोऽत्याचीन्मृगाक्षी मुहुः ॥

साल । कथं न कश्चिदेवंविधः । महतः खल्वयमनुरागबन्धस्य प्रकारः ।

सुधा । मा मैवम् । मुग्धानां कुलाबलानामागन्तुकसन्निधौ खञ्जाप्रकारः खल्वयम् ।

साल । (विहस्य) न खलु दर्शनमात्रेणैव तच्चभवती भवतोऽङ्कं नारूढवती,—इत्यतो खञ्जाप्रकारोऽयम् ।

सुधा । (सस्मितम्) अपरिचितपूर्व्वेयं परिहासरसिकता प्रियवयस्यस्य ।

साल । मम, न पुनर्भवतः ? भवतु । ततस्ततः ?

सुधा । ततस्तस्मिन्नवसरे समागतप्रायो रक्षिवर्गः ।

साल । कथं गिरिकामनुसन्दधतः क्षतक्षणस्य मार्ज्जारस्य सारमेयका अन्तरायाः संवृत्ताः । ततस्ततः ?

सुधा । ततस्तदयस्यया ससंभ्रमपवाहितोऽस्मि तस्मात् प्रदेशात् । तदानीञ्च,

यामो वाले, वयमिति मया गन्तुकामेन पृष्टा
व्यायत्पक्ष्मेरुदलनिभे लोचने लुप्तलौल्ये ।
मुग्धा मां प्रत्यहह न चिरं कुर्व्वती तच्चकार
भ्रातर्वाचां न खलु विषयः केवलं चेतसो यत् ॥

Digitized by Google

तदयस्य, किं कथयामि। अधुनाऽपि तस्याः,

कान्तं रसोत्तरवशादीषदञ्चं विवर्त्तितग्रीवम्।
मुग्धविलोचनमास्यं सोत्सुकमथितं मनः कुरुते॥

अपिच,

लावण्यं तदलिंतवलितप्रेक्षितं पक्ष्मलाक्ष्याः
साक्षात् पद्मेरहपरिभवप्राप्तदीक्षो मुखेन्दुः।
काऽपि च्छाया प्रकृतिमधुरा सस्पृहप्रेक्षणीया
सारं सारं कुवलयदृशः कल्पते नान्यरामा॥

(इति विषादं नाटयति)।

साल। वयस्य, समाश्वसिहि।

अस्तमिव दृशो र्यां मन्यसे सारमूर्ख्या-
स्वमपि विधिनिदेशाद्रत्नसारोऽसि तस्याः।
तदिह मदनएव स्लाघनीयाभियोगो-
न खलु चिरमवश्यं मङ्गलं संविदध्यात्॥

ततस्ततः?

सुधा। ततः परापतिते तस्याः परिजने "भवति, अपक्रामति समयः साधयामस्तावत्, कथान्तरे स्मर्त्तव्योऽयं जनः"—इति ब्रुवन्नेवाहं निष्क्रान्तः।

साल। ततस्ततः?

सुधा। ततः साऽपि गच्छन्ती परावर्त्त्य परावर्त्त्य वदनं

Digitized by Google

सस्पृहमवलोक्य कर्णीरथमारूढा। सखे, कातरं खल्वधुनाऽपि,

तदलसवलितं प्रेम्णा मुग्धं स्निग्धं विलोचनद्वितयम्।
प्रचलनसमये तस्या मधुरकटाक्षं मनः स्मरति॥

(इति निःश्वसिति)।

साल। अथ तवभवती कस्य पुण्यवतः कुलभूषणं किन्नामधेया च इति ज्ञातं वयस्येन?

सुधा। ओं, ज्ञातं सखे, ज्ञातम्।

साल। कथमिव?

सुधा। तस्यां कर्णीरथमारूढायां गच्छति च परिकरे सैव वयस्या दन्तपत्रिकाव्यपदेशेन पुनरागत्यास्मत्-सकाशं रहसि सर्वमकथयत्।

साल। अथ कस्यापत्यरत्नं सा?

सुधा। सा खल्वस्यैव नगरस्यालङ्कारभूतस्य सुगृहीत-नाम्नः पुण्यकीर्त्तेरेकमात्मजमपत्यरत्नम्।

साल। (सप्रत्यभिज्ञम्)। या किल कौमुदीत्याख्यायते?

सुधा। अथकिम्। याऽपि तस्याः प्रियवयस्या, साऽपि तस्यैव स्वजनगन्धिनी सुन्दरी नाम।

साल। वयस्य, दिष्ट्या वर्द्धसे गुणोत्तरस्यामनुरागबन्ध-नेन। अथवा। कथमस्थाने मनसः प्रवणता

Digitized by Google

सम्भाव्यते भवद्विधस्य। वारुण्यामेव दिशि विश्राम-विनोदो हेममालिनः, पूर्व्वसन्ध्यायामेव निर्बन्धो-भानुमत्प्रकाशस्य। शतह्रदाऽपि विहाय वलाहकं क्व रमताम्, तरङ्गिणी वा सिन्धुमृते क्व विश्राम्यतु। सर्व्वथा समाश्वसिहि। महानुभावा खल्वेचभवती। न खलु तथाविधाया मनस्विन्या अन्यद्वाचि अन्य-च्चेतसि सम्भाव्यते। नूनमवितथएव भाववन्धस्तच-भवत्याः। यतः,

गुणावलीनां खलु सैकभूमि-
र्नैसर्गिकञ्चच दृढ़व्रतत्वम्।
नैतद्विपर्य्येष्यति, ह्याचिमो यो
गुणः समग्राति विपर्य्ययं सः॥

सुधा। (निःश्वस्य) वयस्य, एवमेतत्। तथापि वलवता संशयेन विहस्तितोऽस्मि मन्दभाग्यः। यत् सत्यं नाधिगच्छति स्थिरतां मे हृदयम्। कुतः?

सारल्यैकनिधानमेणनयना कारुण्यवारांनिधिः
सत्सङ्कल्पपरायणा प्रतिनिधिः सा धैर्य्यगाम्भीर्य्ययोः।
अस्मद्भाग्यविपर्य्ययोऽपि वलवानाशङ्कनीयः सखे,
तादृग्रत्नसमागमः कथमहो पुण्यैर्विना लभ्यते॥

साल। वयस्य, मा मैवम्।

Digitized by Google

जगति रुचिरतायाः सैव सत्यं विलास-
स्खलमपि गुणगणानां पात्रमेकः पृथिव्याम्।
अकलुषमणिहेर्म्नोर्योगशोभां दिदृक्षुः
क्षपयति खलु विघ्नं पूर्व्वमस्मिन् विधिर्वः॥

(नेपथ्ये)

सरणागदोम्हि। अज्जा, परित्ताअध परित्ता-
अध[१]।

सुधा। अभयं शरणागतस्य।

(पुनर्नेपथ्ये सएव शब्दः)

सुधा। (श्रुतिमभिनीय) कथं योषित्स्वरसंयोगः! (सत्रासभ्रमम्) वयस्य वयस्य, अनेन खड्गेन झटिति प्रतिपद्यस्व शरणार्थिनीम्। धायतां कृतमदृत्याहितं, प्रतिक्रियताञ्च।

साल। भवति, न भेतव्यं न भेतव्यं, दिष्ट्या महदनुवृत्तिस्त्वां रक्षति (इति खड्गमादाय निष्क्रान्तः)।

सुधा। (स्वगतम्)

अवलाजनेषु लोकाः प्रतिकूलं कथमिवाचरन्ति मिथः।
अथवा निष्करुणानां किं चित्रं परुषक्रियेषु॥

(नेपथ्ये कलकलः)

---

(१) शरणागताऽस्मि। आर्य्याः परित्रायध्वं परित्रायध्वम्।

Digitized by Google

(प्रविश्य सम्भ्रान्तो वञ्जुलकः) भट्टा, अच्छेरं अच्छेरं! को वि दस्सू तत्थभोदीं अक्कमिअ जाव ण किं पि अवाहिदं करइ, दाव अज्जसालंकाअणेण णिग्गिहीदो कहिं पि पपलाविअ गदो[१]।

सुधा। प्रियं नः। तेन हि शीघ्रं प्रवेशय तौ, दृष्ट्वा प्रियनिवेदनपारितोषिकम्। (इति कटकमर्पयति)।

वञ्जु। जं भट्टा आणवेदि[२]। (इति कटकमादाय निष्क्रान्तः)

सुधा। कलावति, इतस्तावत्।

कला। (प्रविश्य) भट्टा, दुअं मिह कोणिओओ[३]?

सुधा। स्त्रीजनोपवेशनयोग्यमासनमुपहर।

कला। उवहरामि। (इति निष्क्रम्य आसनमादाय प्रविश्य) इदं मासणं[४]। (इत्यासनं संस्थाप्य निष्क्रान्ता)।

(ततः प्रविशति साक्षाल्लायनमनुगता सुन्दरी)।

साल। आर्य्ये, अयं सुगृहीतनामा गुणराशिरिव

---

(१) भर्त्तः, आश्चर्यं आश्चर्यं! कोऽपि दस्युस्तत्रभवतीमाक्रम्य यावन्न किमप्यत्याहितं करोति, तावदार्य्यसाक्षाल्लायनेन निगृहीतः कुत्रापि प्रपलाय्य गतः।

(२) यद् भर्त्ता आज्ञापयति।

(३) भर्त्तः, इयमस्मि, को नियोगः?

(४) उपहरामि। इदमासनम्।

Digitized by Google

मूर्त्तिमान् प्रियवयस्यः सुधाकरः पुरतएव तिष्ठति, उपसर्पतु भवती। (इति परिक्रामतः)।

सुन्द। (स्वगतम्) अम्म! अज्जसुहाअरस्स एदं घरं, अहं पि महाभाओ तस्स ज्जेव पिअवअस्सो सालं काअणो! (विमृश्य) भोदु, पिअसहीए णिसिट्ठत्थदूई कच्चं काहं। (सस्मितम्) मह अ[१]। (इत्युपसर्पतः)।

सुन्द। अज्ज, वंदामि[२]। (इति प्रणमति)।

सुधा। (स्वगतम्)। कथं सुन्दरी! (प्रकाशं सादरम्)। एहि इदमासनमास्यताम्। वयस्य, त्वमप्युपविश।

(यथास्थानं उभावुपविशतः)।

सुधा। (अपवार्य्य जनान्तिकम्) वयस्य, सेयम्।

साल। नखलु तचभवती कौमुदीयम्?

सुधा। नहि नहि सुन्दरीयम्।

साल। (सहर्षमात्मगतम्) दिष्ट्या अनपराद्धोऽस्मि प्रियवयस्यस्य। (प्रकाशम्) यद्येवं अचभवत्याः सकाशात् तचभवत्याः प्रवृत्तिमुपलप्स्यामहे।

---

(१) अहो! आर्य्यसुधाकरस्यैतदभ्यर्हं अयमपि महाभागस्तस्यैव प्रियवयस्यः सालायनः। भवतु प्रियसख्या निर्दिष्टार्थदूतीकृत्यं करिष्यामि। मम च।

(२) आर्य्ये, वन्दे।

Digitized by Google

(सुन्दरी साशङ्कायनं तिर्यगीक्षते)।

सुधा। अपि नाम अपनीतः श्रमो भवत्याः ?

सुन्द। अज्जप्पसाआदो[१]।

सुधा। आर्य्ये, अकुटिलानां सख्यं सान्तपदीनमुच्यते कविभिः। तद्भवत्याएवानुग्रहो मां मुखरयति।

सुन्द। (सस्मितम्) अभूमी क्खु एरिसाणं महोवआराणं अअं जणो, अणप्पीआ क्खु एव्वं उवआरीअदु, ता आणवेदु अज्जो[२]।

साल। (स्वगतम्) अहो लोकाचारचतुरता।

सुधा। यदि न रहस्यं तदामूलतः श्रोतुमिच्छामि, किमिदमत्याहितं कश्चास्य प्रभवदिति।

सुन्द। सुणादु अज्जो। अत्थि णंदणुज्जाणस्स णादिदूरे चण्डिआअअणं[३]।

सुधा। यत् खलु मूर्त्तमिव कीर्त्तिकदम्बं तच्चभवतः पुण्यकीर्त्तेः।

सुन्द। तत्थ सङ्करा णाम परिव्वाइआ णिवसदु[४]।

---

(१) आर्य्यप्रसादात्।

(२) अभूमिः खलु ईदृशानां महोपचाराणामयं जनः, अनात्मीयाः खल्वेवमुपचर्य्यन्ते। तदाज्ञापयत्वार्य्यः।

(३) शृणोतु आर्य्यः। अस्ति नन्दनोद्यानस्य नातिदूरे चण्डिकायतनम्।

(४) तत्र शङ्करा नाम परिव्राजिका निवसति।

Digitized by Google

सुधा । अं ग्गायते, महाप्रभावा सा परिव्राजिका ।

सुन्द । अधइं । तीसे भअवदीए सआसं महेम्हि[१] ।

सुधा । किं पुनर्निमित्तं तत्रभवत्याः प्रदोषसमये भगवतीसकाशगमनस्य ?

सुन्द । समीहिदफलस्स सन्तुअस्साहरणं त्ति[२] ।

सुधा । कस्येदं ग्गान्युदकमाह्रियते ?

सुन्द । कुलावलाकुलरअणभूदाए सअलगुणेक्कणिलअरुवाए पिअसहीए कोमइए इमं सन्तुअअं आहीरइ[३] ।

सुधा । (सोद्वेगम्) किं तस्याः ?

सुन्द । सा क्खु कच्चाअणीजत्तामहूसवादो पडिणिउत्ता तद्दोज्जेव आरब्भिअ अदिव्व असत्थशरीरा जादा । तदो इमं सन्तुअअं आहीरइ । सव्विहइ क्खु से पुत्तिआए विअ भअवदी परिव्वाइआ[४] ।

---

(१) अथ किं । तस्या भगवत्याः सकाशं गताऽस्मि ।

(२) समीहितफलस्य ग्गान्युदकस्याहरणमिति ।

(३) कुलावलाकुलरत्नभूतायाः सकलगुणैकनिलयरूपायाः प्रियसख्याः कौमुद्या इदं ग्गान्युदकमाह्रियते ।

(४) सा खलु कात्यायनीयात्रामहोत्सवात् प्रतिनिवृत्ता ततएवारभ्य अतीवास्वस्थशरीरा जाता । तत इदं ग्गान्युदकं आह्रियते । विश्वसिति खलु तस्याः पुत्रिकायाइव भगवती परिव्राजिका ।

Digitized by Google

सुधा। (सविषादमात्मगतम्) कथमतीवास्वस्थशरीरेत्याह! अहह!

आघातन्तुच्छुटतु, हृदयं दीर्य्यतां, दुर्ज्जयोऽसौ
कन्दर्पोऽपि क्षिपतु युगपत् पञ्च बाणानमोघान्।
विच्छेदाग्निर्दहतु सुतरामप्रार्थि मिथ्या मनो मे
प्राणाः शीघ्रं विफलमनुषो वज्रसारा व्रजन्तु॥

(इत्युद्वेगं नाटयति)।

साल। आर्य्ये, प्रियवयस्यसम्पर्कात् द्विजातिसुलभचापल्याच्च किमपि प्रष्टुकामोऽस्मि।

सुन्द। (सहर्षमात्मगतम्) अम्मो महुरदा वाआणं, पुच्छ पुच्छ णिसिंचसु वअणामिएण कण्णा। (प्रकाशं) आणवेदु अज्जो[१]।

साल। अथ तत्रभवत्याः कतमः प्रकारोऽस्वस्थशरीरायाः?

सुन्द। (स्वगतम्) अम्मो चातुलिअं[२]। (इति कृतकवैमनस्यं नाटयति)।

सुधा। (निःश्वस्य स्वगतम्)।

गृणु हृदय, सुघोरं विप्रियाणां सहस्रं
प्रियसुहृदिह तावत् सोत्सुकत्वं प्रपन्नः।

---

(१) अहो मधुरता वाचां, पृच्छ पृच्छ निषिञ्च वचनामृतेन कर्णौ। आज्ञापयत्वार्य्यः।

(२) अहो चातुर्य्यम्।

Digitized by Google

अथवा,

कथमपि ननु दैवे वामतामभ्युपेते
विरचयति निकामं मित्रमप्यप्रियाणि ॥

सुन्द। (निःश्वस्य) महाभाअ, सुणीअदु। अउव्वो पिअसहीए असत्थदाप्पआरो। सा क्खु दक्खिणाणिलादो उव्विज्जइ, फुज्जहुदो विअ कोइलकण्ठरआदो वीहइ, अणलपेण्डं विअ चन्दमण्डलं मुणइ, मलअअरसलेत्तसरीरावि परितप्पइ, णिआहसेव्वलिणी विअ अणुदिणं जिज्झइ से सरीरलट्ठी, पाहादिअचन्दमण्डलवण्डिमाणं वहइ मुहलच्छी, दअइ विरहकादराए चक्काआअवहूए, ण सक्कइ घरकवोअमिहुणं अण्णोण्णभावरसहं[१]।

(इत्यर्द्धोक्ते जल्पां नाटयति)।

साल। (जनान्तिकम्)।

---

(१) महाभाग, श्रूयताम्। अपूर्वः प्रियसख्या असत्यताप्रकारः। सा खलु दक्षिणानिलादुद्विजते, स्फूर्जथोरिव कोकिलकण्ठरवादिभेति, अनलपिण्डमिव चन्द्रमण्डलं मन्यते, मलयजरसलिप्तशरीराऽपि परितप्यते, निदाघग्लैवलिनीवानुदिनं क्षीयते तस्याः शरीरयष्टिः, प्राभातिकचन्द्रमण्डलपाण्डिमानं वहति मुखलक्ष्मीः, दयते विरहकातरायै चक्रवाकवध्वै, न शक्नोति सहकपोतमिथुनं अन्योन्यभावरसार्द्रं॥

Digitized by Google

वयस्य, अन्यथा सम्भाव्य। ननु भवानेवात्र निदानम्।

सुधा। (सवितर्कमात्मगतम्) अपि नाम ममैव भागधेयानां स्फुरितमेतत् स्यात्।

(विचिन्त्य सहर्षम्) अथवा, कृतं सन्देहेन।

सैवेयमुत्पलदृशो नितरामवस्था
या कामिनां भवति रूढ़िगतेऽभिलाषे।
चेतो यदेव मनुषे कुलिशं तदेत-
दाप्यायनाद्भुतमतः स्थिरतामुपैहि॥

साल। कात्यायनीयायामहोत्सवे किमुद्वेगकारणं कृतं तत्रभवत्याः, येन ततएवास्वस्थशरीरा जाता?

सुन्द। (सस्मितमात्मगतम्) चदुर, अहिण्णो क्खु सि। (प्रकाशम्) महाभाअ, ण क्खु अम्हस्स उव्वेअकारणं अण्णो वेअ, ता इमस्मिं णत्थि से वाआविहवो। ता क्खमदु मं अज्जो[१]।

साल। (जनान्तिकं) वयस्य, कृतं संशयेन। दिष्ट्या वर्द्धामहे।

---

(१) चतुर, अभिज्ञः खल्वसि। महाभाग, न खल्वन्यस्योद्वेगकारणमन्यो-वेद। तदस्मिन् नास्ति मे वाग्विभवः। क्षमतां मामार्यः।

Digitized by Google

तच्चास्त्यविधानस्था शोचनीया न संशयः।
अमोघं दैवनिर्दिष्टं भवानपि महौषधम्॥

सुधा। (—सुन्दरीं प्रति) अथ किमत्याहितं वृत्तमार्य्यायाः?

सुन्द। सुणादु अज्जो। अत्थि मत्ताणवाडस्स सआसे चामोण्डामन्दिरकिदावासो कावालिओ खण्ड-मोण्डोणाम(१)।

सुधा। स खलु दुरात्मा खण्डमुण्डः!

सुन्द। सो किल योअसिद्धीए सव्वलक्खणोवेदां कामि कुमारिआं मग्गेदु(२)।

सुधा। ततस्ततः?

सुन्द। तदो एक्कआ कामदेव्वाअदणपडिणिउत्तमाणां पिअसहीमद्धमग्गे पेक्खिअ सव्वलक्खणोवेदा इअं मह कज्जसिद्धीए हुविस्सदि त्ति तां ओहत्तु-मुज्जओ(३)।

सुधा। अहो नैर्घृण्यम्! ततस्ततः?

---

(१) भट्टगोत्रार्य्यः। अस्ति प्रसाधनवाटस्य सकाशे चामुण्डामन्दिरकृता-वासः कापालिकः खण्डमुण्डो नाम।

(२) स किल योगसिद्धये सर्व्वलक्षणोपेतां कामपि कुमारिकां मृगयते।

(३) तत एकदा कामदेवायतनप्रतिनिवृत्तमानां प्रियसखीं अर्द्धमार्गे प्रेक्ष्य सर्व्वलक्षणोपेतेयं मम कार्य्यसिद्धये भविष्यति इति तामपहर्त्तुमुद्यतः।

Digitized by Google

सुन्द। तदो अहं सपरिअणा पावस्सन्तराओ सम्वुत्ता[1]।

सुधा। युज्यते, ततस्ततः?

सुन्द। तदोपहुदि परिकुविदो मज्झ कावालिओ[2]।

सुधा। ततस्ततः?

सुन्द। तदो अज्ज असहाआं मम्पेक्खिअ, पावे, णिवारिअकोमदूहरत्ते, खणु दूअं ण होसि, अअमहं खण्डमोण्डो तुमं ज्जेव भअवदीए वलिं उवहरामि,—त्ति आमोडिअ सिरोहरां मज्झेग्गहीअ[3]।

(इति वाष्पैः कण्ठरोधं नाटयति)।

साल। (स्वगतम्) आः पाप, प्रपलाय्य गतोसि, किमत्र क्रियताम्। नूनमनुभविष्यसि फलमविनयस्य।

सुधा। (सकरुणम्) विरमतु भवती। अलमात्मानं खेदयित्वा।

सुन्द। तदो दुमिला महाभाएण परित्तादोम्हि[4]।

(इति सस्पृहं सालायनमीक्षते)।

---

(१) ततोऽहं सपरिजना पापस्यान्तरायः संवृत्ता।

(२) ततः प्रभृति परिकुपितो मह्यं कापालिकः।

(३) ततोऽद्य असहायां मां प्रेक्ष्य, पापे, निवारितकौमुदीहरते, नन्वियं न भवसि, अयमहं खण्डमुण्डस्त्वामेव भगवत्यै चामुण्डायै वलिमुपहरामि,—इत्यामुच्य शिरोधरां मामग्रहीत्।

(४) ततोऽनेन महाभागेन परित्रातोऽस्मि।

Digitized by Google

साल । (सोत्सुकमात्मगतम्) **कथम्** !

सेयं वामविलोचनाकुलमणिर्लावण्यलीलास्थली
वैदग्ध्यस्य नवेव मूर्त्तिरपरा कौर्त्तिर्मनोजन्मनः ।
प्रत्यङ्गं लिखितेव नाम करुणा निष्कारणा वेधसा
मामेषा चतुरैः कटाक्षरचनैर्मथ्नाति कोऽयं विधिः ॥

वयस्य, यत् सत्यमद्यप्रभृति वयस्योऽस्मि संवृत्तो भवतः, इयमपि तस्याः । कुतः ?

त्वमस्याः प्रेयस्या मुखकमललुब्धोऽस्यतितराम्
अहञ्चास्याः साक्षात् सुचतुरकटाक्षस्य वशगः ।
वयस्येयं तस्या अहमपि वयस्योऽस्मि भवतः
समावस्थयोगात् कथमपि न वाच्यो विधिरिह ॥

(इति वैमनस्यं नाटयति) ।

सुन्द । (सोत्कण्ठम्) **अदि क्खु वाहदु पिअसहीए उवदावो । ता इच्छामि अज्जेण अब्भणुण्णादा गमिदुं**(१) ।

सुधा । **युज्यते** । (नेपथ्याभिमुखमवलोक्य) **वञ्जुलक, वञ्जु** । (प्रविश्य) **अअं म्हि**(२) ।

---

(१) अति खलु बाधते प्रियसखी उपतापः । तदिच्छामि आर्य्येणाभ्यनुज्ञाता गन्तुम् ।

(२) अयमस्मि ।

Digitized by Google

सुधा। आलोकमादाय अग्रगामी भूत्वा वसतिं प्रापयैनाम्। वयस्य, त्वमपि तत्रभवत्याः पश्चाद्वर्त्ती भव।

(वङ्गुलको निष्क्रान्तः)।

सुन्द। जं मए मन्दभाइणीए उव्वेइदो अज्जो, ता कखमीअदु अज्जेण[१]।

सुधा। मा मैवं, गृहमेतद्भवत्याः।

सुन्द। अणुग्गहीदोम्हि[२]।

(आलोकमादाय प्रविशति वङ्गुलकः)।

सुन्द। अज्ज, साहेमि। णमो दे[३]। इत्युत्तिष्ठति।

सुधा। गम्यतां पुनर्दर्शनाय, शिवस्ते पन्था अस्तु।

(सुधाकरवर्ज्यं सर्वे परिक्रम्य निष्क्रान्ताः)।

सुधा। (दिपदिकया बहिरवलोक्य) अतिप्रौढ़िमुपागतः खल्वन्धकारः। सम्प्रति हि,

लिप्तइवाञ्जनपुञ्जैर्निर्मितइव सकलमेचकद्रव्यैः।
तमसा पूरितमध्वो निरन्तरो लक्ष्यते लोकः॥

(पुनर्दिपदिकया ऊर्द्धमवलोक्य)।

अहो प्रौढ़ता रजन्याः रमणीयता च समयस्य।

---

(१) यन्मया मन्दभागिन्या उद्वेजित आर्य्यः, तत् क्षम्यतामार्य्येण।
(२) अनुगृहीताऽस्मि।
(३) आर्य्य, साधयामि। नमस्ते।

Digitized by Google

क्षुब्धाम्भोधिप्रकाशोल्लसदमलरुचिः काममाकाशदेशो-
सुक्ताहारप्रभासो व्यपगतकलुषास्तारकाः फेनकल्पाः।
नैदाघोमातरिश्वा खनति च मधुरं श्रोत्रगात्रानुकूलो-
विश्रामं संलभन्ते श्रमलवपुषः प्राणिनः प्राप्तनिद्राः॥
तद्दहमपि विश्राममेव प्रतिपत्स्ये॥ (इति निष्क्रान्तः)।

(निष्क्रान्ताः सर्व्वे)

इति कौमुदीसुधाकरे प्रथमोऽङ्कः॥

Digitized by Google

द्वितीयोऽङ्कः ।

(ततः प्रविशति द्यूतजतिका ।)

द्यूत । (परिक्रम्यावलोक्य च ।) ओसाणप्पाओ दिअहो । आ-
अवसुक्खो रुक्खअणिअहो हीरिअसारो विअ
लोओ ण सुहेइ दिट्ठीं । दीणदासुवगदो हीरिअवसु
सेआन्तो विअ दीसइ । अइणअगव्विदो दुट्ठासओ
सहसा रिद्धिं पत्तो णीओविअ णिअन्तदुःसज्झेहिं
पदावेहिं आउलेइअ लोअं परिक्खीणतेओ णि-
वादुम्मुहो पेक्खीअदि सुज्जो । विडविलंहिआणं
इत्थिआणं विअ परिमिलाणाइं लक्खीअन्ति दिसाणं
मुहाइं । (नेपथ्याभिमुखमवलोक्य) कधं णोमालिआ किं
पि मन्तेमाणा इदोज्जेव्व आअच्छदि । जाव पडि-
वालेमि णं[१] । (इति स्थिता) ॥

---

(१) अवसानप्रायोदिवसः । आतपशुष्को रुक्षकनिवहो हृतसारइव लोको न सुखयति दृष्टिं । दीनतामुपगतो हृतवसु श्रोत्रिय इव दृश्यते । अविनयगर्वितोदुष्टाशयः सहसा ऋद्धिं प्राप्तो नीचइव नितान्तदुःखैः प्रतापैराकुलयन्य लोकं परिक्षीयतेजा निपातोन्मुखः प्रेक्ष्यते सूर्यः । विटविलम्बितानां स्त्रीणामिव परिम्लानानि लक्ष्यन्ते दिशां मुखानि । कथं नवमालिका किमपि मन्त्रयमाणा इतएवागच्छति । यावत् प्रतिपालयाम्येनाम् ।

Digitized by Google

(ततः प्रविशति नवमालिका।)

चूत। हला णोमालिए, कहिं उण एव्वं सतुवरं पत्थिदासि जेण समीववट्टिणीं पि मं ण ओलोएसि[१]?

नव। (स्वगतम्) अम्म चूअलदिआ! (प्रकाशम्) हला चूअलदिए, भट्टिणीणिओअमणुचिट्ठन्तीए मइ तुवरए ण उवलक्खिदा सि, ता मरिसेहि दाव इमं अदिक्कमं[२]।

चूत। ण क्खु अदिक्कमं एत्थ पेक्खामि। इमं तु पुच्छामि, कहिं अविलंविदे कम्मे भट्टिणीए णिउत्ता सि जेण एव्वं तुवरइ[३]?

नव। भअवदीमाआरेदुं[४]।

चूत। कहिं णिमित्ते[५]?

---

(१) अयि नवमालिके, कुत्र पुनरेवं सत्वरं प्रस्थिताऽसि; येन समीपवर्त्तिनीमपि मां नावलोकयसि?

(२) अहो चूतलतिका! अयि चूतलतिके, भर्त्रीनियोगमनुतिष्ठन्त्यामया त्वरया नोपलक्षिताऽसि। तन्मर्षय तावदिममतिक्रमम्।

(३) न खल्वतिक्रममत्र पश्यामि। इदन्तु पृच्छामि। कस्मिन्नविलम्बिते कर्म्मणि भर्त्र्या नियुक्ताऽसि, येनैवं त्वर्यते?

(४) भगवतीमाकारयितुम्।

(५) कस्मिन् निमित्ते?

Digitized by Google

नव। असुत्थसरीरा भट्टिदारिआ त्ति। तुमं उण कहिं पत्थिदासि[१]?

चूत। पमदवणं[२]।

नव। किं त्ति[३]?

चूत। सुणाहि। असुत्थसरीरा भट्टिदारिआ अप्पाणं विणोदेउं पमदवणं गमिस्सदि[४]।

नव। जइ भट्टिदारिआए पमदवणं गमेअव्वं ता किं त्ति तुमं दाणिं तत्थ यासि[५]?

चूत। आणत्तं अज्जए सुन्दरीए, जधा, हञ्जे, चूअलदिए, पमदवणं णिज्जणं कदुअ तुमे अहं संहादव्वा, तदो पिअसहिसहिआ तत्थ गमिस्सं[६]।

---

(१) असुस्थशरीरा भर्तृदारिकेति। त्वं पुनः कुत्र प्रस्थितासि?

(२) प्रमदवनम्।

(३) किमिति?

(४) शृणु। असुस्थशरीरा भर्तृदारिका आत्मानं विनोदयितुं प्रमदवनं गमिष्यति।

(५) यदि भर्तृदारिकया प्रमदवनं गन्तव्यं, तत् किमिति त्वमिदानीं तत्र यासि?

(६) आज्ञप्ताऽस्मि आर्यया सुन्दर्या, यथा, अयि चूतलतिके, प्रमदवनं निर्जनं कृत्वा त्वयाऽहं सम्भावयितव्या। ततः प्रियसखीसहिता तत्र गमिष्यामि।

Digitized by Google

नव । हला चूअलदिए, आसन्नपरिअणो तुमं भट्टिदारिआए इमादो कालणादो किं पि पुच्छिदुआमा म्हि[१] ।

चूत । हला णोमालिए, पुच्छ विस्सद्धं यं सि पुच्छिदुआमा[२] ।

नव । एदं पुच्छामि, अवि णाम जाणिज्जइ तुम्मेहिं का पीड़ा भट्टिदारिआए त्ति[३] ।

चूत । कधं अम्मेहिं जानीअदु । णं वेज्जा अवि एत्थ मूढ़ा सम्वुत्ता[४] ।

नव । (सविस्मयम्) किं वेज्जेहिं पि ण णिच्चिदो विआरहेदू[५] ?

चूत । अधइं[६] ।

---

(१) अयि चूतलतिके, आसन्नपरिजनत्वं भर्तृदारिकायाः, अतः कारणात् किमपि प्रष्टुकामाऽस्मि ।

(२) अयि नवमालिके, पृच्छ विश्रब्धं यदसि प्रष्टुकामा ।

(३) एतत् पृच्छामि । अपि नाम ज्ञायते युष्माभिः का पीड़ा भर्तृदारिकायाः ? इति ।

(४) कथमस्माभिर्ज्ञायताम् । ननु वैद्या अप्येतस्मिन् मूढ़ाः संवृत्ताः ।

(५) किं वैद्यैरपि न निश्चितो विकारहेतुः ।

(६) अथकिम् ।

Digitized by Google

नव। जइ एव्वं कधं दाणिं चिइस्सिज्जइ[१]?

चूत। विरआ चिइस्सआ[२]।

नव। (सविषादम्) हद्धी हद्धी एत्तिअमत्ताविं पीड़ा ण णिच्चिदा, कधं एदे चिइस्सअत्तणं अप्पणो वोल्लन्तो ण लज्जन्ति[३]।

चूत। (निःश्वस्य) किं करीअदु। ण क्खु साहारणो अअं आअङ्को। सा क्खु कसणपक्ख ससिअला विअ अणुदिणं क्खिज्जइ अंगेसुं। मिलाअमाणकमलिणीं विअ णं मधुरा च्छाहा केवलं ण मुंचइ[४]।

नव। कदमो उण एत्थ उवाओ होहिइ[५]?

चूत। देव्वं जाणइ। सुंदरी उण भणइ अहं अस्सिं चिइस्सओ त्ति[६]।

---

(१) यद्येवं कथमिदानीं चिकित्स्यते?

(२) विरताश्चिकित्सकाः।

(३) हा धिक् हा धिक्। एतावन्मात्रोऽपि पीड़ा न निश्चिता, कथमेते चिकित्सकत्वमात्मनो वदन्तो न लज्जन्ते?

(४) किं क्रियताम्। न खलु साधारणोऽयमातङ्कः। सा खलु कृष्णपक्षशशिकलेवानुदिनं क्षीयतेऽङ्गेषु। म्लायत्कमलिनीमिवैनां मधुरा च्छाया केवलं न मुञ्चति।

(५) कतमः पुनरेतस्मिन्नुपायो भविष्यति।

(६) दैवं जानाति। सुन्दरी पुनर्भणति अहमत्र चिकित्सकेति।

Digitized by Google

नव। सव्वं तस्सिं संहवेदुव्वइ। चउरा क्खु सा[१]।

चूत। अविअहवअणा दाणिं होदु[२]।

नव। हला चूअलदिए, एव्वं पि भवे[३]? (कर्णे कथयति)।

चूत। सहि, किं अम्हाणं इमिणा विअक्खिदेण। ण क्खु अणुम्मिओ अअं अत्थो अम्हेहिं जीहग्गे कादुं सक्किज्जइ। किं तु जइ तुह तक्को संवोलइ, तइआ सोहणं होइ[४]।

नव। कधं विअ[५]।

चूत। णं उवारूढजोव्वणा दाणिं भट्टिदारिआ[६]।

नव। अदोज्जेव मह एसो तक्को[७]।

चूत। जुज्जइ। (प्रतीचीं दिशमवलोक्य) समागतप्पाआ सं

---

(१) सर्वं तस्यां सम्भाव्यते। चतुरा खलु सा।

(२) अवितथवचना इदानीं भवतु।

(३) अयि चूतजतिके, एवमपि भवेत्?

(४) सखि, किमस्माकमनेन वितर्कितेन। न खल्वनुद्विग्नोऽयमर्थोऽस्माभिर्जिज्ञाग्रे कर्त्तुं शक्यते। किन्तु यदि तव तर्कः संवदति, तदा शोभनं भवति।

(५) कथमिव?

(६) ननु उपारूढयौवनेदानीं भर्तृदारिका।

(७) अतएव ममैष तर्कः।

Digitized by Google

ज्जा, ता भट्टिणीणिओअं अणुचिट्ठ, अहं पि णवरि करणिज्जं करेमि[१] ।

नव । एसो गच्छामि । (इति परिक्रम्य पुनः परिक्रम्य) हला चूअलदिए, मा दाव णं तक्कं कस्सवि कहेहि[२] ।

चूत । वीसत्था होहि[३] ।

नव । णिव्वुदोम्हि[४] । (इति परिक्रम्य निष्क्रान्ता) ।

चूत । (परिक्रम्य) इमं पमदवणं ण को वि जणो इमस्सिं दीसइ, ता गदुअ अज्जाए सुंदरीए णिवेदेमि[५] । (इति परिक्रामति ।)

(नेपथ्ये)

इदो इदो पिअसही[६] ।

चूत । (कर्णं दत्त्वा) अम्म! एसा अज्जा सुंदरी भट्टि-

---

(१) युज्यते । समागतप्राया सन्ध्या, तद्भर्तृनियोगमनुतिष्ठ । अहमप्यनन्तरकरणीयं करोमि ।

(२) हला गच्छामि । अयि चूतवतिके, मा तावदेनं तक्कं कस्यापि कथय ।

(३) विश्वस्ता भव ।

(४) निर्वृताऽस्मि ।

(५) इदं प्रमदवनं न कोऽपि जनोऽत्र दृश्यते, तद्गत्वा आर्यायै सुन्दर्यै निवेदयामि ।

(६) इतइतः प्रियसखी ।

Digitized by Google

दारिआसहिआ इदोज्जेव आअच्छदि, ता अविलंबं संहावेमि णं[१]। (इति द्रुतपदं परिक्रम्य निष्क्रान्ता)।

(प्रवेशकः)।

(नेपथ्ये कौमुद्याः प्रावेशिक्याक्षिप्तिका)।

मउअरविओअविउरा मइलमुही माहवी समुल्लसइ।
सुज्जकरफंसकवलिअमिलाणकन्ती ण पुव्वं व्व[२]॥

(ततः प्रविशति कामयमानावस्था कौमुदी सुन्दरी कालिन्दी चूतलतिका च)

सुन्द। हला कोमइ, पेक्ख पेक्ख पवणल्लोलेहिं पल्लवेहिं अम्गहत्थेहिं विअ आआरेइ तुमं पमदवणं, पविस दाव णं[३]।

(सर्व्वाः प्रवेशं रूपयन्ति)।

कालि। इमं सिलाअलं अल्लेम[४]।

सुन्द। जधा दे रोअदि[५]।

---

(१) अहो एषा आर्य्या सुन्दरी भर्त्तृदारिकासहिता इतश्चागच्छति, तदविलम्बं सम्भावयाम्येनाम्।

(२) मधुकरवियोगविधुरा मलिनमुखी माधवी समुल्लसति। सूर्य्यकर-स्पर्शकवलितम्लानकान्तिः न पूर्व्वमिव॥

(३) अयि कौमुदि, पश्य पश्य पवनलोलैः पल्लवैरग्रहस्तैरिवाकारयति त्वां प्रमदवनं, प्रविश तावदेनत्।

(४) इदं शिलातलमाश्रयामः।

(५) यथा ते रोचते।

Digitized by Google

(सर्व्वा उपविशन्ति)।

कालि। सहि, पेक्ख पेक्ख, एसो पाडलपुप्फप्पराग-मन्थरो मिउलसंचारी दीहिआजलसीअलो सुह-प्फंसो वाओ आआमइ तुज्झे मुहअमलसेअजा-लअं[१]।

(कौमुदी तूष्णीमास्ते)।

सुन्द। इदो दाव पेक्ख, एदे वउलामोअमत्ता महुअरा मिलाणामिलाणविएअमन्थरा पए पए पआरिअन्ति[२]।

(कौमुदी भ्रमरशब्दं सूचयित्वा भयं रूपयति)।

कालि। (ससंभ्रमम्) इला सुन्दरि, पेक्ख पेक्ख आ-अड्ढवाउलां पिअसहीं[३]।

सुन्द। इला सहि, कोमइ, किमेव्वं तम्मसि[४]?

---

(१) सखि, पश्य पश्य, एष पाटलपुष्पपरागमन्थरो मृदुलसञ्चारी दीर्घिकाजलशीतलः सुखस्पर्शोवातआयामति तव मुखकमलखेद-जालकम्।

(२) इतस्तावत् पश्य, एते वकुलामोदमत्ता मधुकरा स्खलास्खल-विवेकमन्थराः पदे पदे प्रतार्यन्ते।

(३) अयि सुन्दरि, पश्य पश्यातङ्क्याकुलां प्रियसखीम्।

(४) अयि सखि, कौमुदि, किमेवं तान्यसि?

Digitized by Google

(कौमुदी तथैवास्ते)।

सुन्द। णं भणामि सहि कोमइ, त्ति[१]।

कौमु। (प्रकाशमिव भूत्वा) इला सुन्दरि, किं कहेसि?[२]

सुन्द। णं पुच्छामि, किमेव्वमट्ठाणे कादरासि जादा[३]?

कौमु। कधं कादरा होमि[४]।

सुन्द। कधं ण कादरासि, अणुदिणं अहिअअरं मिलाना दीससि, ता कहेहि कुदो इदं अवत्थन्तरं, जेण जाणिअ अन्हे वि पडिआरवरा होम्म। अलं सुउमारमप्पाणमाआसिअ[५]।

कालि। सोहणं वोलइ सुन्दरी[६]।

कौमु। किं कहेमि[७]।

---

(१) ननु भणामि सखि कौमुदि, इति।

(२) अयि सुन्दरि, किं कथयसि?

(३) ननु पृच्छामि किमेवमस्थाने कातराऽसि जाता?

(४) कथं कातरा भवामि।

(५) कथं न कातराऽसि, अनुदिनमधिकतरं म्लाना दृश्यसे, तत् कथय कुतइदमवस्थान्तरं, येन ज्ञात्वा वयमपि प्रतिकारपरा भवामः। अलं सुकुमारमात्मानमायास्य।

(६) शोभनं वदति सुन्दरी।

(७) किं कथयामि।

Digitized by Google

सुन्द। परे विअ अम्हे पत्तेसि[१]।

कौमु। ण क्खु ण क्खु, उच्छसिअं मे तुज्झे[२]।

सुन्द। कधमेव्वं संभवइ, जइ अम्हेहिं अंसग्गहणेण दुक्खभारस्स तुह लहुदा ण करीअदि[३]।

कालि। इला कौमइ, अवितधं वेत्तइ सुन्दरी। समदुक्खसुहो क्खु सहीअणो होइ[४]।

कौमु। (स्वगतम्) का गई। (प्रकाशम्, निःश्वस्य) कस्स वा अण्णस्स कहिस्सं। लज्जामि उण कहेउं[५]।

(इति सलज्जमधोमुखी तिष्ठति)।

सुन्दरीकालिन्द्यौ। कहेहि कहेहि, अम्हेसुं वि लज्जसि?[६]।

कौमु। अलं काहेउण, अप्पडिकज्जो अअमाअक्को[७]।

सुन्दरीकालिन्द्यौ। सुणुमो दाव[८]।

---

(१) परानिवास्मान् प्रत्येषि।

(२) न खलु न खलु, उच्छ्वसितं मे यूयम्।

(३) कथमेवं सम्भवति, यद्यस्माभिरंशग्रहणेन दुःखभारस्य तव लघुता न क्रियते।

(४) अयि कौमुदि, अवितथं वक्ति सुन्दरी। समदुःखसुखः खलु सखीजनो भवति।

(५) का गतिः। कस्य वा अन्यस्य कथयिष्यामि। लज्जे पुनः कथयितुम्।

(६) कथय कथय, अस्माकमपि लज्जसे?

(७) अलं कथयित्वा। अप्रतिकार्योऽयमातङ्कः।

(८) शृणुवस्तावत्।

Digitized by Google

कौमु। अलं तुम्हे आआसिअ[१]।

सुन्द। अदोज्जेव णिव्वन्धो। सहिउं सक्किहिदु क्खु एव्वं वेअणा[२]।

कालि। हला अलीअसङ्किदे, सहीओ क्खु अम्हे[३]।

कौमु। जइ वो णिब्बन्धो सुणीअदु[४]।

सुन्दरीकालिन्द्यौ। ओहिदाओ म्हे[५]।

कौमु। (सुन्दरीं प्रति) कच्चाअणीजत्तामहुस्सअदिअहे तुमं मे संणिहिदा आसि[६]।

सुन्द। (सवैलक्ष्यम्) सुमरामि[७]।

कौमु। जआ अहं कुलाअलाअणविस्सामममंदिरस्स उवरि अलिन्दे ट्ठिआ असोअरुक्खमूलट्ठिअं सरीरिणं विअ भअवन्तं अणंगं कम्पि पुरिसरअणं अणिमिसेण अच्छिणा णिज्झाअन्ती कण्डइअसरीरा संवुत्ता, तआ तुमए भणिदं, रूव-

---

(१) अलं वामायास्य।

(२) अतएव निर्बन्धः। सोढुं शक्यते खल्वेवं वेदना।

(३) अयि अलीकशङ्किते, सख्यौ खल्वावाम्।

(४) यदि वां निर्बन्धः श्रूयताम्।

(५) अवहिते स्वः।

(६) कात्यायनीयात्रामहोत्सवदिवसे त्वं मम सन्निहिता आसीः।

(७) स्मरामि।

Digitized by Google

मुद्धा पम्हलिआ सुहेण अग्गिं पविसदु, कहिम्पि मणिप्पहाए अणलब्भमादो फंसक्खमं रअणम्पि लहदु त्ति। दाणिं उण पुच्छसि कुदोदुदं अवत्थन्तरं त्ति[१]।

सुन्द। (सप्रत्यभिज्ञम्) कधं अज्जसुहाअरणिमित्तो अअमाआसो[२]।

कालि। (स्वगतम्) दिट्ठिआ अप्पाणुरूवे जणे अणुरत्ता पिअसही। अधआ, सुहाअरं ज्जेव कोमदू अणुसरदु[३]।

(चूतवतिका सम्भ्रमं हर्षं नाटयति)।

कौमु। (निःश्वस्य) सोअं अप्पडिकज्जो आआसो[४]।

---

(१) यदा अहं कुलावलाजनविश्राममन्दिरस्य उपर्यलिन्दे स्थिता अप्रोक्षत्तमूलस्थितं शरीरिणमिव भगवन्तमनङ्गं कमपि पुरुषरत्नं अनिमिषेक्षणा निध्यायन्ती कण्टकितशरीरा संवृत्ता, तदा त्वया भणितं; रूपमुग्धा पतङ्गिका सुखेनाग्निं प्रविशति, कदापि मणिप्रभायामनलभ्रमात् स्पर्शक्षमं रत्नमपि लभते इति। इदानीं पुनः पृच्छसि कुत इदमवस्थान्तरमिति।

(२) कथमार्यसुधाकरनिमित्तोऽयमातङ्कः।

(३) दिष्ट्या आत्मानुरूपे जने अनुरक्ता प्रियसखी। अथवा, सुधाकरमेव कौमुदी अनुसरति।

(४) सोऽयमप्रतिकार्य आतङ्कः।

Digitized by Google

सुन्द। ण क्खु अप्पडिक्कज्जो त्ति तक्केमि[१]।

कौमु। सहीसणेहो वेव्भलेइ दे मदिं[२]।

सुन्द। कधं विअ ?[३]

कौमु। (सविषादम्) णं पुरोभाइणि, राअमन्ती वसुमित्तो मं पत्थेइ त्ति सुणीअदि[४]।

सुन्द। सच्चं सुणीअदि, किं दुमम्मि विसाअकारणं ?[५]

कौमु। पिआ मे णेहपरव्वसो एस्सज्जादिसअं पेक्खन्तो सुहादिसओ होहिइ त्ति जइ तस्स ज्जेव मंदभाइणीं मं[६] (इत्यर्द्धोक्ते वाष्पैः कण्ठरोधं रूपयति)।

कालि। सहि, मा कादरा होहि[७]।

सुन्द। (सश्लाघमात्मगतम्) अम्म! सरिसवेदुत्तणं पिअसहीए, जा सम्पदं अगणिदूअ गुणं ज्जेव अम्हे

---

(१) न खल्वप्रतिकार्य इति तर्कयामि।

(२) सखीस्नेहो विक्लवयति ते मतिम्।

(३) कथमिव ?

(४) ननु पुरोभागिनि, राजमन्त्री वसुमित्रो मां प्रार्थयते इति श्रूयते।

(५) सत्यं श्रूयते, किमत्र विषादकारणम् ?

(६) पिता मे स्नेहपरवश ऐश्वर्यातिशयं पश्यन् सुखातिशयो भविष्यतीति यदि तस्यै एव मन्दभागिनीं मां—

(७) सखि, मा कातरा भव।

Digitized by Google

करेदु । (प्रकाशम्) अलं अलं आवेरण । जइ एव्वं मणसि, पिदरं गहिदत्थं करेम्ह[१] ।

कौमु । मा मा एव्वं, सो क्खु मह पभवदु[२] ।

सुन्द । णं पभवन्ताज्जेव विण्णवेज्जन्ति[३] ।

कौमु । ण क्खु विण्णवणा एसो[४] ।

सुन्द । का उण ?[५]

कौमु । णं णिओआणा[६] ।

सुन्द । कधं विअ ?[७]

कौमु । एव्वं करीअदु त्ति भणिअं होदु[८] ।

सुन्द । अलं पस्सएण, णत्थि अण्णो उवाओ[९] ।

---

(१) अहो सदृशवेदित्वं प्रियसख्याः, या सम्मदमगणयित्वा गुणमेवाग्रतः करोति । अलमलमावेगेन, यद्येवं मन्यसे पितरं गृहीतार्थं कुर्म्मः ।

(२) मा मैवं, स खलु मम प्रभवति ।

(३) ननु प्रभवन्तएव विज्ञाप्यन्ते ।

(४) न खलु विज्ञापनैषा ।

(५) का पुनः ?

(६) ननु नियोजना ।

(७) कथमिव ?

(८) एवं क्रियतामिति भणितं भवति ।

(९) अलं प्रश्रयेण, नास्त्यन्य उपायः ।

Digitized by Google

कौमु । अदोज्जेव हदा म्हि मंदभाइणी, सव्वधा पुण्णमणोरहो किदन्तो[१] ।

सुन्द । कधं एव्वं अणुजलं देव्वं उवालहसि[२] ?

कौमु । कधं ण उवालहामि ; जेण एव्वं दुल्लहवत्तुम्मि विलोहिअ दिआणिसं अहं परिदहिआमि[३] ।

सुन्द । (सस्मितम्) विआरहेदुअं अप्पणो जोव्वणं किं ण उवालहसि[४] ?

कौमु । (सासूयम्) अवेहि दुव्विणीदे अवेहि, ण तुमए मन्तिस्सं[५] ।

सुन्द । (विहस्य) सच्चं दुव्विणीदा अहं, तुमं उण सुविणीदा, जो पुरिसदंसणमत्तेण अप्पणो ण पहुवसि[६] !

कौमु । अवेहि एदामवत्थां गदए वि मए कीलसि[७] ।

सुन्द । ण कीलिस्सं[८] ।

---

(१) अतएव हताऽस्मि मन्दभागिनी, सर्व्वथा पूर्णमनोरथः कृतान्तः ।

(२) कथमेवमनुकूलं दैवमुपालभसे ?

(३) कथं नोपालभे; येनैवं दुर्लभवस्तुनि विलोभ्य दिवानिशमहं परिदह्ये।

(४) विकारहेतुकमात्मनो यौवनं किं नोपालभसे ?

(५) अपेहि दुर्विनीते, अपेहि, न त्वया मन्त्रयिष्ये ।

(६) सत्यं दुर्विनीताऽहं, त्वं पुनः सुविनीता, या पुरुषदर्शनमात्रेण आत्मनोन प्रभवसि !

(७) अपेहि एतामवस्थां गतयाऽपि मया क्रीड़सि ।

(८) न क्रीड़िष्यामि ।

Digitized by Google

कालि। हला सुन्दरि, अदिमेत्तं क्खु वाहइ पिअसहीए उवदावो त्ति तक्केमि, ता उवआरम्ह दाव णं[१]।

सुन्द। हला कालिन्दि, एवं करेम्ह। हञ्जे चूअलदिए, उवआरोवअरणं दाव पिअसहीए[२]।

चूत। (निष्क्रम्य पुनः प्रविश्य) एदाइं मिणालाइं णलिणीअलाइं च[३]। (इत्यर्पयति)।

(सुन्दरी मृणालवलयादिभिर्नाट्येन कौमुदीमवधूय नलिनीदलानि हृदयेऽर्पयति, सर्वा नलिनीपत्रैर्वीजयन्ति च। कौमुदी वैक्लव्याधिक्यं नाटयति)।

सुन्द। किं दाणिं अहिअअरं तम्मइ पिअसही[४]?

कौमु। (सखेदम्) किं इमिणा उवआरपरिस्समेण किलिसिअन्ति पिअसहीओ। णं अम्हो ज्जेव प्पआरो पहरन्तस्स अणंगस्स। अम्हवंभं एव्व क्खु इन्धणं

---

(१) अयि सुन्दरि, अतिमात्रं खलु बाधते प्रियसख्या उपताप इति तर्कयामि, तदुपचरावलम्बावदेनाम्।

(२) अयि कालिन्दि, एवं कुर्वः। अयि चूतलतिके, उपचारोपकरणं तावत् प्रियसख्याः।

(३) एतानि मृणालानि नलिनीदलानि च।

(४) किमिदानीमधिकतरं ताम्यति प्रियसखी?

Digitized by Google

कुणदु उव्वाअलो । अहं च सहि[१],

(संस्कृतमाश्रित्य साखम्)

सन्निपातज्वरस्यान्तरन्तर्दाहे सुदारुणे ।
स्नानं यथोपचारोऽयमनर्थायैव भाति मे ॥

अपि च,

धारासारैरपि परिगतो वैद्युताग्निः समन्तात्
कादम्बिन्याः ज्वलति नितरामन्तरेऽनन्तरायः ।
सन्तापस्य स्फुरति करणे नूनमन्तःप्रकोपे
बाह्यैः किं स्यात्तदुपचरणैर्मामतश्चिन्तयध्वम् ॥

(इत्यश्रूणि मुञ्चति) ।

सखौ। (सविषादम्) आसां आलंवेहि, णलिणी क्खु दिवाअरविरहे वि आसाए जीविदं धारेदु[२]।

कौमु। सुलहो क्खु से पिओ पेक्खिदुं[३]।

सुन्द। तुह वि ण दुल्लहो त्ति तक्केसि[४]।

---

(१) किमनेनोपचारपरिश्रमेण क्लिश्यते प्रियसखौ। नन्वन्यएव प्रकारः प्रहरतोऽनङ्गस्य, अर्यवाम्भएव खल्विन्धनं करोत्यौर्व्वानलः। अन्यच्च सखि,

(२) आशाभवलम्बस्व, नलिनी खलु दिवाकरविरहेऽप्याशया जीवितं धारयति।

(३) सुलभः खलु तस्याः प्रियः प्रेक्षितुम्।

(४) तवापि न दुर्लभ इति तर्कयामि।

Digitized by Google

कौमु। (सदुःखस्मितम्) सुट्ठु क्खु अस्सासिदा म्हि पिअसहीए, किमण्णं उवट्ठिआ सुहदिट्ठी[१]!

सुन्द। अविणाम इच्छीअदि तस्स दिट्ठी[२]?

चूत। पच्चासण्णा[३]।

कालि। को संसओ[४]।

कौमु। (निःश्वस्य) ममं किं पुच्छसि, देव्वं पुच्छ[५]।

चूत। णं भणामि पच्चासण्णा त्ति[६]।

सुन्द। अइ का[७]?

चूत। भअवदी परिव्वाइआ[८]।

सुन्द। कधं तुमए जाणिअं[९]?

चूत। किं ण सुणंति अत्थभोदीओ[१०]।

---

(१) सुष्ठु खल्वाश्वासिताऽस्मि प्रियसखी, किमन्यत् उपस्थिता शुभदृष्टिः।

(२) अपिनाम इष्यते तस्य दृष्टिः?

(३) प्रत्यासन्ना।

(४) कः संशयः।

(५) मां किं पृच्छसि, दैवं पृच्छ।

(६) ननु भणामि प्रत्यासन्ना इति।

(७) अयि का?

(८) भगवती परिव्राजिका।

(९) कथं त्वया ज्ञातम्?

(१०) किं न शृण्वन्ति अत्रभवत्यः।

Digitized by Google

सुन्द। किं त्ति[१]।

चूत। सुणध[२]।

(सर्व्वा आकर्णयन्ति)।

(नेपथ्ये)

आद्ये तत्त्वेऽभ्युदयति परस्थैर्य्यलाभाद्विलोलै-
स्त्यक्ता तावद्विगुणकलुषा भूमिकास्तिस्रएव।
योऽसौ साक्षान्नियमितमरुत्प्राप्तयोगाधिकारै-
रन्तर्भग्यस्तमखिलगुरुं चेतसा चिन्तयामि॥

(सर्व्वाः किञ्चित् सम्भ्रान्ताः। कौमुदी नलिनीदलादीनि गोपायितुमारभते। ततः प्रविशति परिव्राजिका। सर्व्वा उत्तिष्ठन्ति)।

परि। (विलोक्य) अलमलमायासेन। भस्मच्छन्नोऽप्यनलोनिपुणैरुपलक्ष्यतएव।

कौमु। (सभयम्) भअवदि वन्दामि[३]।

(सर्व्वाः प्रणमन्ति)।

परि। एकायनं तरलतोलतरस्य काम्यो-
यस्येतसो हृदि विलोक्यतएव साक्षात्।
कन्दर्पदर्पशमनः परनिर्वृतीनां
दाता मनोरथसखस्तमिमं भजस्व॥

---

(१) किमिति?

(२) भट्टिणुत।

(३) भगवति, वन्दे।

Digitized by Google

सुन्द । इमं सिलाअलं गेण्हादु भअवदी[१] ।

(कौमुदी सत्रपाऽधोमुखी मृणालवलयादीनि शनैरपसारयति) ।

परि । यूयमप्युपविशत ।

(सर्व्वा उपविशन्ति) ।

परि । (कौमुदीमवलोक्य) अलमात्मानमायास्य ।

यायच्छिरीषकुसुमोपमकान्तिमन्ति
भास्वद्वियोगविधुराजसमान्यमूनि ।
उच्चैर्निसर्गरुचिरत्वमनोरमाणि
नाङ्गानि ते न कथयन्तितरामवस्थाम् ॥

अपिच । वत्से,

उषसि नितरां पाण्डुः सान्द्रान्मृगाङ्कदवानिशं
सुतनु, वदनं बाधामुग्रां व्यनक्ति हृदि स्थिताम् ।
अनुदिनपरिक्षामश्यामा सहस्यदिनात्यये
रजनिरिव ते मूर्त्तिश्चित्तं दुनोति मनस्विनाम् ॥

मामपि न परामवगन्तुमर्हसि, द्वितीयां मां जननी-
मवगच्छ, तदावेदय प्रभवमस्य ।

(कौमुदी सलज्जमधोमुखी तूष्णीमास्ते) ।

सुन्द । एसा णिवेदेमि, लज्जइ क्खु ऐसा वोत्तिदुं ।
इमस्सिं दाव उवप्पए भअवदीचलणा ज्जेव अन्हाणं

---

(१) इदं शिलातलं गच्छतु भगवती ।

Digitized by Google

आलंवणं, ता वच्छाए दुमाए किवां कादुं अरिहेइ भअवदी[१] ।

कौमु । (जनान्तिकम्) विरम दाव, लज्जामि क्खु अहं भअवदीए मुहं दंसेदुं[२] ।

सुन्द । हला अलीअलज्जिदे, रक्खिदव्वो क्खु अप्पा[३] ।

परि । (निःश्वस्य) आन्तरः स्नेहो न खल्वन्यस्मै दर्शयितुं शक्यः, लिङ्गादपि तावदवगन्तुमर्हसि ।

सुन्द । सहीसणेहो मं वाउलेइ भअवदीए प्पसादो वि मुहरेदि, ता क्खमदु मं भअवदी[४] ।

परि । अपराधी किल क्षम्यते ।

सुन्द । जाणमु किवां भअवदीए[५] ।

परि । प्रत्ययमिदानीं श्रोतुमिच्छामि ।

सुन्द । सुणादु भअवदी । जो अह धम्मेक्कदानन्तरो

---

(१) एषा निवेदयामि, लज्जते खल्वेषा वदितुम् । अस्मिन् तावदुपज्ञवे भगवतीचरणावेवास्माकमवलम्बनम् । तदत्यायामस्यां कृपां कर्तुमर्हति भगवती ।

(२) विरम तावत् । लज्जे खल्वहं भगवत्यै मुखं दर्शयितुम् ।

(३) अयि अलीकलज्जिते, रक्षितव्यः खल्वात्मा ।

(४) सखीस्नेहोमां व्याकुलयति भगवत्याः प्रसादोऽपि मुखरयति, तत् क्षमतां मां भगवती ।

(५) जानीमः कृपां भगवत्याः ।

Digitized by Google

सकलविद्यापारदृश्वा दयावान्नो युक्तव्यवहारो सच्चणिट्ठो विणई गुणरासी विअ मुत्तिमन्तो सुहाअरो णाम[१]।

परि। स खलु महात्मा सुधाकरः।

(कौमुदी हर्षं नाटयति)।

सुन्द। तं पिअसहीए अणुराअभाअणं आगच्छदु भअवदी[२]।

(कौमुदी लज्जां सुन्दरीमवलम्ब्य नाटयति)।

परि। तस्मिन् गुणानां प्रभवेऽनुरक्ता
स्वाध्यानुरूपे यदि वः सखीयम्।
व्रीड़ाऽत्र का धर्म्मपथं प्रपन्ना
श्रद्धा सती तत्त्वविदां न वाच्या॥

तदहमपि समीहितसिद्धये यतिष्ये।

सुन्द। जह भअवदी आणवेदि[३]।

कौमु। (सहर्षमात्मगतम्) अमिअं खलु वअणं भअवदीए[४]।

---

(१) गृह्णातु भगवती। योऽसौ धर्म्मैकतानन्तरः सकलविद्यापारदृश्वा दयावान् युक्तव्यवहारः सत्यनिष्ठो विनयी गुणराशिरिव मूर्त्तिमान् सुधाकरो नाम।

(२) तं प्रियसख्या अनुरागभाजनमवगच्छतु भगवती।

(३) यथा भगवती आज्ञापयति।

(४) अमृतं खलु वचनं भगवत्याः।

Digitized by Google

परि। कथं पुनरस्मिन् श्लाघनीयेऽपि विषये उपप्लव-व्यपदेशइति न खल्वधिगच्छामि।

सुन्द। ण क्खु इमो उवप्पवो[१]।

परि। कः पुनः?

सुन्द। वसुमित्तो णो पिअसहीं पत्थेइ[२]।

परि। स्वतन्त्रः खल्वसौ किमत्र क्रियताम्।

(कौमुदी विषादं नाटयति)।

सुन्द। यं भअवदीए रोअदि। ण क्खु एसा सुहाअरं उज्झिअ अण्णम्मिं भाववन्धं कुणहिइ[३]।

परि। अयि मुग्धे, एतदपि वक्तव्यम्!

सुन्द। सव्वधा भअवदी अम्हाणं गई। को उण एत्थ उवाओ होहिइ[४]?

परि। (स्मितं कृत्वा) न खलु योऽयत् प्रार्थयते स तस्मभ-तएव।

सुन्द। जइ पिदा णं तस्स पडिवादेइ[५]।

---

(१) न खल्वयमुपप्लवः।

(२) वसुमित्रो नः प्रियसखीं प्रार्थयते।

(३) यद्भगवत्यै रोचते। न खल्वेषा सुधाकरमुज्झित्वा अन्यस्मिन् भाव-बन्धं करिष्यति।

(४) सर्व्वथा भगवती अस्माकं गतिः। कः पुनरत्रोपायो भविष्यति?

(५) यदि पिता एनां तस्मै प्रतिपादयति?

Digitized by Google

परि । निश्चिन्तेदानीं भव, शक्करा खण्डम् ।

(कौमुदी परितोषं नाटयति) ।

सुन्द । अणुग्गहीदा म्ह[१] ।

परि । कुत्र पुनर्वत्सया दृष्टः सुधाकरः ?

सुन्द । कच्चायणीजत्तामहुस्सवे[२] ।

परि । युज्यते ।

सुन्द । तं उण अच्छरीयं संवुत्तम्[३] ।

परि । कथमिव ?

सुन्द । ण क्खु दंसणमत्तेण अणुरज्जीअदि[४] ।

परि । किमचाश्चर्य्यम् । पश्य,

क्षेत्रं प्रविश्य ननु तत्क्षणमेव तोयं
साक्षादमुष्य सदृशं परिणाममेति ।
चेतोऽप्यवाप्य विषयं परिकाङ्क्षणीयम्
अङ्गाय जातु खलु तन्मयतामुपैति ॥

नूनमनेन दैवमनुकूलं तर्कयामि ।

सुन्द । कधं विअ[५] ?

---

(१) अनुगृहीताः स्मः ।

(२) कात्यायनीयात्रामहोत्सवे ।

(३) तत्पुनराश्चर्यं संवृत्तम् ।

(४) न खलु दर्शनमात्रेणानुरज्यते ।

(५) कथमिव ?

Digitized by Google

परि। नायमतिगूढस्तर्कः। कुतः?

आलोक्यन्ते जगति कति न प्रेक्षणीयाः मनुष्याः
किन्त्वात्मीयो हरति हृदयं दृष्टमात्रः प्रसह्य।
सन्त्येवोच्चैर्मधुरललितप्रार्थनीयाः पदार्था-
सुन्दं प्रेक्ष्य द्रवति सहसा केवलं चन्द्रकान्तः॥

अपिच,

सान्निध्यमात्रात् यत्किञ्चित् कुत्रचित् प्रतिबिम्बते।
दैवस्यैव निदेशोऽयं रागोऽन्यः स्फटिके यथा॥

(दिशमवलोक्य)

कथं कथाप्रसङ्गेन सन्ध्याऽतिक्रमोऽपि नोपलक्षितः!

सम्प्रति हि

कालेन संरूढपदो भविष्य-
न्नल्पोऽन्धकारः शनकैरुपैति।
दोषाप्रसङ्गादिमलेऽपि लोके
पापेव साक्षादविलक्ष्यजन्मा॥

त्वरयते मां सायन्तनो विधिः, साधयामस्तावत्।

(इत्युत्तिष्ठति)।

(सर्वाः प्रणमन्ति)।

परि। समीहितसिद्धिर्भूयात्। (इति निष्क्रान्ता)।

सुन्द। हला कोमइ, इह ज्जेव सीअलप्पदेसे णिव्वि-
सीअदु पअ्रोसो(१)।

(१) अयि कौमुदि, इहैव शीतलप्रदेशे निर्विश्यतां प्रदोषः।

Digitized by Google

कौमु । बाहिरे अच्छन्ति मे सारिआओ(१) ।

सुन्द । हञ्जे चूअलदिए, तुमं दाव अरं पावेहि सारिआओ(२) ।

चूत । तह(३) (इतिनिष्क्रान्ता) ।

काम्मि । अहम्पि साहेमि(४) ।

कौमु । किं त्ति(५) ?

काम्मि । अत्थि मे पओअणविसेसो(६) ।

कौमु । हला सुन्दरि, अम्हेवि गच्छामो(७) ।

काम्मि । चिट्ठदु पिअसही, इअं अहं आगदा एव्व(८) (इतिनिष्क्रान्ता) ।

(कौमुदी दक्षिणानिजस्पर्शं सूचयित्वा विषादं नाटयति) ।

सुन्द । हला कोमइ, अल्लाहि विसाएण, अस्सत्था दाणिं होहि(९) ।

---

(१) बहिः सन्ति मे सारिकाः ।

(२) अयि चूतलतिके, त्वं तावत् मदर्थं प्रापय सारिकाः ।

(३) तथा ।

(४) अहमपि साधयामि ।

(५) किमिति ?

(६) अस्ति मे प्रयोजनविशेषः ।

(७) अयि सुन्दरि, आवामपि गच्छावः ।

(८) तिष्ठतु प्रियसखी, इयमहमागतैव ।

(९) अयि कौमुदि, अलं विषादेन, आश्वसेदानीं भव ।

Digitized by Google

कौमु । (निःश्वस्य) दूरअदो मे मणोरहो[१] ।

सुन्द । ण क्खु भअवदी अलीअं मन्तेदि[२] ।

कौमु । जाणामि एदं, भाअहेअं उण णोगच्छामि । तादो वा कधं मण्णइ[३] ?

सुन्द । मा संकेहि, तादोवि भअवदीमुहादो गहीदत्थो ण दे परिवन्थी होहिइ त्ति तक्केमि[४] ।

कौमु । ण क्खु अविणीदा अणुअम्पिज्जइ त्ति वेवइ मे हिअअं[५] ।

सुन्द । को उण इमस्सिं अविणओ ? खं वहीओ वि कुलकण्णाओ एव्वं अविणीदाओ सुणीअन्ति[६] ।

कौमु । परवदी क्खु अहं[७] ।

सुन्द । (सस्मितम्) ण क्खु सच्छन्ददो ज्जेव अज्जसुहाअरस्स अंकं आरूढा सि[८] ?

---

(१) दूरगतोमे मनोरथः ।

(२) न खलु भगवती अलीकं मन्त्रयति ।

(३) जानाम्येतत्, भागधेयं पुनर्नावगच्छामि । तातो वा कथं मन्यते ?

(४) मा ग्रहीत्, तातोऽपि भगवतीमुखादृहीतार्थो न ते परिपन्थी भविष्यति इति तर्कयामि ।

(५) न खल्वविनीता अनुकम्प्यते इति वेपते मे हृदयम् ।

(६) कः पुनरत्राविनयः ? ननु वक्रोऽपि कुलकन्यका एवमविनीताः श्रूयन्ते ।

(७) परवती खल्वहम् ।

(८) न खलु स्वच्छन्दादेव आर्यसुधाकरस्याङ्कमारूढाऽसि ?

Digitized by Google

कौमु। (सास्रवम्) अवेहि ण तुमए मन्तिस्सं[१]।

सुन्द। जुज्जदि[२]।

कौमु। (सरोषम्) किं इमम्मि जुज्जदि[३]?

सुन्द। किमण्णं, अज्जसुहाअरेणमन्तेउं इच्छसि[४]।

कौमु। एस तुह अप्पणो अहिलासानुरूवा कधा[५]।

सुन्द। (सस्मितम्) पेक्खिहिमु कस्स एव्वं अहिलासो।
अधआ। पेक्खामो[६]।

कौमु। (साघ्रङ्गम्) हला सुन्दरि, अलाहि कीलिउण, पभवइ क्खु मे तादो। ता भअवदीसआसादो गेल्हिदत्थस्स तादस्स कधं मुहं दंसेहिमि त्ति जं सच्चं विलीइअइ विअ मे हिअअं[७]।

सुन्द। पभवइ दे तादो सरीरमत्तस्स ण मणस्स।

---

(१) अपेहि न त्वया मन्त्रयिष्ये।

(२) युज्यते।

(३) किमत्र युज्यते?

(४) किमन्यत्, आर्य्यसुधाकरेण मन्त्रयितुमिच्छसि।

(५) एषा तवात्मनोऽभिलाषानुरूपा कथा।

(६) द्रक्ष्यामः कस्यैवमभिलाषः। अथवा। पश्यामः।

(७) अयि सुन्दरि, अलं क्रीड़ित्वा। प्रभवति खलु मे तातः। तद् भगवतीसकाशाद्गृहीतार्थस्य तातस्य कथं मुखं दर्शयिष्यामि इति यद् सत्यं विलीयतइव मे हृदयम्।

Digitized by Google

अवि अ। अणीअसंविदे, अणुरूववराभिलासां तुमं सुणिअ तादोवि संतुट्ठो होहिदू[१]।

(नेपथ्ये)

धूलीभिर्मलमुत्सिताभिरभितः संच्छादयन् दिङ्मुखं
वाचालस्य मुखस्यपत्रनिवहं भूयः क्षिपन् भुक्षितः।
उच्चैरानमयंश्च तान् तृणचयं दूरात्क्षिपन् दूरतो-
वातोऽयं समुपस्थितो वहिरवस्थानाय मां प्रौढयन्॥

(उभे वात्याबाधां रूपयतः)।

सुन्द। हला कोमदु, णादिसंणिहिदमन्तेउरं ता एहि उज्जाणमन्दिरं ज्जेव संस्सेम[२]।

कौमु। हला सुन्दरि, एव्वं करमु[३]।

सुन्द। इदो इदो पिअसही[४]। (उभे परिक्रामतः)।

सुन्द। इमं उज्जाणमन्दिरं पविसेदु पिअसही[५]।

(उभे प्रविशतः)।

(ततः प्रविशति सुधाकरः)।

---

(१) प्रभवति ते तातः शरीरमात्रस्य न मनसः। अयि अ। अनीकसङ्गिनि, अनुरूपवराभिलाषां त्वां श्रुत्वा तातोऽपि सन्तुष्टो भविष्यति।

(२) अयि कौमुदि, नातिसन्निहितमन्तःपुरं, तदेहि उद्यानमन्दिरमेव संश्रयावः।

(३) अयि सुन्दरि, एवं कुर्मः।

(४) इतइतः प्रियसखी।

(५) इदमुद्यानमन्दिरं प्रविशतु प्रियसखी।

Digitized by Google

कौमु । (विलोक्य सभयम्) हला सुन्दरि, को णु क्खु अअं दीसइ[१] ?

(ततः प्रविशति सुधाकरः) ।

सुन्द । (उपसृत्य निरूप्य च सभयम्) कधं अज्जसुहाअरो ! होदु एव्वं दाव । (प्रकाशम्) को उण तुमं अणणुण्णाविअ एव्व कुलाअलाअणवीसाममन्दिरं पइट्ठो सि[२] ?

सुधा । (सविनयम्) आर्य्ये, सविधेन पथा सञ्चरन् वात्यावाधया निपीड़ितोऽभ्यर्णमिदं मन्दिरं प्रविष्टोऽस्मि । मर्षय तावदेतत् ।

सुन्द । (सहासम्) धिदेा कुम्भीलओ वोलइ "मग्गभमादो आगदो" त्ति[३] ।

सुधा । आर्य्ये, नूनमहमपराधी, तथापि नैवं प्रतिपत्तुमर्हसि ।

सुन्द । (सस्मितम्) को संसओ, पुणदंसणो साहू क्खु

---

(१) अयि सुन्दरि, कोनु खल्वयं दृश्यते ?

(२) कथमार्य्यसुधाकरः ! भवतु एवं तावत् । कः पुनस्त्वमननुज्ञाप्यैव कुलावलाजनविश्राममन्दिरं प्रविष्टोऽसि ?

(३) धृतः कुम्भिलकोवदति—"मार्गभ्रमादागतः"—इति ।

Digitized by Google

सि! चिट्ठ दाव, जाव इमस्स साहुस्स वुत्तन्तं पिअरस्स पुण्णकित्तिस्स णिवेदिस्सं[१]। (इति प्रस्थिता)।

सुधा। अलमलमन्यथा सम्भाव्य। सुधाकरः खल्वहम्।

कौमु। (सहर्षविस्मयमात्मगतम्) अम्म कधं सो ज्जेव महाभाओ[२]!

सुन्द। (ससम्भ्रमविनयमञ्जलिं बध्वा) अज्ज, जं ममाइ मूढाइ अज्जे अविणओ किदो तं क्खमिदुं अरिहेइ अज्जो[३]।

सुधा। न खल्वपराध्यति भवती। अधिकारोचितमनुष्ठितं भवत्या।

कौमु। (स्वगतम्) अम्म! उज्जुअत्तणं[४]।

सुन्द। अणुग्गहीदा म्हि[५]।

सुधा। मम तावद्विनयं क्षन्तुमर्हसि।

सुन्द। का उण अहं इमस्स खमाए। पिअसही मे

---

(१) कः संशयः, पुण्यदर्शनः साधुः खल्वसि! तिष्ठ तावत्, यावदस्य साधोर्वृत्तान्तं पित्रे पुण्यकीर्त्तये निवेदयिष्यामि।

(२) अहो कथं स एव महाभागः!

(३) आर्य्ये, यन्मया मूढ्या आर्य्ये अविनयः कृतः, तत् क्षन्तुमर्हत्यार्य्यः।

(४) अहो ऋजुकत्वम्!

(५) अनुगृहीताऽस्मि।

Digitized by Google

कोमई एदस्स घरस्स सामिणी, णं खमेदुं अरिहइ अज्जो[1]। (इति कौमुदीमङ्कुल्या दर्शयति)।

सुधा। (उपसृत्य) मम तावद्भवती,

अविनयं क्षमतामनुकम्पया
प्रथममेतमनन्यगतेः कृतम्।
तनुभृतां शरणागतरक्षणं
ह्युपदिशन्ति महाव्रतमक्षयम्॥

(कौमुदी सलज्जमधोमुखी तिष्ठति)।

सुन्द। (बहिरवलोक्य ससम्भ्रमम्) इदो दाव कीलासारङ्गसिसुओ अहिहुदुज्जदु दुट्ठसारमेएण, मोएमि दाव णं[2]। (इति प्रस्थिता)।

कौमु। मा निक्काम, एआइणी क्खु अहं[3]।

(इति सिचयाञ्चलमादाय वारयति)।

सुन्द। (सस्मितम्) कंदप्पदप्पहारी दे पुरदो चिट्ठदि[4]।

---

(१) का पुनरस्मस्य क्षमायाम्। प्रियसखी मे कौमुदी एतस्य गृहस्य स्वामिनी, एनां क्षमयितुमर्हत्यार्यः।

(२) इतस्तावत् क्रीडासारङ्गशिशुकोऽभिभूयते दुष्टसारमेयेन, मोचयामि तावदेनम्।

(३) मा निष्क्राम, एकाकिनी खल्वहम्।

(४) कन्दर्पदर्पहारी ते पुरस्तिष्ठति।

Digitized by Google

कौमु। (सास्रयम्) अइ को[१] ?

सुन्द। णं भअवं भआणीपई[२]।

(इति शिवस्य चित्रपटमङ्कुश्या निर्दिश्य सिचयाञ्चलमाक्षिप्य निष्क्रान्ता)।

सुधा। (स्वगतम्) कुलाबला खल्वेषा न किमपि वक्ष्यति, मयाऽपि मनोगतमालपता शालीनत्वाय जलाञ्जलिर्दत्तो भवेत्, इति यत् सत्यमात्मनोऽपि लज्जे। (विचिन्त्य)। भवत्वेवं तावत्। (प्रकाशम्)। अयि भीरु,

परिहर विधुमुखि, शङ्कां प्रसन्नमद्य विधुमण्डलं भवतु।
उपरक्तोऽप्यतरश्मिर्न्यूनयति हि प्रकृतिसुभगोऽपि॥

(कौमुदी तथैवास्ते)।

सुधा। सुन्दरि, इयं चिन्ताम्लानमुखी न परमात्मानं यावदस्मानपि क्षणपरिचयप्रणयान् खेदयसि। पश्य,

क्षणमात्रप्रदृष्टाऽपि न कस्य कमलेक्षणे।
गन्धर्वनगरीव त्वं बाले, हरसि मानसम्॥

कौमु। (स्वगतम्) हिअअ, तह वाउलं हुविअ किं दाणिं मज्झत्थत्तणं ओलंवसि। सोअण, जं पेक्खिदुं

---

(१) अयि कः ?

(२) ननु भगवान् भवानीपतिः।

Digitized by Google

अदिमेत्तं उक्कंठसि, सेा दे पुरदेा चिट्ठदि, किं इह्मिं ण पेक्खसि[१]?

सुधा। अयि व्रीड़िते,

नितान्तचिन्ताज्वलितन्तवेदं
सुखं निरानन्दकरं किलेन्दोः।
मध्नाति भूयो हृदयं मदीयं
साक्षात् परिम्लानमिवारविन्दम्॥

कौमु। (स्वगतम्) सव्वं क्खु रमणिज्जं पेक्खदु महप्पा[२]।

सुधा। (सविषादमात्मगतम्) किं नु खल्विदम्! (विचिन्त्य) यद्भवति तद्भवतु, न पुनरात्मनो विज्ञापनाऽवसरं विफलयिष्ये। (प्रकाशम्) कल्याणि, न खल्वयं जनो-वाङ्मात्रेणापि न पुनः सम्भावनाऽर्हः। न खल्वात्मनः प्रभवामि, अत इदं ब्रवीमि। श्रूयतां भूतार्थः,

वेगेन प्रबलेन यस्तु हृदयं संप्लावयत्युत्सुकं
यश्चोन्मूलयति क्षणेन नितरामप्यात्मनः संयमम्।
यः खल्वभ्यवते विमोहयति वा सोऽयं दशाव्यत्ययो-
मामुच्चैरधुना करोति यदिदं वाग्भिः कथं कथ्यते॥

---

(१) हृदय, तथा व्याकुलं भूत्वा किमिदानीं मध्यस्थत्वमवलम्बसे? शोभन, यं प्रेक्षितुमतिमात्रमुत्कण्ठसे, स ते पुरतस्तिष्ठति, किमिदानीं न प्रेक्षसे?

(२) सर्वं खलु रमणीयं प्रेक्षते महात्मा।

Digitized by Google

कौमु। (स्वगतम्) किं णु क्खु एदं होज्जउ; किं अणुवआरसंहओ मम्मू अअं, उद जह मे मणस्स अहिलासो त्ति जं सच्चं इमिणा अप्फुडाक्खरेण वअणेण वेवदि मे हिअअं[१]।

सुधा। धिक्कष्टं व्रीड़ितोऽस्मि। (कौमुदीं प्रति) सुतनु, विवेकमूढ़ेन मया एवमभिहितं, न पुनरेवं श्रोष्यसि। तथाप्युद्विग्नः प्रवाहो न शक्यः सहसा नियमयितुम्, तद्भद्रमभद्रं वा भवतु, अनुग्रहेण श्रूयतां तावत् पश्चिमं वचः सुधारकस्य। (निःश्वस्य)।

त्वमेका कल्याणी विधुमुखि, मनो मे प्रियतया
विलोलं त्वय्येवं विगलति परिक्लान्यविषयम्।
मम त्वं न स्वा वा तव तु सुकुमाराङ्गि, नितरां
विनाऽप्यर्थात्मगं कलय खलु दासोऽयमबले॥

अविनयन्तु सुधाकरात्मा शङ्किष्ठाः। अहं हि,

वृथा मनोरथक्लिष्टस्त्यजेयमपि जीवितम्।
न खल्वविनयं कुर्यां त्वयि वा दोषभावनाम्॥

स्वस्ति भवत्यै। अनुमन्यस्व तावत्, गच्छामोऽपुनर्दर्शनाय। (इति प्रस्थितः)।

---

(१) किं नु खल्विदं भवेत्; किमनुपचारसम्भवो मन्युरयं, उत यथा मे मनसोऽभिलाषः इति यत्सत्यमनेनास्फुटाक्षरेण वचनेन वेपते मे हृदयम्।

Digitized by Google

कौमु। (स्वगतम्) हद्धी हद्धी! इमं सुणिअ ण मे धिई अत्थि, किं दाणिं कुणमि। होदु, अदिधिववदेसं ओलंविस्सं। (प्रकाशम्) मरिसेउ मरिसेउ महाभाओ[१]।

सुधा। (पदान्तरे प्रतिनिवृत्य) एषोऽस्मि।

कौमु। समाअराणहिओ खमिदुं अरिहो लज्जावरअसो कुलकण्णआअणो। दआलुणो क्खु अदिधिविसेसा होन्ति[२]।

सुधा। (स्वगतम्) कथमतिथिधर्म्म मय्याश्रयति। (प्रकाशम्) मा मैवम्। आभाषणमपि ते समादरपक्षे वर्त्तते।

कौमु। तह वि उवआरविमुही अवरद्धा म्हि महाभाअस्स मंदभाइणी[३]।

सुधा। सुन्दरि, अलमलमनेन। अतिमात्रं खल्वहमुपचरितस्त्वया। मया खलु तव,

वचनामृतमपि पीतं निर्वर्णितमाननं समाघ्रातः।
सुरभिमनोहरगन्धो वरतनु, कोमलशरीरस्य॥

(कौमुदी सव्रीड़ाऽधोमुखी तिष्ठति)।

---

(१) हा धिक् हा धिक्! इदं श्रुत्वा न मे धृतिरस्ति, किमिदानीं करोमि। भवतु अतिथिव्यपदेशमवलम्बिष्ये। मर्षयतु मर्षयतु महाभागः।

(२) समादरागभिज्ञः क्षन्तुमर्हो लज्जापरवशः कुलकन्यकाजनः। दयालवः खल्वतिथिविशेषा भवन्ति।

(३) तथाप्युपचारविमुखी अपराद्धाऽस्मि महाभागस्य मन्दभागिनी।

Digitized by Google

(नेपथ्ये)

भोः भोः अस्मदीया लोकाः,

उपप्लवाद्यातङ्कतात् परस्ता-
न्न कौमुदीं प्रेक्ष्य विहस्तितौ स्वः ।
उच्चैस्तरां तत्पितरौ, कुतः सा ?
ब्रूताधुना तिष्ठति चेन्मता वः ॥

कौमु । (आकर्ण्यात्मगतम्) हद्धी हद्धी, मह एव्व अणेसणा वट्टइ । हि अज्ज, अलीअलज्जिअ, किं दाणिं परितप्पसि ? सहसु लज्जादुव्विणअं[१] ।

(ततः प्रविशति सम्भ्रान्ता सुन्दरी)

सुन्द । हला कोमइ, एहि गच्छामो, अज्जो हारिअओ तुमं मग्गेअन्तो इदो ज्जेव्व आगच्छदि, विण्णवेहि दाव महाभाअं, उक्कंठिआ पिअरा[२] ।

(कौमुदी विषण्णा तूष्णीमास्ते) ।

सुन्द । महाभाअ, कोमई विण्णवेदि ; इच्छामि महाभाएण अव्भणुण्णादा पिअरे पेक्खिदुं त्ति[३] ।

---

(१) हा धिक् हा धिक्! ममैवान्वेषणा वर्त्तते । हृदय, अलीकलज्जित, किमिदानीं परितप्यसे ? सहस्व लज्जादुर्विनयम् ।

(२) अयि कौमुदि, एहि गच्छावः, आर्य्यो हारितकस्त्वां मार्गयन्नितएवागच्छति । विज्ञापय तावन्महाभागं, उत्कण्ठितौ पितरौ ।

(३) महाभाग, कौमुदी विज्ञापयति इच्छामि महाभागेनाभ्यनुज्ञाता पितरौ प्रेक्षितुमिति ।

Digitized by Google

(इति ध्रुवमेव सुधाकरमवलोकयन्ती कौमुदीमादाय निष्क्रान्ता ।)

सुधा । (निःश्वस्य) **गतं लोचनमभु । तत् किमत्र करोमि मन्दभाग्यः** । (विभाव्य) **अहो सन्देहाकुला कामिजन-मनोवृत्तिः** ।

मम हि,

विलोक्य चिह्नान्यपि नानुरागं
प्रत्येति चित्तं मृगलोचनायाः ।
न्यायैरिवार्थं स्वयमभ्युपेतम्
आभाषशून्यैरपि तत्त्ववाचः ॥

अपिच,

संवादवशाल्लोकः प्रत्येति स्वयमवधृतभूतार्थम् ।
मम खलु मनसस्तर्कः शिथिलस्तस्याः स्फुटोक्तिविरहेण ॥

यावदिमं वृत्तान्तं वयस्यसालङ्कायनं विज्ञापयिष्ये । स वा किं मन्यते । (परिक्रामन् साभ्यसूयम्)

आशंसापरिकल्पितेऽपि च मनो यच्चानृतैः श्राव्यते
यल्लोभात् किल पूर्व्वदेवनिवहैः पीयूषमप्युज्झितम् ।
तन्मुग्धेक्षणलक्षणं स्मितकथं भावार्द्रचेष्टोत्तरं
स्वर्गादप्यभिरामलोचनयनाप्रेमास्तु नित्यं मयि ॥

(इति निष्क्रान्तः) ।

इति कौमुदीसुधाकरे द्वितीयोऽङ्कः ॥

Digitized by Google

तृतीयोऽङ्कः ।

(ततः प्रविशति भीषणवेषोज्ज्वला कङ्कालमालिनी ।

कङ्का । वलमिति खलु पाशं यां वदन्ति प्रवीणाः
परमपुरुषतत्त्वं या तिरोधत्तएव ।
पशुकुलमनुगृह्य प्राज्यरूपा शिवा नो-
वितरतु शिवमेषा रोधशक्तिः शिवस्य ॥

अपिच,

पद्मेऽधोविलसत्सहस्रदलके कर्पूरगौरोज्ज्वले
यो राजत्यनुशक्ति मुक्तमधुरश्चक्रे द्विषट्के तथा ।
भित्त्वा तानि सरोरुहाणि च महाचक्रे परस्मिन् पुनः
सोऽयं पाशविमोचणेन परमोदेवः शिवत्वं क्रियात् ॥

अपिच,

स्वतन्त्रो यस्तावत् सकलकरणानामविरतं
प्रयोक्ता कर्म्मादि प्रभुरपि सदाऽपेक्षतदृह ।
स्वयं कर्त्ता साक्षात् स खलु परिशुद्धाध्वविषयेऽ-
हिते मार्गेऽनन्तादिभिरिति विभोः कोऽपि महिमा ॥

(गतानुगतिकान् श्लोकानवलोक्य)

**अहो पशूनां मतिवैपरीत्यम्! प्रायेण विषयानेव सेव-
मानाः केचित् पुनर्दुराचार्य्यचातुर्य्यवञ्चितत्वा-**

Digitized by Google

दनादृतमाहेश्वरसिद्धान्ताः क्लिश्यन्ते। एतेषु किल,

सकलाः प्रायशो लोका ये केचित् प्रलयाकलाः।
तेऽपि पुर्य्यष्टकैः कष्टं संसरन्ति पुनः पुनः॥

कालेन भगवान् पशुपतिरेव अबोधविक्लवेभ्यः स्वस्ति करिष्यति। (विचिन्त्य सविस्मयम्) अहो प्रभावातिशयोऽस्मद्गुरोः कापालिककुलभूषणस्य भगवतः खण्डमुण्डस्य। यद्चभवतः क्षपयैव असम्यग्योगचर्य्ययाऽपि मया कतिपयैरेव दिवसैः समासादिता खेचरी सिद्धिः। (विमृश्य) गुरुर्हि नाम भगवतः पशुपतेरेव मूर्त्यन्तरम्।

तथाहि,

परिपक्कमलानणून् भवाब्धेः
स्वयमुद्धर्त्तुमनाः पतिः पशूनाम्।
गुरुमूर्त्तिगतो दिशत्यमोघं
करुणावारिनिधिः शिवत्ववीजम्॥

सर्व्वथा नमः शिष्यजनकल्पतरुभ्यो दुर्गतशरणेभ्योऽस्मद्गुरुचरणेभ्यः। (इति प्रणमति)।

(त्वरं विभाव्य) गुरुदक्षिणार्थमुपच्छन्दितेन गुरुणा किलैवमादिष्टाऽस्मि; शरावतीपुरनिवासिनः पुण्यकीर्त्ते

Digitized by Google

स्तनयां कौमुदीं सुन्दरीहिलीयामपहृत्य तुङ्गपर्व्वतं नीत्वा संयम्य रक्षस्व, ततो मया अमावस्यायां तच्च गत्वा अनन्तरकरणीयं करिष्यते,—इति। सा खलु कौमुदी सर्व्वलक्षणोपेता कुमारीत्यस्मद्गुरोर्मन्त्रसिद्धये चामुण्डोपहारो भविष्यति। सुन्दर्य्यपि तपस्विनी गुरुं प्रतिकूलयमाना चामुण्डोपहारतामेव प्रतिपन्ना। अपिचैतयोः करणात् सलक्षायनेन बटुना असकृदधिक्षिप्ता मुखैः, अचिरनिहताभाच्च परिव्राजकानां संसदि महान्तं परिभावं प्रापिताः। तन्मयाऽप्यवश्यं गुरूणां प्रियकार्य्यमनुष्ठास्यते। श्रूयते च, शङ्करया प्रोत्साहितः पुण्यकीर्त्तिर्नातिचिरात् सुधाकराय कौमुदीं दास्यति,—इति। (स्मृत्वा) अद्य किल चतुर्दशी। तदुपस्थितः कार्य्यकालोऽस्माकम्।

(नेपथ्ये भीयते)।

ओसिअणिअमिअकज्जो जत्ताहुत्तो महेसरो सिरिमा।
पेच्छह सुहिओ लोआ परलोअं तरह वीअभया[१] ॥

कङ्का। (कर्णौ दत्त्वा) अये! इयं भगवतः खण्डपरशोर्यात्रा-

---

(१) अवसितनियमितकार्य्यो यात्राऽभिमुखो महेश्वरः श्रीमान्।
पश्यत सुधियो लोकाः परलोकं तरत वीतभयाः॥

Digitized by Google

प्रहलोकानां प्रावेशिकी ध्रुवा। (विचिन्त्य) अमुनावसरेण गुर्व्वादेशकारणेनात्मानं कृतार्थीकरिष्ये। (इति परिक्रामति। अग्रतोऽवलोक्य) कः पुनरस्मिन्नेवागच्छति? (पुनरवलोक्य अभिरूपकं नाटयन्ती) एष खलु दूरादनालक्ष्यव्यक्तिः। (विमृश्य सावज्ञम्) भवतु किमनेन, गुर्व्वादेशमिदानीमनुतिष्ठामि। (इति परिक्रम्यान्यतो निष्क्रान्ता)।

विष्कम्भकः।

(ततः प्रविशति सुधाकरः)।

सुधा। उपदिष्टोऽस्मि भगवत्या शाङ्करया; अद्य किल कस्याप्यमङ्गलस्याप्रतिहतैर्दुर्लक्षणैर्भवितव्यं तवया यापयितव्योदिवसः,—इति। (विचिन्त्य निःश्वस्य) पापः किल खण्डमुण्डो न मे कौमुदीलाभं सहते। (विभाव्य) अहो परसौभाग्यसन्तप्यमानानां पौरोभाग्यं दुर्ज्जनानाम्।

तथाहि,

रोदस्योरन्तरालं ज्वलयति तरणौ द्रष्टुमस्योज्ज्वलत्वं
नालं लेशादुलूकः घृतशदृव पुनर्दीर्य्यते चक्षुरस्य।
पीयूषप्रायमुच्चैर्मदयति हृदयं ज्योतिरिन्दोर्जनानां
तत्संपश्यन् मृगाङ्कोमणिरपि नितरां रोदिति प्राप्तदैन्यः॥

Digitized by Google

अथवा, स्निह्यति खलु शिष्यायेव मह्यं भगवती परिव्राजिका, सर्व्वथा सैव नः स्वस्ति करिष्यति। यतः,

मूर्त्तेदव पापराशिर्विजृम्भते तावदन्धकारोऽयम्।
यावन्नोदेति मुग्धा जगत्त्रयाऽऽलोकसर्व्वस्वम्॥

अपिच,

सौदामन्यां ज्वलन्त्यां न खलु परिभवत्यध्वगप्रातचक्षुः
कामं घोरान्धकारो जलधरपटलैरप्यकाण्डे प्रवृद्धः।
दूरादालोक्यते यः सकलजनगणैः सोऽपि वह्निर्न तावत्
ज्वालामालाऽवलीढः प्रतपति तपने ज्योतिराविष्करोति॥

(विचिन्त्य) कैव शक्तिः कापालिकापसदस्य भगवती-महिमानमतिशयितुम्। कुतः?

अत्युन्नतोऽपि मत्तद्वो भूयानपि बलाहकः।
महत्या जातु वात्याया वेगमत्येतुमक्षमः॥

तत् अलमस्य दुष्टकापालिकस्य कथया मनसः खेद-मुत्पाद्य। (अवलोक्य) कथमेते वयमुपत्यकां भूमिं सम्प्रा-प्ताः! चिन्ताऽऽकुलत्वात्तु मनसो न पुनरुपलक्षितम्। (निरूप्य) अहो रामणीयकमुपत्यकायाः।

तथाहि,

इतः कुब्जं गुञ्जद्विलसदलिपुञ्जं विकसितै-
रितोव्याप्तं मुक्ताफलवलयशोभैर्विटपिभिः।

Digitized by Google

इतः श्यामश्यामा सखकमलजालैरुपचिता
सखी तारात्रातैरिव रजनिरालक्ष्यतरुह ॥

(मेघगर्ज्जितं सूचयित्वा) एष स्तनयित्नुनिर्घोषः शिखोच्चय-विजृम्भितप्रतिशब्दमांसलो भूयसीं वृद्धिमुपगतः। (सस्मितम्) तदेतदुच्चैःशिरसां सन्निकर्षमाहात्म्यम्! (अग्रतोऽवलोक्य, सविस्मयम्) किन्नु खल्वेतत्? (विचिन्त्य) आं ज्ञातम्। मेघशब्दात् रत्नशलाकाः समुद्भिन्नाः। मन्ये च रत्नशलाकाच्छलेन,

एषा विदूरभूमिर्घनस्य शब्देन चाटुकारस्य ।
मधुरं रसमिच्छन्ती मुग्धा पुलकोद्गमं वहति ॥

(अन्यतोऽवलोक्य) रमणीयं खल्विदानीमवर्त्तते!

भूयः पक्वमरीचराजयदमे श्यामस्थलीसङ्गताः
लक्ष्यन्ते शुकचञ्चुमोदरुचः सान्द्रेन्द्रगोपाइव ।

(अपरतोदृष्ट्वा) विचमितोभ्रमराणां रचनाप्रकारः!

गन्धैरन्धतया विवेकविधुराः सर्पद्भिरुच्चैर्दिशो-
यातव्येषु जड़ा विमूढमनसो भ्राम्यन्ति भृङ्गाश्रमी ॥

(पुनरन्यतोऽवलोक्य) अयमितस्तपोवनाभोगः। तथा-च्च च,

नीवाराणां वलिभिरधिकप्रेक्षणीया स्थलीयं
स्तोकोन्नेया मलिनरुचयः पल्लवा होमधूमैः ।

Digitized by Google

स्नातैर्दृष्टगङ्गमुद्धुरमरालीकलभैः
सत्वैस्तत्त्वं मुनिभिरिव मन्यीक्ष्यते प्रत्यक्षेण ॥

अपिच ।

प्रत्यग्रवल्कलस्यन्दिकषायरसबिन्दुभिः ।
अलङ्कृता स्त्री भाति तारामिर्द्यौरिवाचिता ॥

(अनिच्छन्तमाकाशं रूपयित्वा) अहो पवित्रता तपोवनस्य ।

हव्यगन्धसुरभिभिः समीरणैः
केवलं न खलु मे कलेवरम् ॥
आन्तरोऽपि पुरुषोमलात्यया-
ज्जूनमेष लघिमानमश्नुते ॥

(परिक्रम्यावलोक्य) अयमारात्तुङ्गपर्व्वतः । यत्रः,

सत्वानां रचितोपचारविनयत्यक्तापसैरिष्यमाणो-
मुक्ताजालैरनल्पैर्वलयमणिमयैः कृत्रनेपथ्यशोभः ।
उच्चैर्मूर्द्धा समारो गुरुतरधरणीभारवोढ़ा विषोढ़ा
साक्षाद्ढ़ाक्रमानामवनिपतिरिव प्रोन्नतस्तेजसैव ॥

(निरूप्य) अहोदर्शनीयता इतः शिलोच्चयस्य ।

प्रांशुर्नैव्यक्तसन्धिर्मरकतरुचिरो निर्झरोद्गाररम्यः
कस्तूरीगन्धदेहो नृपतिरिव जनद्यौतवल्कोत्तरीयः ।
व्यालम्बालोलहारो वुधइव गगनं व्योमगङ्गाभ्युपेत
स्कन्धासक्तं मृणालं गजइव विपुलं विभ्रदध्वंलिहोऽयम् ॥

(इतिपरिक्रामति) अयं तुङ्गपर्व्वतः । यावदधिरोहामि ।

Digitized by Google

(इति गात्रेणाधिरोहति)। (अधस्तादवलोक्य) अन्यैवास्मात् स्थानात् प्रेक्षणीयता जीवलोकस्य।

क्वचं क्वापि विलीनमल्पमभवत् स्थूलं मुखस्यक्वलं
संप्राप्तं स्थिरतामतीव नितरामाधामवत् खर्व्वताम्।
प्रायोऽहन्त समस्तवस्तुविषया भिन्नेव जाता स्थिति-
र्लोकानामनवस्थतां स्फुटयति व्यक्तं महत्संश्रयः॥

(परिक्रम्यावलोक्य च) किं नु खल्वेतदल्पमपि परिमाणतः उपचीयमानमिव स्निग्धमधुरकमनीयेन रोचिषा वालइव कुमुदबन्धुरानन्दयति मे हृदयम्? (निरूप्य) अये मुद्रिकेयम्! (सवितर्कम्) कुतः पुनरस्मिन् तपस्विजननिवासयोग्ये प्रदेशे सम्भवोऽस्य नरपतिकुलान्वेषणीयस्य रत्नस्य? (विमृश्य) अथवा। देवभूमयः खल्वेवमादयः प्रदेशाः। तत्सर्व्वमुपपन्नम्। नूनमलौकिकेनानेन रत्नेन भवितव्यम्। (चिरं तूष्णीं स्थित्वा) भवतु, किमनेन। न खल्वनात्मीयं वस्तु अस्मद्विधैर्ग्रहणमर्हति। (इति प्रस्थितः)।

(नेपथ्ये)।

मनोरथानामुपपादयित्री
महातपःसिद्धिरिवाचिरेण।
प्रगृह्यतां मङ्गलमुद्रिकेय-
मुपस्थिता दैवबलादमोघा॥

Digitized by Google

सुधा। (आकर्ण्य) कः पुनरयमस्मृतमयेन वचसा बन्धुरिव मङ्गलमस्मदीयमभिलिप्सुर्मुद्राग्रहणाय मामनुशास्ति? (विभाव्य) नूनमनेन केनापि देवयोनिना भवितव्यम्। भवतु, गृह्णामि। (इति ग्रहणं नाटयति)। (दिशोऽवलोक्य) रमणीयः खल्वयं शैलः।

दरी विपुलितान्तरा जलदखण्डरुद्धा मुखे
वनेचरवधूजनः सहजचारुभावोज्वलः।
महौषधिमयी स्रवी प्रचुरकीचकानां रवः
सगैरिकमनःशिलाच्छुरितरम्बरान्तोपलः॥

यत्सत्यं हृतइवास्मि संवृत्तो महीध्रसुषमाभिः। तथाहि,

यदृच्छातश्चक्षुर्विनिपतति यत्रैव विषये
सएवाबध्नाति प्रथममिव दृष्टः पुनरपि।
अरक्ष्यं लोकोत्तरपिव पश्यन्न भवति
प्रकृत्या वस्तूनां प्रकृतिमधुराणां स्थितिरियम्॥

(इति परिक्रामति)।

(सवितर्कम्) कथमीदृशेऽपि रमणीये प्रदेशे उत्कण्ठाभूयिष्ठो ममान्तरात्मा नीहारनिमग्नइव चन्द्रमा न प्रसीदति? (इति चिन्तां नाटयति)।

(नेपथ्ये मौयते)।

रमणीयोऽप्युपचारो म्लपयति हृदयं वियोगविधुराणाम्।

Digitized by Google

वर्षति यावदमृतमिन्दौ स्रवति तावद्दिवाकरप्रभवा ॥

सुधा। (कर्णं दत्त्वा) अये किम्पुरुषाणामियं गीतिः। (विभाव्य) अवितथमेव गीतं तुरङ्गमुखैः। कौमुदीविरहएव मनोमे विधुरयति। (सविषादम्) अनुपक्रम्योऽयमातङ्कः। केवलं सैव वरोरुरच प्रभवति, सप्रतिबन्धश्चायमर्थः। सर्व्वथा धिग्भागधेयमस्माकम्। (निःश्वस्य) प्ररूढोऽप्ययमर्थो न पुनरभिव्यक्तः। तथाहि,

अधिचकार सुधांशुमुखी मनः
स्फुरति च सुनिशं हृदयान्तरे।
सुनिपुणैर्मतिमद्भिरगाद्यो
तड़ित्दिवैकरवैरनुमेयताम् ॥

(विचिन्त्य) अपूर्व्वः खलु प्रकारः प्रहरतो मकरकेतनस्य। यतः,

अस्त्रं धनुः पुष्पमयं गुणोऽपि
भृङ्गावली चारुसखोवयन्तः।
निमित्तमेणीनयनाभिरामा
रामाऽचिरात् प्राणभृतः शरव्यम् ॥

स्थाने खलु सर्व्वेषां धनुष्मतां प्रत्यादेशक्षमो भवदिमा मनोजन्मनः। यदसौ तर्ज्जितप्रलयकालकेतुविकट-

Digitized by Google

भ्रुकुटीकरालमुखस्य भगवतो धूर्ज्जटेर्ललाटलोचन-सम्भवज्वलनभस्मीकृतोऽपि,

मृदुलमृदुलपत्रः केवलं पुष्पधन्वा
सुरनरदनुजादिं जिघ्वहो पिष्टपेषु ।
युगपदकृतलक्ष्यः कामिलोकं क्षणेन
प्रतिहतपरिपन्थी पञ्चबाणः क्षिणोति ॥

(विमाय) अपिनामैवमप्युपतप्य कदाचिदमुनैवोपायेन सुखयेदस्मान् कुसुमायुधः ?

(सप्रत्याशम्)

मन्तप्यान्ते सुरूरपि विधिर्भूयसा मङ्गलेन
निःसन्दिग्धं सुखयति पुनः किन्तु कालेऽनुकूलः ।
दग्ध्वा ग्रीष्मे ज्वलनकणिकानिर्विशेषैर्मयूखैः
प्रावृष्यद्भिः प्रचुरमरुणोजीवलोकं क्षिणोति ॥

(परिक्रम्यावलोक्य) अये अन्तरा वनधारं लतामण्डपइव दृश्यते । (भूयः परिक्रम्य निरूप्य च) कथं सत्यमेव लतामण्डपः ! पल्लवभूयिष्ठानां विटपिनां निविड़तरैः सन्निवेशैरन्धकारितइवायं प्रदेशः । यावदुपसर्पामि । (इति परिक्रामति) ।

(ततः प्रविशति लतामण्डपमध्यगता लतापाशसंयमितकरचरणा मूर्च्छिता कौमुदी) ।

सुधा । (उपसृत्यावलोक्य साश्चर्यम्) अये नूनमियं विद्याधर-

Digitized by Google

दारिका सुखस्वप्नमनुभवति। (निरूप्य सविस्मयम्) कथमियं संयमितकरचरणा! अहह!

अज्ञानमालतीमालां निर्म्मलामोदनिर्भराम् ।
सन्तर्पणकरीमक्ष्णोरमुद्वात् कोनु दुर्म्मतिः ? ॥

(सवितर्कम्) अपिनाम असुरस्य निशाचरस्य वा कस्यचित् नैष्ठुर्य्यविलसितमेतत्स्यात् ? (विभाव्य) अथवा, कः सन्देहः ।

लालनीयां सहस्रांशोः करैरादरकोमलैः ।
कोऽन्यः कमलिनीं हन्यादृते मत्तमतङ्गजात् ॥

मोचयामि तावदेनाम्। असाम्प्रतं खल्वापन्नं जनमुपेक्ष्य गन्तुम्। (नाट्येन प्रविश्यावलोक्य ससम्भ्रमम्) कथमियं मर्च्छिता! यावदुपचरामि। (इति नाट्येन मोचयित्वा वीजनादिनोपचरति)। (सोत्सुकमात्मगतम्)

विद्याधराणां ध्रुवमन्ववाया-
दिदं मनोहारि बभूव रूपम् ।
स्निग्धं प्रभामण्डलमिन्दुबिम्बा-
दाप्यायनं न स्फुरतीतरस्मात् ॥

अपिच,

शैलादेव प्रगुणितजलाः सम्भवन्तीह नद्यो-
मुक्तारत्नं सरिदधिपतेस्ताम्रपर्णीसमेतात् ।
ओषध्योऽपि ज्वलितसुभगस्निग्धभासो हिमाद्रौ

Digitized by Google

कादम्बिन्यां लसति चपला व्योम्नि तारा: स्फुरन्ति ॥

(सखेदम्) महता खल्ववभवती मोहेन कवलिता । दूयं हि,

निष्यन्दसर्व्वकरणा वपुषा सुकुमारकान्तिना भाति ।
जीवन्त्यासात् पूर्व्वं नारायणसम्भवा वरोरुरिव ॥

(निरूप्य) अहो कष्टम्! कथं वेपते! न पुनरुपलक्षितं मया ।

पयोधरप्रकम्पोऽस्या नाधुनाऽप्युपशाम्यति ।
श्रान्तेऽप्यत्याहिते भाति लोकस्य भयवेपथुः ॥

अकथितमपि ज्ञायतएवाचभवत्या महदत्याहितम्। तथाहि,

न विद्यते यद्यपि चेतनाऽस्या-
स्तथापि गाढ़ो वपुषः प्रकम्पः ।
उपप्लवं सूचयति प्रकामं
साचादिवान्तर्वसतन्तसुर्व्वा: ॥

(विभाव्य) अहो सौकुमार्य्यम्!

दूयं पराभिषङ्गेन मथिताऽपि क्षणोदरी ।
म्लाना न लक्ष्यते दिव्या मालेवातपतापिता ॥

अपिच,

चिरं काचैरपिहितमिव ज्योतिषा राजिवन्धो-
रभ्याक्रान्तं सरसिजमिव ग्लानवक्त्रविम्बम् ।

Digitized by Google

अस्या रूपं हरति हि मनोलुब्धमप्युत्पलाक्ष्याः
कैवावस्था प्रकृतिमधुरं वस्तु नाखङ्करोति ॥

(इति वस्तूद्देशमीक्षते)। (समीक्ष्य सवितर्कम्) कथमियं दृष्टपूर्वेवाभाति। प्राकृतत्वात्तु प्रदेशस्य न पुनः सम्यगुपलक्षयामि। निरूपयामि तावत्। (निर्णयं विरूप्य) कथं कौमुदी! (इति मूर्च्छति)। (क्षणान्तरे संज्ञां लब्ध्वा) शिवशिवम्! नूनं तस्यैव कापालिकापसदस्य कौर्यमिदं विजृम्भते। (इति खेदमुपधरति)।

(कौमुदी प्रत्यागच्छति।

सुधा। (विलोक्य सहर्षमात्मगतम्) दिष्ट्या वर्द्धामहे!

धूमस्यान्ते शिखाऽग्नेरिव विमलतरा स्वैरमाविर्भवन्ती
मेघैरारिप्यमाना स्फुरदमलरुचिस्निग्धिकेव प्रसन्ना।
कुम्भोद्भूतोदयान्ते सरिदिव कलुषा प्राप्तकल्पा प्रसादं
मोहेनान्तर्वरोरुर्भुवमियमधुना मुच्यमानत्वमेति ॥

कथं घनान्धकारितायां रात्रौ शातह्रदमिव ज्योतिरस्मिन् गिरिकान्तारे वाङ्मनसयोराह्लादनं रत्नमुपलब्धम्!

(कौमुदी लब्धसंज्ञा त्रासं रूपयति)।

सुधा। महाभागे, समाश्वसिहि समाश्वसिहि।

अलं भिया भीरु! परो न विद्यते
पुरः स्थितो दासजनोऽयमस्ति ते।

Digitized by Google

ततः परित्यज्य पराभिषङ्गजं
भयं समुन्मीलय नेत्रपङ्कजम् ॥

कौमु। (कण्ठस्वरेण सुधाकरं प्रत्यभिज्ञाय सहर्षमात्मागतम्) अम्म! कधं सोएव्व महाभाओ, उवकिदं क्खु मे हदासाए। जं सव्वं मेहमालान्तरिओ वि दिणअरो पआसेइ लोअं। किं एत्थ करणिज्जं त्ति ण क्खु अहिगच्छामि। (विचिन्त्य) होदु एव्वं दाव। (उन्मील्य चक्षुषी) ण क्खु सम्मउवलक्खेमि, किणाउण आवण्णाणुकम्पिणा पिअंवदेण महाभाएणब्भुववण्णा म्हि[१]।

सुधा। महाभागे, ज्ञास्यसि। प्रकृतिं तावत्प्रतिपद्यस्व। बलवत् खलु परिचस्ताऽसि। तव हि,

मुक्तमपि प्रलयेन प्रकृतिं नापद्यते करणमेतत्।
झञ्झावात्याऽपाये तोयमिवोद्वेलितं नद्याः ॥

(कौमुदी तूष्णीमास्ते)।

सुधा। अपि प्रकृतिमापन्ना ते तनुः?

कौमु। आं अत्थि कश्चि विसेसो[२]।

---

(१) अम्म! कथं सत्यव महाभागः। उपकृतं खलु मे हताशया। यत् सत्वं मेघमालाऽन्तरितोऽपि दिनकरः प्रकाशयति लोकम्। किमत्र करणीयमिति न खल्वधिगच्छामि। भवत्वेवं तावत्। न खलु सम्यगुपलक्षयामि, केन पुनरापन्नानुकम्पिना प्रियंवदेन महाभागेनाभ्युपपन्नाऽस्मि?

(२) आं अस्ति कश्चिद्विशेषः।

Digitized by Google

(कौमुदी सस्पृहं सुधाकरमीक्षते)।

सुधा। (सहर्षमात्मगतम्) **हृदय, समाश्वसिहि। दृयं हि,**

कलुषाऽप्यभिषङ्गेण मया नूनं प्रसीदति।
तमसा परिपृक्ताऽपि शर्व्वरीवोदितेन्दुना॥

(प्रकाशम्) **कल्याणि, उत्तिष्ठ तावत्। क्लिश्यते खल्व-स्यामनास्तृतायां भूमौ शयानं कुसुमसुकुमारन्ते शरीरम्।**

कौमु। नाहं सक्का[१]।

सुधा। अलं विषादेन। नन्वयमेव दासजनस्ते परिजन-भूमौ वर्त्तते।

(इति कौमुदीं हस्ते गृहीत्वोत्थाप्य स्वर्गसुखं रूपयन् सहर्षमात्मगतम्)।

दृयमानन्दनिस्यन्दमकरन्दमयी तनुः।
निर्वृतं स्वर्गमात्रेण यस्या बाह्यमिवान्तरम्॥

कौमु। (प्रत्यभिज्ञां रूपयित्वा सज्ज्वं नाटयन्ती) **कधं उण महा-भाओ अमुं अगम्मं पदेशं आअदो? सागदं महाभाअस्स[२]?**

सुधा। स्वागतमिदानीं संवृत्तम्।

---

(१) नाहं शक्ता।

(२) कथं पुनर्महाभागोऽसुमगम्यं प्रदेशं आगतः? स्वागतं महाभागस्य?

Digitized by Google

विलोकनेनैव मुखाम्बुजस्य ते
कृतार्थमात्मानमवैत्ययं जनः।
चिराभिलाषैः किमुतोपचारकै-
रहोवतास्मत्सुकृतैर्विजृम्भितम्॥

कौमु। (सव्रीड़मात्मगतम्) **अमिअं क्खु दे वअणं।** (सस्मितम्) **अधआ, सुहाअरादो किं अवरं सुहाए**(१)**?**

सुधा। कथय, कोऽयमनार्य्यः, यस्त्वय्यपि कुसुमसुकुमारायां न दयते?

कौमु। पकिदित्था कहेस्सं(२)।

सुधा। तेन हि रमणीयतरं प्रदेशं गच्छावः। यच नातिचिरात् प्रकृतिं प्रतिपत्स्यसे। (इति हस्ते गृहीत्वा परिक्रामति)।

कौमु। (स्पर्शसुखं रूपयन्ती स्वगतम्) **हिअअ, किं दाणिं पि तम्मसि?** (प्रकाशम्) **महाभाअ, अलाहि परिस्समेण, सक्का क्खु अहं परिक्कमिदुं। ता मुंचदु मे पाणिं महाभाओ**(३)।

---

(१) अमृतं खलु ते वचनम्। अथवा, सुधाकरात् किमपरं सुधायाः?

(२) प्रकृतिस्था कथयिष्यामि।

(३) हृदय, किमिदानीमपि तान्यसि। महाभाग, अलं परिश्रमेण, शक्ता खल्वहं परिक्रमितुं, तन्मुञ्चतु मे पाणिं महाभागः।

Digitized by Google

सुधा। अयि भीरु, अलमलं प्रश्रयेण। निःसहाऽसि जाता। तदहमेव नयामि।

(सस्मितम्) अपिच,

यस्य पाणेर्ग्रहः सुभ्रु, चिन्तितोऽपि सुखावहः।
दैवाद्गृहीतएवाद्य स पाणिर्मुच्यतां कथम् ? ॥

(कौमुदी सहर्षव्रीड़ौत्सुक्यसाध्वसा अधोमुखी निर्व्वचना भवति)।

सुधा। (स्वगतम्) न खल्वनेन परिहासेन परिकुपिता तच्चभवती ? (प्रकाशम्) सुन्दरि,

यद्यनेनोपचारेण मन्यसे मद्व्यतिक्रमम्।
क्षम्यतां प्रथमोऽयन्तदपराधः क्षणोदरि ॥

(इति कौमुदीमीक्षते)।

कौमु। (स्मृतिमभिनीय सविषादम्) तुवरदु तुवरदु महाभाओ। पिअसही मे सुन्दरी अवि मह एव्व अवत्थां पाविआ, ण जाणामि कहिं चिट्ठदि जीअदि वा ण वा त्ति। जं सच्चं दरीअदि विअ मे हिअअं। विस्सरिअं आसि क्खु एदं मए मन्दभाइणीए। दाणिं महाभाअस्स वअणेण पडिबुद्धा म्हि[१]।

(१) त्वरतां त्वरतां महाभागः। प्रियसखी मे सुन्दर्यपि ममैवावस्थां प्रापिता। न जानामि कुत्र तिष्ठति जीवति वा न वेति, यत्सत्यं दीर्य्यते इव मे हृदयम्। विस्मृतमासीत् खल्वेतन्मया मन्दभागिन्या। इदानीं महाभागस्य वचनेन प्रतिबुद्धाऽस्मि।

Digitized by Google

सुधा। अलमात्मानं खेदयित्वा। हृदयं मे कथयति जीवत्यायुष्मती। तदचिरेणैव द्रक्ष्यसि प्रियवयस्याम्। न पुनरस्मिन् विघ्नसंकुले प्रदेशे त्वामुत्सृज्य गन्तुमुत्सहे। एहि निष्क्रम्यूहं प्रदेशं तावन्नच्छावः।

कौमु। यथा ते रोचते[१]।

(इति यथासम्भवं त्वरितं परिक्रामतः)।

सुधा। (खगतम्) नूनमियं हर्षविषादयोरन्तरा वर्त्तते। तथाहि,

विकसितमिव पद्मं ग्रैवलाश्लेषदिग्धं
घनलवपरिविद्धं पूर्णबिम्बं यथेन्दोः।
जलदपवनभिन्नो निर्मलो दर्पणो वा
मलिनमपि मृगाक्ष्या वक्त्रमेतत् प्रसन्नम्॥

अपिच,

स्नानकान्तिरपि वामलोचना
सप्रसादवदनैव लक्ष्यते।
श्यामलेव नलिनी प्रफुल्लिता
बालभानुकिरणा घनान्तरात्॥

(दृष्ट्वा) कथं रोदिति! हन्त, रोदनमपि प्रेक्षणीयमस्याः।

---

(१) यथा ते रोचते।

Digitized by Google

इयं हर्षविषादाभ्यां व्याप्ता युगपदङ्गना।
वर्षातपाभ्यां संभिन्ना पूर्व्वसन्ध्येव लक्ष्यते॥

भवत्यन्यतः सञ्चारयामि। (प्रकाशम्) सुन्दरि, पश्य पश्य, एष हरिणशिशुर्नष्टां मातरमन्विष्यन् कातरेण चक्षुषा दिशोऽवलोकयति। अयमितश्चिरपतत्री तिरस्कृतशिल्पकौशलो निसर्गधारुतया नयनमनोहरः कलेन ध्वनिना त्वां सम्भावयति। अयञ्च निर्झरोद्गारः क्षणमात्रोपलब्धैर्मुक्तापलस्थूलैस्तुषारजालैर्भूधरमलङ्करोति। (परिक्रम्य) हुतस्तावत् प्रेक्षस्व,

विटपिनमसुं लतेयं कोमलकिसलयकरेण परिरभ्य।
नयनमनांसि स्थाने बध्नाति मनस्विनां भूयः॥

(कौमुदी सव्रीड़ाऽधोमुखी भवति)।

सुधा। (स्वगतम्) एवमियमतिव्रीड़ाकातरा। कथमिमामाश्वासयामि?

कौमु। (परिक्रम्य गमनबाधां रूपयन्ती) हद्धी हद्धी, कधं कुसहूईकण्टइदा दुअं उग्घादिनी भूमीआ, पलिक्खदा मे चलणा[१]।

सुधा। कोमलाङ्गि, एवं यदात्थ। निःसहाऽसि जाता।

---

(१) हा धिक् हा धिक्! कथं कुशसूचीकण्टकितेयमुद्घातिनी भूमिः, परिक्षतौ मे चरणौ।

Digitized by Google

न खलु शक्ता त्वं परिक्रमितुम् । यद्यनुमन्यसे, अहमेव त्वामभिमतं देशं प्रापयामि । महत् खलु भोगसाधनं विशेषतस्तु सकललोकलोचनमधु तवेदं शरीरं सर्व्वथैव रक्षणीयम् ।

(कौमुदी सव्रीड़ाऽधोमुखी तिष्ठति) ।

सुधा । मुग्धे, अलमन्यथा सम्भाव्य । याच्यमानानां रुचयः खल्वनुरुध्यन्ते प्रणयिभिः ।

कौमु । ण क्खु ण क्खु माणणिज्जेसुं जणेसुं अप्पाणं अवराहिणं करिस्सं[१] ।

सुधा । नास्त्यनेनापराधः ।

कौमु । किणा उण ?[२]

सुधा । मृणालसुकुमारमिदमङ्गमायास्य अस्मन्मनसः खेदोत्पादनेन ।

कौमु । (सव्रीड़म्) णं माणणिज्जो भवा[३] ।

सुधा । सुन्दरि, यद्येवं, माननीयानां रुचयो न प्रति हन्तव्याः ।

कौमु । णत्थि मे अदो परं वाआविहवो[४] ।

---

(१) न खलु न खलु माननीयेषु जनेष्वात्मानमपराधिनं करिष्यामि ।

(२) केन पुनः ?

(३) ननु माननीयो भवान् ।

(४) नास्ति मे अतः परं वाग्विभवः ।

Digitized by Google

(इति पदप्रहारव्याजं नाटयन्ती तूष्णीमधोमुखी तिष्ठति)।

सुधा । अलमाशङ्कया । न खलु सुधाकरोऽलीकं मन्त्रयितुं जानाति ।

(कौमुदी तथैवास्ते । सुधाकरो कौमुदीमङ्कमारोपयति । कौमुदी बाहुभ्यां सुधाकरं कण्ठे समालिङ्ग्य तदीयवक्त्रसि सुखमधोमुखं संस्थाप्य सवेपथुर्निमीलितात्ती स्पर्शसुखमनुभवति ।

सुधा । (परिक्रामन् स्पर्शसुखं रूपयित्वा स्वगतम्) **अहो स्पर्शः !**

अस्याः सुकुमारतरं स्पर्शं संचिन्त्य लज्जयाऽऽच्छन्नम् ।
स्पृष्टं कथमपि लोकैर्म्लायति कुसुमं शिरीषस्य ॥

(सविस्मयम्) **कथं नु मानुषीणामीदृशः सुकुमारतरः सन्तर्पणकरश्च स्पर्शः ! नूनमियम्,**

पुण्यान्मध्यमलोकस्य द्युलोकस्य तपःक्षयात् ।
चन्द्रबिम्बाद्भुवं प्राप्ता मूर्त्ताऽमृतपरम्परा ॥

अविमृष्यकारीव मे स्मरहरः प्रतिभाति । तथाहि,

हरेण कोपज्वलनेन पूर्वं
दग्धो मकरध्वजोऽभूत् ।
समस्तलोकस्य परं न यूनां
हरत्यकाण्डे यदियं मनांसि ॥

(परिक्रम्य कौमुदी मङ्कादवरोप्य, प्रकाशम्) **सुन्दरि, इदं शिलातलमध्यास्य प्रस्खलनपरागभरितमाचान्तनिर्झरोद्गार-**

Digitized by Google

माकम्पितलतापल्लवमनिलं सेवमाना श्रममपनयतु भवती। क्षमः खल्वेष तवानतिपृथुलमुक्ताजाल-श्रियमुद्वहन्तं श्रमोदकबिन्दुस्तोमं सुखयन्नपनेतुम्।

कौमु। (उपविश्य सलज्जम्) महाभाअ, उक्कंठदि मे हि-अअं सहीदंसणस्स। इच्छामि महाभाअस्स प्पसा-आदो उणो वि से दंसणसुहमणुहोदुं[१]।

सुधा। नैतत् पुनर्वक्तव्यम्।

कौमु। (साग्रहम्) तेण हि तुवरदु महाभाओ। विलं-वासहं मे हिअअं[२]।

सुधा। एष गच्छामि (इति चिन्तां नाटयति)!

कौमु। किं विलंवीयदि?[३]।

सुधा। सुन्दरि, न विलम्बते। एतत्तु विचार्यते, अस-हाया खल्विदानीमसि, मा तावत् कोऽप्यनार्यः किमप्यत्याहितमाचरेत्।

कौमु। (सविषादम्) महाभाअ, ण सक्कणोमि सहीवि-

---

(१) महाभाग, उत्कण्ठते मे हृदयं सखीदर्शनाय। इच्छामि महा-भागस्य प्रसादात् पुनरपि तस्या दर्शनसुखमनुभवितुम्।

(२) तेन हि त्वरतां महाभागः। विलम्बासहं मे हृदयम्।

(३) किं विलम्बते?

ओअवाउला अप्पाणं पज्जवत्थावेदु[1]। (इति त्वरितमिति)। सुधा। मा क्खादा मम। इयमम्हाणुघी मुद्दा त्वां रक्खिस्सदि। (इति सहसोत्थाय कौमुदीहस्ते निमीलयितुं प्रवृत्तः। कौमुदी निमीलिताक्षी स्वयंसुखमुद्धा तिष्ठति। सुधाकरोऽयथासन्निवेशं रूपयन् चिरेण सन्निवेश्य)

महाभागे, मन्दैवतास्त्वां रक्षन्तु। अयमदूरे तपोवनाभोगः। नास्त्यत्र क्रूरसत्त्वानां सञ्चारः। सावधाना भवत मुहूर्तं तिष्ठ। (इति प्रस्थितः)।

कौमु। (स्वगतम्)।

कट्ठं तीसे विरहो दूमइ विसमं ततोवि दइअस्स।
दोहिं किट्ठं हिअअं एदं विउलं समाउलं होइ[2]॥

(प्रकाशं सव्रीडम्) ण क्खु चिरेअव्वं महाभाएण[3]।

सुधा। अयि मुग्धे, एतदपि वक्तव्यम्! अयमहमागतएव। (इति परिक्रामति)।

कौमु। (निःश्वस्यात्मगतम्) सणेहो णाम क्खु दुसो पिह-

---

(१) महाभाग, न शक्नोमि सखीवियोगव्याकुला आत्मानं पर्यवस्थापयितुम्।

(२) कष्टं तस्याविरहो दुनोति विषमं ततोऽपि दयितस्य।
द्वाभ्यां कृष्टं हृदयं एतत् विपुलं समाकुलं भवति॥

(३) न खलु चिरयितव्यं महाभागेन।

Digitized by Google

णिज्जो कट्ठप्पआरो । इदो पिअसहीए विरहो, इदो पाणाहिंतोवि पिअअरस्स जीइदसव्वस्सस्स पणइअणस्स विच्छेदो । जं सच्चं ण मे धिदिं आवद्धादु चेओ[१] ।

(संस्कृतमाश्रित्य)

समाघूर्णति चेतो मे स्नेहयोगात् द्वयोरपि ।
विरुद्धदिक्कयोर्वाह्योः सन्निपातादिवाल्पकम् ॥

सुधा । (आकर्ण्य स्वगतम्) वत्तु,—इति वाक्यशेषः । (सहर्षम्) श्रुतं यत् श्रोतव्यं, शक्यं खल्विदानीं जीवितमवलम्बितुम् । कुतः ?

द्वयमतिमधुराभिर्वाग्भिरन्तर्गतं यत्
स्फुटयति खलु बाला भावमव्याजरम्यम् ।
न खलु न खलु सैषा केवलं प्रार्थनीया
वयमपि भृशमस्याः प्रार्थनीयत्वमाप्ताः ॥

अपिच,

विरहक्लेशो भूयानपि सह्यो जलधरस्य चपलायाः ।
यदियमनन्यासक्ता निवद्धभावा सदैवाच ॥

(परिक्रम्याग्रतोऽवलोक्य सहर्षम्) लब्धोमया प्रियाऽऽराधनो-

---

(१) स्नेहोनाम खल्वयं स्पृहणीयः कष्टप्रकारः । इतः प्रियसखा विरहः, इतः प्राणेभ्योपि प्रियतरस्य जीवितसर्व्वस्वस्य प्रणयिजनस्य विच्छेदः ! यत् सत्यं न मे धृतिमावध्नाति चेतः ।

Digitized by Google

पचारः । एषा खलु सुन्दरी संयमितकरयुगला शोक-व्याकुला ससाध्वसमितस्ततोऽवलोकयन्ती इतएवागच्छति । लताप्रतानान्तरिताः पश्यामस्तावदस्याश्चेष्टितम् । (इत्येकान्ते स्थिताः) ।

(ततः प्रविशति यथोक्तव्यापरा सुन्दरी) ।

सुन्द । (सोद्वेगम्) हला कोमइ, कहिं सि देहि मे पडिवअणं[१] । (इति रोदिति) ।

सुधा । नूनमस्याः सखीस्नेहोमीयते नान्तरात्मनि ।
इतीवाश्रुच्छलेनोर्ध्वैर्बहिरावयत्यपि ॥

सुन्द । इदो होज्जउ इदु वा होज्जउ[२] । (इति ससाध्वसा लताकुड्मलानि विचिनोति ।

सुधा । आन्दोलिते किसलये मरुता किलैषा
सञ्चारमेणनयना मनुते परस्य ।
ये शान्तये खलु हिता रुचिराः पदार्थाः
शङ्काऽऽकुले मनसि ते प्रथयन्ति शङ्काम् ॥

यत्सत्यं विपरीते चेतसि सर्व्वमेव विपरीतायते । तथाहि,

इयं तीव्रां बाधामिह परिगता मुग्धहृदया
ध्रुवं भ्रान्तिस्थानं गणयति महासाध्वसपदम् ।

---

(१) अयि कौमुदि, क्वासि देहि मे प्रतिवचनम् ।

(२) इतो भवेत् इह वा भवेत् ।

Digitized by Google

अन्यो [illegible]

परं मोक्षो [illegible] प्रबन्धनस्य [illegible]

सुन्द्र। (विषादम्) कधं ण कहिं पि। किं दाणिं कुणामि मन्दभाइणी। (बन्धनकार्यं कुर्वन्ती) आः कधं करबन्धणम्मि पीडेइ। चलणबन्धणं दाव सिढिलं आसि। अप्पेण आआसेण तं तुडिअं। दूणमो उण दढअरं हत्थबन्धणं कधं ओणेमि? होदु उणोवि जदस्सं[१]। (इति हस्तौ धुनोति)।

सुधा। दृढं खलु बद्धमचभवत्याः करद्वयम्। अभूतां खलु,

अस्याः संयमनस्थानाद्गौरवादिनतभ्रुवः।
किञ्चिदालोहितस्फीतौ हस्तौ कोपादिवाभितः॥

सुन्द्र। (सविषादम्) कधं ण तुट्टइ। (विचिन्त्य) किं अदो परं मन्दभाइणीए जीइदेण। (साक्षम्) हला पिअसहि कोमइ, ण उण आणामि जीअसि वा ण वा त्ति! मन्दभाइणीए मह एसो पच्छिमो दे माणसो परी-

---

(१) कधं न कुत्रापि। किमिदानीं करोमि मन्दभागिनी। आः कधं करबन्धनमपि पीडयति। चरणबन्धनं तावत् शिथिलमासीत्। अल्पेनायासेन तत् त्रुटितं। इदं पुनर्दृढतरं हस्तबन्धनं कथमपनयामि। भवतु पुनरपि यतिष्ये।

Digitized by Google

णमो। (अग्रतो विलुप्य सकातरम्)। अज्ज सुहाअर, ण पारिअं मए अप्पपुण्णाए तुम्हाणं समागमं पेक्खिदुं। सुमरिहिसि मं। णमो दे। (इति प्रणमति। कामावस्थामभिनयति) णाह सालङ्कायण, णत्थि मे तं पुण्णं, जेण कमलतंबे दे चलणे सुस्सूसिअ अप्पाणं णिव्वुदं करामि। परवदी क्खु म्हि ण ममाइ पुरोभाइणीए मधुरं आलविओ वि भवं। हिअअं दाव आअत्तं अजोग्गम्पि दे एव्व दिण्णं, ण जानामि तुमए गहिअं ण वा त्ति। अधआ। किं इमिणा विआरिदेण? एत्तिअमत्तेण क्खु णिव्वुदा म्हि संवुत्ता। ण उण अप्पपुण्णा अदो परं कामेउं पारेदु[१]। (इति आकुला रोदिति)।

---

(१) कथं न म्रियति। किमतः परं मन्दभागिन्या जीवितेन। अयि प्रियसखि कौमुदि, न पुनर्जानामि जीवसि वा न वेति। मन्दभागिन्याः मम एष परिश्रमस्ते मानसः परीरम्भः। आर्य्य सुधाकर, न पारितं मया अल्पपुण्यया युवयोः समागमं प्रेक्षितुं। स्मरिष्यसि मां। नमस्ते। नाथ सालङ्कायन, नास्ति मे तत्पुण्यं येन कमलताभ्यौ ते चरणौ शुश्रूषित्वा आत्मानं कृतार्थं करोमि। परवती खल्वस्मि। न मया पुरोभागिन्या मधुरमालपितोऽपि भवान्। हृदयं तावदायत्तं अयोग्यमपि तुभ्यमेव दत्तं, न जाने त्वया गृहीतं न वेति। अथवा। किमनेन विचारितेन? एतावन्मात्रेण खलु निर्वृताऽस्मि संवृत्ता। न पुनरल्पपुण्या अतः परं कामयितुं पारयति।

Digitized by Google

सुधा। (सहर्षम्)। कथं प्रियवयस्यमनुरक्ता तवभवती!

सुन्द। (निःश्वस्य) दाणिं अहिचआदो अप्पाणं पाडेउण वावादेस्सं[१]। (इति परिक्रामति)।

सुधा। महानाधिः खल्ववभवत्याः। तन्न युक्तमतः परं विलम्बितुम्।

(परिक्रम्य सुन्दर्याः सम्मुखे स्थित्वा) आर्य्ये, अलमलमनेन दुर्व्यवसायेन, जीवति ते प्रियसखी। (इति हस्तबन्धनं मोचयति)।

सुन्द। (सव्रीड़मात्मगतम्) हद्धी हद्धी! सव्वं मह वअणं सुणिअं महाभाएण। (प्रकाशं साग्रहम्) अज्ज, वन्दामि। अवि कुसलं पिअसहीए[२]?

सुधा। सर्व्वं कुशलम्।

सुन्द। अध सा कहिं चिट्ठदि[३]?

सुधा। एहि तावत्। स्वयमेव द्रक्ष्यसि। त्वरतां भवती। पर्य्युत्सुका खलु सा कथं कथमपि त्वद्विरहकातरमात्मानं धारयति।

---

(१) इदानीमधित्यकातआत्मानं पातयित्वा व्यापादयिष्ये।

(२) हाधिक् हाधिक्! सव्वं मम वचनं श्रुतं महाभागेन। आर्य्य, वन्दे अपि कुशलं प्रियसख्याः?

(३) अथ सा कुत्र तिष्ठति?

Digitized by Google

सुन्द। वत्सला क्खु मे पिअसही[१]।

सुधा। इदानीं त्वद्गतजीविते ति भण।

सुन्द। (सस्मितम्) णं भणामि दाणिं तग्गदजीइदा मे पिअसही त्ति[२]।

सुधा। (सस्मितम्) अलं परिहासेन। त्वद्विरहेणातिमात्रमुत्कण्ठिता ते सखी।

सुन्द। (सस्मितम्) आसि क्खु एव्वं[३]।

सुधा। अथेदानीम्?

सुन्द। अण्णसंकन्तो से णेहो[४]।

सुधा। किं कारणम्?

सुन्द। ण क्खु अप्पणो पभवदु[५]।

सुधा। कस्य हेतोः?

सुन्द। परअसो क्खु एसो[६]।

सुधा। कः पुनरसौ परः?

---

(१) वत्सला खलु मह्यं प्रियसखी।

(२) ननु भणामि इदानीं त्वद्गतजीविता मे प्रियसखीति।

(३) आसीत् खल्वेवम्।

(४) अन्यसंक्रान्तस्तस्याः स्नेहः।

(५) न खल्वात्मनः प्रभवति।

(६) परवशः खल्वेषः।

Digitized by Google

सुन्द । सो दाणिं अप्पा । अम्हे दाणिं परा संवुत्ता[१] ।

सुधा । भवतु, कोऽसौ ?

सुन्द । कोवि अज्जाबुओ अणज्जो[२] ।

सुधा । अपि ज्ञायते नामधेयतः ?

सुन्द । को तस्स अणज्जस्स णामग्गहणेण अप्पाणं अवराहिणं करिहिदु[३] । (इति ज्ञातदुःखं नाटयति) ।

सुधा । (सविषादमात्मागतम्) मूढसा गृहीतार्थः पुनरपि महता संशयेन विहस्तितोऽस्मि ।

तस्मात्तादृशमुग्धभावमधुराश्चेष्टाः समाकर्णय-
आलिख्येयमनल्पगूढवचसा मथ्नाति कोलाहलम् ।
वस्तुन्यत्र किमस्ति वास्तवमिति भ्रान्तेर्विजृम्भं
नो गच्छामि विवेकमन्यरमहो सत्यं सदः कामिनाम् ॥

न जाने कमधन्यं धन्यं वा एषा कथयिष्यति । (प्रकाशम्) कथय कथय, न खल्वर्हसि प्रथममस्मत्प्रणयमुपरोद्धुम् ।

सुन्द । (स्मितम्) का गई । एसा कहेमि[४] ।

---

(१) स इदानीमात्मा । वयमिदानीं पराः संवृत्ताः ।

(२) कोऽप्यार्यब्रुवोऽनार्यः ।

(३) कस्तस्यानार्यस्य नामग्रहणेनात्मानमपराधिनं करिष्यति ।

(४) का गतिः । एषा कथयामि ।

Digitized by Google

सुधा । अवहितोऽस्मि ।

सुन्द । णं सुहासरो[१] ।

सुधा । (सहर्षमात्मगतम्) प्रत्युज्जीवितोऽस्मि । (सवितर्कम्) न खल्वहं प्रत्यभिज्ञातस्तत्त्वभवत्या, अथवा परिहासोऽयम्? (विमृश्य) असंशयं परिहासोऽयम् । कुतः ?

अमलिनसुखपद्मा भाषते मां मृगाक्षी
कृतकमिव विषादं सस्मिताक्षी करोति ।
अवितथमनयाऽहं प्रत्यभिज्ञातएव
न खलु परसमक्षं लभ्यते गोपतत्त्वम् ॥

भवतु एवं तावत्। (प्रकाशम्) का पुनरनार्य्यता सुधाकरेणानुष्ठिता ?

सुन्द । किं अणं । तेण क्खु पिअसहीए हिअअं ओहोरिअं ण उण अब्भुववण्णो एसो[२] ।

सुधा । (सस्मितम्) एतत् कृतं तेन ?

सुन्द । वाढं एदं किदं तेण[३] ।

सुधा । न खल्वेतावन्मात्रेणानार्य्यः सुधाकरः ?

सुन्द । अधइं[४] ।

---

(१) ननु सुधाकरः ।

(२) किमन्यत् । तेन खलु प्रियसख्या हृदयमपहृतं न पुनरभ्युपपन्नैषा ।

(३) वाढमेतत् कृतं तेन ।

(४) अथकिं ।

Digitized by Google

सुधा । न खल्वच सुधाकरोऽपराध्यति ।

सुन्द । को उण[१] ?

सुधा । कौमुदीवयस्या सुन्दरी नाम ।

सुन्द । (सवैलक्ष्यम्) कधं विअ[२] ?

सुधा । तया खलु सुधाकरवयस्यस्य हृदयमपहृतम् । श्रुतं भवत्या ?

सुन्द । (कथमपि वचनं व्यवस्थाप्य सव्रीडम्) सुणिअं । कधं एत्तिअ मत्तेण सुहाअरो ण अवरज्झइ[३] ?

सुधा । यया किल सुधाकरवयस्यस्य हृदयमपहृतं, तदयस्याया हृदयमपहरन्नपि सुधाकरः कथमपराध्यतु ।

सुन्द । (सस्मितम्) तं एदं वुड्ढभूदजोणिवुत्तन्तं अणुहरइ[४] ।

सुधा । स पुनः कीदृशः ?

सुन्द । सुणादु महाभाओ । दोण्णं भाअराणं अवरओ अदि व्व पचण्डो किणावि भूदजोणिणा

---

(१) कः पुनः ?

(२) कथमिव ?

(३) श्रुतं । कथमेतावन्मात्रेण सुधाकरोनापराध्यति ?

(४) तदेतद्वृद्धभूतयोनिवृत्तान्तमनुहरति ।

Digitized by Google

अज्जुसिअस्स कस्सचि भूदाआसरुक्खस्स मूले णिअं अमेज्झं णिक्खिवदूस्स। तेण एव्वं उव्वेइओ सो भूदजोणी वुड्ढं तास पिअरं सिविणे कहेईअ; अवअरओ दे पुत्तो मं उव्वेएइ, ण क्खु इमस्स पारेमि, ता अइ तं ण णिआरेसि, तइ पढमअं दे पुत्तं चरक्खिस्सं। सक्को क्खु एसो विणअ-णम्मो त्ति[1]।

सुधा। (सस्मितम्) किं क्रियताम्। यः खल्वपकारिणं न पारयति, स तत्पक्षस्याप्यपकृत्य वैरबुद्धिं करोति। अर्करश्मिसन्तप्तो मतङ्गजस्तत्पक्षं कमलाकरमा-लोड़यन्नेव प्रथमं निदर्शनम्।

सुन्द। (विहस्य) सुट्ठु क्खु सुपुरिसवुत्तं अणुट्ठिदं भवदा[2]।

सुधा (सस्मितम्) भवत्याऽपि सुमन्त्रिलापदत्तम्।

सुन्द। (सव्रीड़म्) ण क्खु परिकुविदो भवं[3]?

---

(१) शृणोतु महाभागः। द्वयोर्भ्रात्रोरवरजोऽतीव प्रचण्डः केनापि भूतयोनिनाऽध्युषितस्य कस्यचिद्भूतावासवृक्षस्य मूले निजं अमेध्यं निक्षिपति स्म। तेनैवमुद्वेजितः स भूतयोनिर्दृढं तस्य पितरं स्वप्नेऽकथयत्;—अवरजस्ते पुत्रो मामुद्वेजयति, न खल्वस्य पारयामि, तत् यदि तं न निवारयसि तदा प्रथमजन्ते पुत्रं भक्षयामि, शृणुष्व खल्वेव विनय-नम्र इति।

(२) सुष्ठु खलु सुपुरुषवृत्तमनुष्ठितं भवता।

(३) न खलु परिकुपितो भवान्?

Digitized by Google

सुधा। किमभिमितं कुप्यते।

सुन्द। अणुग्गहीदम्हि। वअस्सअणक्खिलेसं पेक्खिअ चवलाए मए क्खु एव्वं कीलिअं। ता क्खमदु मं भवम्[१]।

सुधा। समानमचापयोर्निमित्तम्। तद्व नैकरूपेण क्षमापनीयः। तद्देहि एकाकिनी किल ते सखी तिष्ठति। (इति परिक्रामतः)।

सुन्द। कहिं मे पिअसही चिट्ठदि? तुवरदु मे हिअअं तीसे दंसणस्स[२]।

सुधा। अद्य युवयोः समविभागः प्रणयः। सखि, किं बहुना,

त्वां विना ते प्रियसखी नलिनीव दिनश्रियम्।
परिम्लानाम्बुजमुखी तदुल्लासय सेव ताम्॥

सुन्द। कधं उण अब्भुववण्णा पिअसही भवदा[३]?

सुधा। यदृच्छयाऽद्य विचरतैकस्मिन् दुर्गमप्रदेशे लता-

---

(१) अनुगृहीताऽस्मि। वयस्यजनस्नेहं प्रेक्ष्य चपलया मया खल्वेवं क्रीडितं। तत् क्षमतां मां भवान्।

(२) कुत्र मे प्रियसखी तिष्ठति? त्वरते मे हृदयं तस्या दर्शनाय।

(३) कथं पुनरभ्युपपन्ना प्रियसखी भवता?

Digitized by Google

मण्डपान्तः संयमितकरधरणा मूर्च्छिता सा सखी मयोपलब्धा ।

सुन्द । (सोद्वेगम्) तदो तदो[१] ?

सुधा । ततोऽहमुन्मुच्य बन्धनानि प्रत्यागतचेतनां विधाय तामिह संरक्ष्य भवद्न्वेषणाय प्रवृत्तः । इति कौमुदीमङ्कुल्या दर्शयति) ।

सुन्द । (सत्वरमुपसृत्य) इला पिअसहि, दिट्ठा सि तुमं मन्दभाइणीए[२] ! (इत्यभूमिं मुञ्चति) ।

कौमु । (उत्थाय सावष्टम्भम्) इला जीअसि ? गाढं परिस्सजसु मं[३] ।

(अन्योन्यं परिष्वजेते) ।

सुधा । (स्वगतम्) अहो मधुरोऽनयोर्भावः । युज्यते खल्वेतत् ।

अव्याजमधुरं प्रेम मुग्धानामेव योषिताम् ।
कठोरनीतिनिष्ठानां नराणां क्वचिदं हि तत् ॥

स्त्रीपुंसयोस्तु प्रणयो नानेनोपमेयः । यतः,

दयितासु वल्लभानां प्रायेण भवत्युपाधिजः प्रेमा ।
निरुपाधिप्रेमाणो दिष्ट्या यदि जगति विजयन्ते ॥

---

(१) ततस्ततः ?

(२) अयि प्रियसखि, दृष्टाऽसि पुनर्मन्दभागिन्या !

(३) अयि, जीवसि ? गाढं परिष्वजस्व माम् ।

Digitized by Google

तथापि स्त्रियएवोपालम्भार्हाः। कुतः?

निर्व्याजप्रियतानां स्त्रीणां लोकः कथं भवेदृणः।
याः खलु जहति प्राणान् परेतमपि दयितमालिङ्ग्य॥

(प्रकाशम्) बलवत् खलु परिश्रान्ता तवभवती। इदं स्फटिकशिलातलमध्यास्य विश्राम्यतां भवत्यौ।

(उभे तथा कुरुतः)।

सुन्द। णं भवा वि सिलाअलेक्कदेसमलङ्करेदु[१]।

(कौमुदी किञ्चिदपसृत्य छद्मकोपा सुन्दरीमवलोकयति। सुधाकरः शिलातलैकदेशे उपविशति)।

सुधा। कः पुनरनार्य्यो भवत्योः क्लेशमूलम्?

सुन्द। णाहं सक्का। पिअसही कहेदु[२]।

कौमु। (स्वगतम्) का गई। (प्रकाशम्) सुणादु महाभाओ। अज्ज किल चउद्दही त्ति भअवदो सूलवाणिस्स जत्तामहुस्सवदंसणत्थं अम्हे गदाओ[३]।

सुधा। ततस्ततः?

कौमु। तदो महुस्सवं पेक्खिअ जाव पडिणिवुत्ताओ अम्हे दाव भअङ्करवेसाए काइणा वि इहाणेइम्ह

---

(१) ननु भवानपि शिलातलैकदेशमलङ्करोतु।

(२) नाहं शक्ता। प्रियसखी कथयतु।

(३) का गतिः। शृणोतु महाभागः। अद्य किल चतुर्दशीति भगवतः शूलपाणेर्यात्रामहोत्सवदर्शनार्थमावां गते।

Digitized by Google

संजमिदाओ । एत्तिअमत्तं अहं जाणामि । तदो महाभाएण अब्भुववण्णा म्हि(१) ।

सुधा । नूनं तस्यैव कापालिकापसदस्य दुश्चेष्टितमेतत् । याऽपि वामिहानीतवती, साऽपि तस्यैव शिष्या कङ्कालमालिनीति तर्कयामि ।

सुन्द । उवज्झाओ तक्को अज्जस्स । एव्वं क्खु इदासाए भणिअं । खद्धं मए गुव्वाराहणोवअरणं, इमिणा क्खु उवअरणेण चामुण्डामाराहअ सिद्धमन्ता होहिन्ति गुरुओ त्ति(२) ।

सुधा । कस्य पुनरपरस्यैतादृशं नैष्ठुर्यम् ।

कौमु (सविषादम्) उक्कंठइ मे हिअअं पिअराणं चलणे वन्दिउं । एत्तिअकालं मं अपेक्खन्ता वाउला क्खु पिअरा त्ति सम्भावेमि(३) ।

---

(१) ततोमहोत्सवं प्रेक्ष्य यावत् प्रतिनिवृत्ते आवां, तावद्भयङ्करवेषया कयाऽपि इहानीय संयमिते । इतावन्मात्रमहं जानामि । ततो-महाभागेनाभ्युपपन्नाऽस्मि ।

(२) उपपन्नस्तर्कआर्यस्य । एवं खलु इतार्यया भणितं । यन्मया गुर्वा-राधनोपकरणम् । अनेन खलूपकरणेन चामुण्डामाराध्य सिद्धमन्ता-भविष्यन्ति गुरवः—इति ।

(३) उत्कण्ठते मे हृदयं पितोश्चरणान् वन्दितुं । एतावत्कालं मामपश्य-न्तौ व्याकुलौ खलु पितराविति संभावयामि ।

Digitized by Google

सुधा। युज्यते।

(कौमुदी सुन्दरीमुखमवलोकयति)।

सुन्द। इच्छदि पिअसही महाभाएण घरं पाविदा पिअरे वन्देउं[१]।

सुधा। नैतदङ्गीकर्त्तव्यम्।

सुन्द। जज्जइ क्खु एसा महाभाअं आआसेउं[२]।

कौमु। (स्वगतम्) साहु सुन्दरि, साहु, मइ ज्जेव हिअएण मन्तिदवदीसि[३]।

सुधा। मा मैवम्। विधेयोऽस्मि वां। (प्रकाशम्) न खलु मामुदासीनमवगच्छति ते सखी?

सुन्द। (प्रकाशम्) किं अणं ओअच्छदु। को उण अम्हो मिलाणकमलिणीसरिसम्पि उवेक्खइस्सदु[४]।

(कौमुदी सुन्दरीमङ्कुश्या तर्जयति)।

सुधा। तर्हि अयुक्तमुदासीनस्याप्यावस्थानम्।

(इत्युत्तिष्ठति)।

कौमु। (जनान्तिकम्) इदासे, पसादेहि दाव महाभाअं।

---

(१) इच्छति प्रियसखी महाभागेन मया प्रापिता पितरौ वन्दितुम्।

(२) युज्यते खल्वेषा महाभागमायासयितुम्।

(३) साधु सुन्दरि, साधु, मयैव हृदयेन मन्त्रितवतासि।

(४) किमन्यदवगच्छतु। क इतरस्योल्लासकमलिनीसदृशीमप्युपेक्षते।

Digitized by Google

मा उणोवि से इदासाए करअलवत्तिणी होहि[१]।

सुन्द। (विहस्य) इला एत्तिअं णिमित्तं पसाअणस्स[२]?

कौमु। (सास्रयम्) एक्कसीए अवत्थाए वि कीलसि[३]।

सुन्द। (सकोपमिव) ण कीलिस्सं[४]।

कौमु। तेण हि पसादेहि महाभाअं[५]।

(सुधाकरः परिक्रामति)।

सुन्द। जो अवरज्झइ सो पसादेदु। अण्णस्स को अवराओ[६]।

कौमु। दुव्विणीदे, पसादेहि दाव[७]। (इति कातर्यं नाटयति)।

सुन्द। (स्वगतम्) का गई। (प्रकाशम्) महाभाअ, कौमुदी पसादेदु क्खमीअदु इमो अवराहो त्ति[८]।

---

(१) इताशे, प्रसादय तावन्महाभागं। मा पुनरपि तस्या इताशायाः करतलवर्त्तिनी भव।

(२) अयि, एतावन्निमित्तं प्रसादनस्य।

(३) ईदृश्यामवस्थायामपि क्रीड़सि?

(४) न क्रीड़िष्यामि।

(५) तेन हि प्रसादय महाभागम्।

(६) योऽपराध्यति स प्रसादयतु अन्यस्य कोऽत्ययः।

(७) दुर्विनीते, प्रसादय तावत्।

(८) का गतिः। महाभाग, कौमुदी प्रसादयति क्षम्यतामयमपराध इति।

Digitized by Google

सुधा। (प्रतिनिवृत्य) इदानीं समयेन [illegible]।

सुन्द। किणा उण[१]?

सुधा। अम्बभवती मां स्वजनमावगच्छतु।

सुन्द। (सस्मितम्) किमिममाणावीअदि[२]?

सुधा। शृणुमस्तावत्।

सुन्द। हला कौमइ, पडिवज्जसु दाव पडिवअणं[३]।

कौमु। (साक्षेपम्) अलं कीलिदेण। उक्कंठदु मे हिअअं पिअरे पेक्खिदुं[४]।

सुन्द। अदोज्जेव्व तुवरदु पडिवअणस्स[५]।

कौमु। तुमं मे मुहं होहि[६]।

सुन्द। (स्वगतम्) न जुत्तं विलंबिदुं, कादरा क्खु एसा दीसइ। (प्रकाशम्) महाभाअ, कोमई विण्णवेदि जो छन्दो महाभाअस्स त्ति[७]।

---

(१) केन पुनः?

(२) किमिदमाज्ञाप्यते?

(३) अयि कौमुदि, प्रतिपद्यस्व तावत् प्रतिवचनम्।

(४) अलं क्रीडितेन। उत्कण्ठते मे हृदयं पितरौ प्रेक्षितुम्।

(५) अतएव त्वरतां प्रतिवचनाय।

(६) त्वं मे मुखं भव।

(७) न युक्तं विलम्बितुं कातरा खल्वेषा दृश्यते। महाभाग, कौमुदी विज्ञापयति यच्छन्दो महाभागस्येति।

Digitized by Google

सुधा । अनुगृहीतोऽस्मि ।

सुन्द । अथ गृहगमनस्य को विलम्बो[१] ।

सुधा । न खलु कोऽपि । प्रतिष्ठेतां भवत्यौ ।

(उभे उत्तिष्ठतः) ।

(नेपथ्ये) ।

आः पापे, क्वदानीं यास्यसि ।

क्रोधस्फुर्ज्जितकेशरस्य विकटव्याघूर्णिताक्षस्य वा
हर्य्यक्षस्य बुभुक्षितस्य जरठाद्दंष्ट्रान्तराच्चान्मृगीम् ।
त्रातुं वाञ्छति कोविवेकरहितस्तेनैव सार्द्धं बला-
च्चामुण्डामिह चण्डमुण्डमथिनीमद्भ्रोमि चण्डां त्वया ॥

द्रुतमहमिदानीम्,

चक्रत्तीक्ष्णासिधारैः परिमृदुलपयोजन्मकाण्डोपमात्ते
संच्छिन्नात् कण्ठनालाद्बहलवलिवलच्छोणितैः कोष्णधारैः ।
चामुण्डां मुण्डमालारुधिरकरतलालङ्कृतां प्राचवाणां
साक्षादृभ्रोमि भूयः सपिशितबलिभिर्योगिनीनां गणांश्च ॥

कौमु । (भयं रूपयित्वा) महाभाअ, परित्ताअसु परित्ताअसु । तीसे विअ हदासाए सरसंजोओ सुणीअदि[२] ।

---

(१) अथ गृहगमनस्य को विलम्बः ?

(२) महाभाग, परित्रायस्व परित्रायस्व । तस्या इव हताशायाः स्वर-संयोगः श्रूयते ।

Digitized by Google

सुधा। न भेतव्यम्।

(ततः प्रविशति क्रुद्धा खड्गहस्ता कङ्कालमालिनी। कौमुदी वेपते)।

कङ्का। (कौमुदीमवलोक्य सरोषम्)।

भ्रमी ज्वलत्कोटरवह्निनेव
सन्तप्यमानाऽन्तरसम्भृतेन।
क्रोधाग्निनाऽतिक्रमजेन भूयो
निर्व्वापयामि क्षतजैस्त्ववैनम्॥

(इति परिक्रामति)

सुधा। आः पापे,

कथमिमामनवाप्तमनोरथां
व्यवसिताऽसि विहन्तुमपापिनीम्।
अपचयोन्मुखमेव सुधाकरं
ग्रसति राहुरपूर्णकलं न तु॥

कङ्का। (अनाकर्णितकेन)।

ध्वान्तस्येव प्रतीपां मे क्षुद्रां दीपशिखामिव।
वात्येव त्वां हराम्येषा यः शक्नोति स रक्षतु॥

(इत्यद्भुतं परिक्रामति। कौमुदी भूयोवेपते)।

सुधा। (सकोपम्) **आः पापे, कथं स्खलसि,**

विलोचनानां कमनीयमुत्सवं
चतुष्मतः सर्व्वजनस्य सर्व्वदा।

Digitized by Google

यदा प्रफुल्लाम्बुजमनोहरामिमां
द्रष्टुं पिपासामि नलिनीमिवोत्सुका ॥

कङ्का । (अनाकर्षितमेव नाटयन्ती) **देवि, चामुण्डे, पुष्पाणैनाम्** । (इति खड्गमुद्यम्य धावति । कौमुदी मूर्च्छिता पतति । सुन्दरी स्तब्धा तिष्ठति) ।

सुधा । (सभ्रमम्) **सुन्दरि, सुन्दरि, शुश्रूषस्वैनाम्। अहमेतां दुष्टतापसीं शिक्षयामि** । (इति खड्गमाच्छिद्य बलात् कङ्कालमालिनीं निवारयति)।

कङ्का । (सक्रोधम्) **आः पाप, त्वमपि नाम चामुण्डोपहाराय भवसि** । (इति सुधाकरं तर्ज्जयति) ।

सुधा । आः पापे, दुष्टतापसि,

निम्नाचरीमिव क्रूरामनार्य्यां त्वां सुधाकरः ।
न चिरादुद्धरामीव मात्तादिषमतामि ॥

कङ्का । (विकटं विहस्य) **साधु ब्राह्मणडिम्भ, साधु!**

संचक्षैरयतोव्याघ्राः क्रोष्टुभिः कृष्यते यथा ।
मत्समक्षं तथैव त्वमनात्मज्ञ, विकत्थसे! ॥

हताश, न स्वस्वात्मानं भारभूतमवैषि ? कथं रे क्षुद्रोऽपि महतां वाचं भाषमाणो नापचपसे ?

सुधा । **दुष्टे, वृथा गर्व्विते, अलमलमनेन,**

लौहस्य भारात् खलु गौरवाढ्यः
स्वल्पप्रमाणोऽपि मणिर्विशुद्धः ।

Digitized by Google

मृगेन्द्रपोतोऽपि करीन्द्रहन्ता
कक्षं दहत्यल्पतरोऽपि वह्निः॥

स्मरेदानीं यत् स्मर्त्तव्यम्।

कङ्का। अलमुत्तरोत्तरेण। नातिचिरात् ज्ञास्यसि, यः स्मर्त्तव्यं स्मरिष्यति।

सुधा। दुष्टे, अलं बहु विकत्थ्य। कर्म्मणैवाधरोत्तरभावो व्यक्तीभविष्यति। तदेहि, विमर्हक्षमं देशमाश्रयावः। (इति परिक्रम्य निष्क्रान्तौ)।

सुन्द। (सन्नीत्यितेव प्रकृतिमापन्ना ससम्भ्रमं चेलाञ्चलेन कौमुदीं वीजयन्ती) समस्ससिहि सहि, समस्ससिहि। सव्वधा कदत्थणपरं देव्वमम्हे किदकज्जं दाणिं संपन्नम्। इमा क्खु,

तिण्हा सत्तुव्वसणं उणवि किलिट्ठा दुरन्तपलएण।
मुत्तो उवप्पवादो कण्हो चन्दो अम्हालजलएहिं(१)॥

(निःश्वस्य) इदासे, दुट्ठतावसि, अम्हालप्पउत्ता मेहमाला वसन्तसमअलच्छीं विअ लोअणाणन्ददारुणीं इमां अहिभविहीअ कं वा लाहं पेक्खसि।

---

(१) समाश्वसिहि सखि, समाश्वसिहि। सर्व्वथा कदर्थनपरं दैवमस्माकं कृतकृत्यमिदानीं सम्पन्नम्। इयं खलु,

तीव्रा शत्रुव्यसनं पुनरपि क्लिष्टा दुरन्तप्रलयेन।
मुक्त उपप्लवात् कृष्णश्चन्द्रोऽस्माकजलदैः॥

Digitized by Google

भअवदि, परिव्वाइए, एसो दे सणेहसव्वस्सं जणो अहिभविज्जइ । एक्खलु दाव णं । कधं महाभाओ सुहाअरो वि चिरेइ । किं दाणिं करामि मन्दभाइणी[१] । (इति रोदिति) ।

(ततः प्रविशति साकुलः सुधाकरः) ।

सुधा । (सत्वरमुपसृत्य) महाभागे, समाश्वसिहि समाश्वसिहि ।

आबध्य तां सकलसौभाग्यभाजं
स्त्रीलाघवध्वां परिशुद्धकारी ।
प्राप्तोऽहमेष प्रतिबुद्ध तस्मा-
मानन्दयेन्दुप्रतिमानने, त्वम् ॥

सुन्द । सहि, समस्सस समस्सस । एसो क्खु णिम्माही-हीअ दुट्ठतावसीं संपत्तो महाभाओ । अहिनन्देहि दाव णं[२] ।

---

(१) भगवति, परिव्राजिके, एष ते स्नेहसर्वस्वं जनोऽभिभूयते, एष तावदेनाम् । कथं महाभागः सुधाकरोऽपि चिरयति । किमिदानीं करोमि मन्दभागिनी ।

(२) सखि, समाश्वसिहि समाश्वसिहि । एष खलु निर्मुक्तां दुष्टतापसीं सम्प्राप्तो महाभागः । अभिनन्दय तावदेनम् ।

Digitized by Google

(कौमुदी प्रत्यागच्छति)।

सुधा। सुन्दरि, दिष्ट्या वर्द्धसे।

प्रत्यासन्ने सवितरि तमोमुच्यमानेव यामात्
किञ्चिल्लक्ष्यप्रकृतिमधुरा मर्त्यलोकस्य लक्ष्मीः।
अस्तप्राये प्रणयसमये नूनमासन्नबोधा
स्निग्धच्छायातरुचिरकरणा लक्ष्यते ते सखीयम्॥

सुन्द। (सहर्षम्) **जह भवं तक्केदु। णं पहाअकमलिनी विअ पप्फुल्लप्पाअवअणा क्खु पिअसही दीसदु**(१)।

कौमु। (उन्मील्य चक्षुषी) **हला सुन्दरि, अविणाम उवसन्तमत्ताहिदं**(२)**?**

सुन्द। **अधइं। इमिणा किल महाभाएण णिग्गहिदोम्ह संजमिदा सा दुट्ठतावसी, ता उत्थेहि**(३)।

कौमु। (स्वगतम्) **मम्पि त्ति किं ण भणासि?** (प्रकाशम्) **पच्चुज्जीविदा म्हि**(४)। (इत्युत्तिष्ठति)।

---

(१) यथा भवान् तर्कयति। ननु प्रभातकमलिनीव प्रफुल्लप्रायवदना खलु प्रियसखी दृश्यते।

(२) अयि सुन्दरि, अपि नाम उपशान्तमत्ताहितम्?

(३) अथ किम्, अनेन किल महाभागेन निगृह्य संयमिता सा दुष्टतापसी, तदुत्तिष्ठ।

(४) मामपीति किं न भणसि? प्रत्युज्जीविताऽस्मि।

Digitized by Google

सुन्द। ण खु एदेण वावारेण णादिक्किलिट्ठो महाभाओ[१]?

सुधा। (जल्पितम्) लब्धौषधः साम्प्रतमक्लिष्टोऽस्मि।

(कौमुदी जल्पते)।

सुन्द। णिव्वुदा म्हि[२]।

सुधा। (कौमुदीं प्रति) अपि प्रकृतिमापन्नानि तेऽङ्गानि?

कौमु। महाभागस्स प्पसादादो[३]।

सुधा। प्रियं नः।

कौमु। हला सुन्दरि, इमिणा णिज्झरसीमरवरिसिणा कुसुमरेणुमन्थरेण मन्दमारुदेण पकिदित्था म्हि संवुत्ता। ता विसवेहि महाभागं घरगमणस्स[४]।

सुधा। यद्येवं, लघु लघु प्रतिष्ठस्व।

(सर्वे उत्थाय परिक्रामन्ति)।

सुधा। अयमवरोहणमार्गः। शनैः शनैरवरोहतां भवत्यौ।

---

(१) न खल्वेतेन व्यापारेण नातिक्लिष्टो महाभागः?

(२) निर्वृताऽस्मि।

(३) महाभागस्य प्रसादात्।

(४) अयि सुन्दरि, अनेन निर्झरशीकरवर्षिणा कुसुमरेणुमन्थरेण मन्दमारुतेन प्रकृतिस्थाऽसि संवृत्ता। तदिङ्गापय महाभागं स्वगमनाय।

Digitized by Google

सुन्द। महाभाअ, अदिमत्तं कादरा क्खु एसा। ण अप्पणा ओरोढुं सक्कहिदु त्ति तक्केमि। ता णं ओलंबिदुं अरिहेदु महाभाओ[१]।

सुधा। तथा। (इति कौमुदीमवलम्बते)।

(सर्व्वे अवरोहणं नाटयन्ति)।

सुन्द। णं कदमेण उण पत्थिणा दाणिं गमिस्सामो[२]।

सुधा। नन्वमुनैव शूलपाणिमन्दिराभ्यर्णचरेण।

कौमु। वेवइ मे हिअअं[३]।

सुधा। अयि भीरु,

सुकोमलाङ्गी खलु मङ्गलार्हा
त्वं दैवतैरेव हि रक्षणीया।
वनान्तराले हि लता प्रसूता
न रक्ष्यते संवृतिभिर्मनुष्यैः॥

अपिच।

अस्य रूपस्य तन्वङ्गि, सुकुमारतरस्य ते।
परिणामः कथं नाम शोचनीयो भविष्यति?

---

(१) महाभाग, अतिमात्रं कातरा खल्वेषा। नात्मना अवरोढुं शक्ष्यतीति तर्कयामि। तदेनामवलम्बितुमर्हति महाभागः।

(२) ननु कतमेन पुनः पथा इदानीं गमिष्यामः?

(३) वेपते मे हृदयम्।

Digitized by Google

तदलमाशङ्क्य । गच्छाग्रतः । सुन्दरि, त्वमपि सख्या-
ग्रतोभव ।

सुन्द । तह[१] । (इति परिक्रामति) ।

(सर्व्वे परिक्रम्य निष्क्रान्ताः) ।

इति कौमुदीसुधाकरे तृतीयोऽङ्कः ॥०॥

---

(१) तथा ।

Digitized by Google

चतुर्थोऽङ्कः ।

(ततः प्रविशतः पुष्पावचयमभिनयन्त्यौ चेट्यौ)।

प्रथमा। हला कलहंसिए, जारिसो भट्टा तारिसी भट्टीणी त्ति जं सच्चं णिव्वुदं मे हिअअं। तुमं वा कहं मण्णसि[१] ?

द्वितीया। हला मअरन्दिए, किं इमम्मि मन्तव्वं। अवाच्चः क्खु विही संवुत्तो[२]।

मक। एव्वं णेदं। दिट्ठिआ क्खु भट्टिणी अणुरूवं भत्तारं पत्ता। ण क्खु राअमन्ती वसुमित्तो भट्टा विअ गुणवन्तो[३]।

कल। अधवं। (स्मितं कृत्वा) तह वि सो राअमन्ती[४]।

---

(१) अयि कलहंसिके, यादृशोभर्त्ता तादृशी भट्टिनी इति यत् सत्यं निर्वृतं मे हृदयम्। त्वं वा कथं मन्यसे ?

(२) अयि मकरन्दिके, किमत्र मन्तव्यम्। अवाच्यः खलु विधिः संवृत्तः।

(३) एवमिदम्। दिष्ट्या खलु भट्टिनी अनुरूपं भर्त्तारं प्राप्ता। न खलु राजमन्त्री वसुमित्रो भर्त्तेव गुणवान्।

(४) अथकिम्। तथापि स राजमन्त्री।

Digitized by Google

मक। ण क्खु धणरासी मणस्स रुइं उप्पादेइ महानुहाआणं इत्थिआणं[१]।

कल। किं भणसि? ण क्खु दरिद्दत्तणं पत्थणिज्जं मण्णसि महाणुहाआणं? णं धणं ज्जेव्व रोअदि मणस्स। एत्थ दाव अम्हे ज्जेव्व णिअस्सणं[२]।

मक। ण क्खु ण क्खु। मा दाव अम्हाणं रुइए महानुहाआणं रुइं अणुमाउं अरिहेसि[३]।

कल। (सवैलक्ष्यम्) सच्चं, अप्पाहिलासो क्खु अम्हेरिसो जनो महाणुहाआ उण विबुलेहिं अहिलासेहिं आउलीकरीअन्ति। अदो ज्जेव्व ते महासआ, अम्हेरिसा उण खुद्दासआ त्ति भणीअन्ति[४]।

मक। (स्मितं कृत्वा) ण क्खु एव्वं पडिवत्तुमरिहेसि। णिग्गुणो भत्तारो धणवन्तो वि महाणुहाआणं इत्थि

---

(१) न खलु धनराशिर्मनसोरुचिमुत्पादयति महानुभावानां स्त्रीणाम्।

(२) किं भणसि? न खलु दरिद्रत्वं प्रार्थनीयं मन्यसे महानुभावानाम्? ननु धनमेव रोचते मनसे। अत्र तावदावामेव निदर्शनम्।

(३) न खलु न खलु। मा तावदस्माकं कृते महानुभावानां रुचिमनुमातुमर्हसि।

(४) सत्यं, अल्पाभिलाषः खल्वस्मादृशो जनः, महानुभावाः पुनर्विपुलैरभिलाषैराकुलीक्रियन्ते। अतएव ते महाशयाः, अस्मादृशाः पुनः क्षुद्राशया इति भण्यन्ते।

Digitized by Google

आणं पेम्मप्पदं ण होइ त्ति भणमि। अजुत्तव्वअ-
हारी किल जणो ण मणे लग्गइ। मणो क्खु मूलं
सुहस्स ण धणं(१)।

कल। को वा विप्पडिवज्जइ। ण क्खु राअमन्ती णि-
म्गुणो होइ त्ति तक्केमि(२)।

मक। सहि, ण जाणसि तं जिणा एव्वं भणसि। ण के-
अलं णिम्गुणो जाव दुग्गुणो क्खु सो(३)।

कल। अध भट्टारअभट्टिणीणं मज्झे कमदिसएण पस-
त्तभाअधेअं तक्केसि(४)?

मक। (स्मितं कृत्वा) तुमं वा कं तक्केसि(५)?

कल। जइ मं पुच्छसि, तइ अहिअभग्गवन्तो भट्टा-
रओ(६)।

---

(१) न खल्वेवं प्रतिपत्तुमर्हसि। निर्गुणो भर्त्ता धनवानपि महानुभावानां स्त्रीणां प्रेमास्पदं न भवति इति भणामि। अयुक्तव्यवहारी किल जनो न मनसि लगति। मनः खलु मूलं सुखस्य न धनम्।

(२) कोवा विप्रतिपद्यते। न खलु राजमन्त्री निर्गुणो भवतीति तर्कयामि।

(३) सखि, न जानासि तं, येनैवं भणसि। न केवलं निर्गुणो यावद्दुर्गुणः खलु सः।

(४) अथ भट्टारकभट्टिन्योर्मध्ये क्रमतिशयेन प्रसन्नभागधेयं तर्कयसि?

(५) त्वं वा कं तर्कयसि?

(६) यदि मां पृच्छसि, तदा अधिकभाग्यवान् भट्टारकः।

Digitized by Google

मक। कधं विअ[१]?

कल। अलोअसामण्णउणा भट्टिणी कोमई[२]।

मक। णं भट्टारओ सुहाअरो वि अलोअसामण्णउणो ज्जेव्व[३]।

कल। दुक्करं क्खु सोआमणीजलहराणं सुन्देर-विसेसणिव्वअणं, किं तु जो मे पच्चओ सो दे कहिओ[४]।

मक। साहु मण्णसि तुमं[५]। (इति पुष्पावचयं नाटयतः)।

मक। हला कलहंसिए, जाणसि तुमं किं णिमित्तं भट्टिणीए पुप्फावअअस्स[६]।

कल। जाणमि। णेवच्छरअणा[७]।

मक। ता किं अप्पणो[८]?

---

(१) कथमिव?

(२) अलोकसामान्यगुणा भट्टिनी कौमुदी।

(३) ननु भट्टारकः सुधाकरोऽप्यलोकसामान्यगुणएव।

(४) दुष्करं खलु सौदामनीजलधरयोः सौन्दर्य्यविशेषनिर्व्वचनम्। किन्तु यो मे प्रत्ययः स ते कथितः।

(५) साधु मन्यसे त्वम्।

(६) अयि कलहंसिके, जानासि त्वं किं निमित्तं भट्टिन्याः पुष्पावचयस्य?

(७) जानामि। नेपथ्यरचना।

(८) तत् किमात्मनः?

Digitized by Google

कल। ण दाव अप्पणो किं तु अज्जाए सुन्दरिए[१]।

मक। जुज्जदि। सा क्खु दोईअं उच्छसिअं भट्टिणीए[२]।

कल। अधइं। एत्थ उण णिमित्तन्तरं पि अत्थि[३]।

मक। किं त्ति[४]?

कल। भट्टिणी किल कुसुमणेवच्छेण अलं करुअ अज्जसालंकाअणस्स तां पडिवाएहिइ[५]।

मक। अम्म संविहाणअं भट्टिणीए! इमिणा क्खु संविहाणेण अणुरुवं भत्तारं पाविअ अज्जा सुन्दरी ण सुमरिहिइ सअणस्स[६]।

कल। ऐव्वं एदं[७]।

मक। हला कलहंसिए, किं त्ति महारिहं रअण-

---

(१) न तावदात्मनः, किन्तु आर्य्यायाः सुन्दर्य्याः।

(२) युज्यते। सा खलु द्वितीयमुच्छ्वसितं भट्टिन्याः।

(३) अथ किं। अत्र पुनर्निमित्तान्तरमप्यस्ति।

(४) किमिति?

(५) भट्टिनी किल कुसुमनेपथ्येनालङ्कृत्य आर्य्यसालङ्कायनाय तां प्रतिपादयिष्यति।

(६) अहो संविधानकं भट्टिन्याः? अनेन खलु संविधानेन अनुरूपं भर्त्तारं प्राप्य आर्य्या सुन्दरी न स्मरिष्यति स्वजनस्य।

(७) एवमेतत्।

Digitized by Google

णेवच्छं अदिक्कमिअ कुसुमणेवच्छे भट्टिणीए किदो बहुमाणो ? ण क्खु लोहो तहिं कारणं[१] ?

कञ्च । (कर्णौ पिधाय) सन्तं पावं । तारिसीए महाणुहावाए कधं एरिसो लोहो संभवइ[२] ?

मक । ता कहेहि, कहिं णिमित्ते इमो आरम्भो त्ति[३] ?

कल । एव्वं किल भट्टिणी मण्णइ । सुकुमारस्स अङ्गस्स सुकुमारं ज्जेव्व णेवच्छं अहिअं सोहइ त्ति[४] ।

मक । (सभ्रूभङ्गम्) सो इमो अइसरिअज्जवलाणं कीलाप्पआरो[५] !

कल । एव्वं जं भणसि[६] ।

मक । (सासूयमिव) अइ सुकुमारस्स अङ्गस्स सुकुमणेवच्छं अहिअं सोहइ, ता किं त्ति सुलहेसुं कुसुमेसुं रअणालङ्कारस्स लोआ सेआन्ति[७] ?

---

(१) अयि कञ्चुकिके, किमिति महार्हं रत्ननेपथ्यमतिक्रम्य कुसुमनेपथ्ये भट्टिन्या कृतो बहुमानः ? न खलु लोभस्तत्र कारणम् ?

(२) शान्तं पापं । तादृश्या महानुभावायाः कथमीदृशो लोभः सम्भवति ?

(३) तत्कथय, कस्मिन् निमित्ते अयमारम्भइति ?

(४) एवं किल भट्टिनी मन्यते । सुकुमारस्याङ्गस्य सुकुमारमेव नेपथ्यमधिकं शोभते इति ।

(५) सोऽयमैश्वर्यवतां क्रीडाप्रकारः !

(६) एवं यद्भणसि ।

(७) यदि सुकुमारस्याङ्गस्य कुसुमनेपथ्यमधिकं शोभते, तत्किमिति सुलभेषु कुसुमेषु रत्नालङ्काराय लोकाः शोचन्ति ?

Digitized by Google

कल। अहाओ तत्थ कारणं[१]।

मक। किं जस्स जं णत्थि तस्स तत्थ वहुमाणो[२]?

कल। अधइं। किं ण पेक्खसि अन्धआरिदाए रत्तिए अप्पो वि दीवालोओ वहु मण्णिज्जइ, ण उण दिअहे[३]।

मक। अविवेओ क्खु विहाआरो[४]।

कल। कधं विअ[५]?

मक। जो जं वहुमण्णइ सो तं ण लहइ, जो उण लहइ ण तस्स तत्थ वहुमाणो, जस्स इत्थं सं विहाणअं[६]।

कल। (स्मितं कृत्वा) तुमं उण कधं इच्छसि[७]?

मक। जइ धणवन्ताणं धणं दरिद्दाणं ताणं च दरिद्दत्तणं

---

(१) अभावस्तत्र कारणम्।

(२) किं यस्य यन्नास्ति तस्य तत्र बहुमानः?

(३) अथ किं। किं न पश्यसि अन्धकारितायां रात्रौ अल्पोऽपि दीपालोको बहु मन्यते, न पुनर्दिवसे।

(४) अविवेकः खलु विधाता।

(५) कथमिव?

(६) यो यद्बहु मन्यते स तन्न लभते, यः पुनर्लभते न तस्य तत्र बहुमानः, यस्येत्थं संविधानकम्।

(७) त्वं पुनः कथमिच्छसि?

Digitized by Google

धणवन्ताणं होज्जउ, तइ सोहणं संविहाणअं किदं होज्जउ[१]।

कल। (विहस्य) तुमं दाव विहाअारस्स कज्जसइवो होहि। ओहीरिअभअप्फइबुद्धिप्पहाआ क्खु दे बुद्धी[२]।

मक। अलाहि परिहासेण? जइ अहं विहाअारस्स कज्जसइवो होज्जमु, तइ एरिसं अणुइअं संविहाणअं णूणं अण्णहेस्सं[३]।

कल। जइ ण सहसि अलं कज्जसइवदाए, सअं ज्जेव्व किं अण्णाए ण समीहिदं करेसि[४]।

(नेपथ्ये गीयते)।

लद्धआलिङ्गिअ सुरही चुंविअ सुमुहं वसन्तलच्छीए।
मद्धुणा समेइ मणिअं ललिअगई दाहिणो पवणो[५]॥

---

(१) यदि धनवतां धनं दरिद्राणां तेषाञ्च दरिद्रत्वं धनवतां भवेत्, तदा शोभनं संविधानकं कृतं भवेत्।

(२) त्वं तावद्विधातुः कार्य्यसचिवोभव। अवधीरितबृहस्पतिबुद्धिप्रभावा खलु ते बुद्धिः।

(३) अलं परिहासेन? यद्यहं विधातुः कार्य्यसचिवो भवेयं, तदेतद्भ्रमनुचितं संविधानकं नूनमन्यथयिष्ये।

(४) यदि न सहसे, अलं कार्य्यसचिवतया? स्वयमेव किमाज्ञया न समीहितं करोषि?

(५) लब्धालिङ्ग सुरभिः चुम्बित्वा सुमुखं वसन्तलक्ष्याः।
मधुना समेति मनैर्ललितगतिर्दक्षिणः पवनः॥

Digitized by Google

कल । (कर्णं दत्त्वा) अये, एसा अज्जसालंकायणसहिअस्स भत्तारस्स पावेसिई धुआ[१] ।

मक । हला कलहंसिए, कुदो दे दूरणमो पण्डिच्चं, जेण दे कहा वि ण बुज्झीअदि[२] ।

कल । (सस्मितम्) कधं विअ[३] ?

मक । भणाहि दाव का एसा धुआ णाम[४] ?

कल । (स्मितं कृत्वा) धुआ णाम गीदिविसेसो णाडस्स उवआरिणी, पत्तसूइआ क्खु सा होइ[५] ।

मक । (विहस्य) ता गीदी त्ति भणाहि, किं कहेसि धुआ धुआ त्ति[६] ।

(इति पुष्पावचयं नाटयतः । कलहंसिका स्मितं करोति) ।

कल । हला मअरन्दिए, अज्ज किल किम्पि अबुव्वं पेक्खणअं भत्तारस्स पुरदो अहिणीहिइ त्ति सुणी-

---

(१) अये, एषा आर्यसालङ्कायनसहितस्य भर्तुः प्रावेशिकी ध्रुवा ।

(२) अयि कलहंसिके, कुतस्ते इदं पाण्डित्यं, येन ते कथाऽपि न बुध्यते ।

(३) कथमिव ?

(४) भण तावत्का एषा ध्रुवा नाम ?

(५) ध्रुवा नाम गीतिविशेषः नाट्यस्योपकारिणी । पात्रसूचिका खलु सा भवति ।

(६) तद्गीतिरिति भण, किं कथयसि ध्रुवा ध्रुवेति ।

Digitized by Google

अदि। ता सिग्घं सिग्घं कुसुमाइं ओचिणुहि, जेण अम्हे वि तहिं सामाजिआओ होस्साम[१]।

मक। हला कलहंसिए, उणो वि पुच्छीअसि[२]।

कल। पुच्छ वीसद्धं जं सि पुच्छिदुआमा[३]।

मक। इमं पुच्छीअसि। किं पेक्खणअं णाम? को वा तस्स अहिणओ? किं वा तहिं सामाजिअत्तणं[४]।

कल। अइ उज्जुए, तं पि ण जाणसि? सुणु, णाडइ विसेसो पेक्खणअं, अहिणओ उण अवत्थाणुआरो, जे क्खु एदं पेक्खन्ति ते सामाजिआ। जदो पेक्खीअदि, अदोज्जेव्व पेक्खणअं त्ति कहीअदि[५]।

---

(१) अयि मकरन्दिके, अद्य किल किमप्यपूर्वं प्रेक्षणकं भर्तुः पुरतोऽभिनेष्यते इति श्रूयते। तत् क्षिप्रं क्षिप्रं कुसुमान्यवचिनु, येनावामपि तत्र सामाजिके भविष्यावः।

(२) अयि कलहंसिके, पुनरपि पृच्छ्यसे।

(३) पृच्छ विस्रब्धं यदसि प्रष्टुकामा।

(४) इदं पृच्छ्यसे। किं प्रेक्षणकं नाम? को वा तस्य अभिनयः? किं वा तत्र सामाजिकत्वम्?

(५) अयि ऋजुके, तदपि न जानासि? शृणु, नाट्यविशेषः प्रेक्षणकं, अभिनयः पुनरवस्थानुकारः, ये खल्वेतत् पश्यन्ति ते सामाजिकाः। यतः प्रेक्ष्यते, अतएव प्रेक्षणकमिति कथ्यते।

Digitized by Google

मक । (सहर्षम्) ता पेक्खिदव्वं क्खु इदं[१]। (इति पुष्पाण्यवचित्य निष्क्रान्ते) । (प्रवेशकः) ।

(ततः प्रविश्योपविष्टः सुधाकरः सालङ्कायनश्च) ।

सुधा । ततस्ततः ?

साल । ततः सविनयमहमभ्यर्थितो भरतगोष्ठीगरिष्ठेन चन्द्रचूडेण ।

सुधा । किमिति ?

साल । किमप्यपूर्वं प्रेक्षणकमस्मिन्नार्यसुधाकरस्य विवाहमहोत्सवे प्रयोक्तुमुद्यतावयं, तदाज्ञया भरतेष्वनुग्रहः क्रियतामिति ।

सुधा । अपि ज्ञायते कस्तस्य कवयिता ?

साल । ज्ञायते । तेनैव कथितं, मम यवीयसो भ्रातुर्मिचं विष्णुशर्म्मा नाम इति ।

सुधा । स खलु नाट्यवेदनिपुणो विष्णुशर्म्मा ?

साल । अथ किम् ।

सुधा । नूनमपूर्वं भविष्यति । तेन हि समादिश्यन्तां भरताः, वर्णिकापरिग्रहः क्रियताम्-इति ।

साल । ननु समादिष्टाएव भरताः ।

सुधा । (क्षणान्तरे) वयस्य, यत्सत्यं इदानीमपि हर्षविषादयोर्व्यतिकरमनुभवामि । कुतः ?

---

(१) तत् प्रेक्षितव्यं खल्विदम् ।

Digitized by Google

अत्युच्चैर्भगवत्यनुग्रहवशाद्दैवानुकूल्यात्तथा
सिद्धिः सद्यदवातिनिर्वृतिकरी प्राप्ता मया कौमुदी।
यत्सत्यं वपुषा समं मनसि मे नो माति हर्षोदयः
शङ्का किन्तु दुनोति हन्त कुटिलात् कापालिकादुत्कटा॥

साल। वयस्य, अलमात्मानं खेदयित्वा। दैवमस्माभ्यं स्वस्ति करिष्यति। पश्य,

आपञ्जालादपि सुमहतो दुर्विलङ्घ्य प्रकोपा-
द्दैवं तावत् प्रभवति परं रचितुं रक्ष्यवस्तु।
और्व्वावह्निः किल जलनिधेस्तुङ्गतुङ्गैस्तरङ्गै-
र्व्याप्तो दारुव्यतिकरमृतेऽप्युज्ज्वलं जाज्वलीति॥

अपिच,

अपि व्यतिकरक्लिष्टः प्रवृद्धजलदावलेः।
चन्द्रचन्द्रिकयोर्योगो ध्यायते न तु लुप्यते॥

नटः। (प्रविश्य)।

यस्याः कटाक्षमात्रेण विरूपाक्षोऽपि श्रिचितः।
बिम्बाधररसार्थित्वं तां नमामि गिरीन्द्रजाम्॥

सुधा। अष्टपदेयं नान्दी।

नटः। तच्चभवतोविष्णुशर्म्मणः कृतिः कौमुदीपरिणयं नाम प्रेक्षणकं प्रयोक्ष्यते, तच्च भवद्भिर्दीयमानमव-धानमभ्यर्थये।

Digitized by Google

सुधा । वयस्य, उभयथाऽप्येतदाप्यायनमस्माकम् ।

साल । एवं यदात्थ ।

नटः । एतत्कविः किल,

शिरसा प्रणिपत्य सादरं
भवतः प्रार्थयते सभासदः ।
परिपश्यत भोः कृतिं नवां
सुकुमारामिव पुष्करस्रजम् ॥

अस्माभिरिदं प्रेक्षणकं निःक्षिपता च कविनेदमभिहितम,

दोषारोपकलङ्कितान्यवचसश्लिष्टन्तु दुष्टाशया:
सन्तः सन्त्यनृतैर्गुणैरपि परं प्रोत्साहयन्तो भुवि ।
गङ्गास्वच्छजलं करोत्यतितरां दुष्प्रेयमब्धेर्निधि-
र्गङ्गा नद्वलतोयमुत्तमरसं सम्पादयत्यागतम् ॥

(नेपथ्ये)

आः दुरात्मन्, अलीकवाचाल, भरतपुच, कथं व्यलीकवादिनः स्तुवन् पौरुषञ्च निन्दन् न लज्जसे? महत् खल्वेतत् पौरुषं नाम, यदसताऽपि दोषेण परवचसस्तिरस्करणम् । शृणु रे, शृणु,

आरोप्य दोषमपदोषमपीह वाच्यं
कर्तुं क्षमो भवति सूक्ष्ममतिः क्षणेन ।

Digitized by Google

प्रत्येति जातु न खलु स्फुरतोऽपि दोषा-
नन्धः पदार्थनिवहानिव मुग्धबुद्धिः ॥

अपिच। रे मूर्ख,

प्रसन्नमम्भोऽपि तटप्रपातः
समाविलं यत्कुरुते क्षणेन।
तदत्र लोके महिमैव भूयान्
प्रचीयते वेत्तु कणनमर्थम् ॥

(नटोनेपथ्याभिमुखमवलोकयति)।

सुधा। कः पुनरेष धृष्टो यो निन्दितमपि महत् पौरुषं प्रत्येति?

साल। नैतावता परिच्छेत्तुं शक्नोमि। उत्तरं तावत् प्रतीक्षस्व।

नटः। (निरूप्य सवैलक्ष्यम्) अये! महाननर्थः समापतितः। अयं खलु,

सकरणइव दर्पो दृश्यमानोऽतिलक्ष्या
नयपरिचयगर्व्वोऽन्यायमार्गैकनिष्ठः।
निवसतिरधि धात्रां लोकसन्तापनानां
प्रविशति वसुमित्रो मित्रवर्गैः समेतः॥

तन्न युक्तमत्रावस्थातुम्। (इति निष्क्रान्तः)। (प्रस्तावना)।

सुधा। वयस्य, नयप्रवीणोऽयं वसुमित्रइति श्रूयते। तत्कोऽयमस्य बुद्धिविभ्रमः?

Digitized by Google

साल। वयस्य, स्वभावदुष्टाशयः खल्वसौ। तत् किमत्र चित्रम्। पश्य,

नैवात्मनो न च परस्य सुखोदयाय
स्वभ्यर्हितोऽपि खलु संश्रयदोषहेतोः।
दुष्टाशयस्य गुणराशिरपि प्रकामः
क्लीवस्य रूपमिव निष्फलमित्यवैमि॥

(ततः प्रविशति सदर्पं परिक्रामन् मित्रवर्गानुगतो वसुमित्रः)।

धसु। (साटोपम्) दृष्टा युष्माभिर्धृष्टता भरतपुत्रस्य? (सभ्रूभङ्गम्) किमाह भरतपुत्रः, असताऽपि दोषेण विशुद्धमपि वस्तु दूषयन् बुद्धिमतामग्रणीर्दुष्टाशयः, अलीकगुणेन स्तुवन् लघुचेताः पुनः साधुः! (विहस्य)। (आरोप्य दोषमिति, प्रसन्नमम्भोऽपीति च पुनः पठित्वा) वयस्य, कुम्भमुख, कथं मन्यसे?

कुम्भ। किमत्र मन्तव्यम्। त्वद्वचसामुपरि कोवक्तुं समर्थो मनुष्यलोके?

दर्पसन्धः। (सक्रोधम्) किमुच्यते, मनुष्यलोके, इति। ननु देवलोकेऽपि, इति भणितव्यम्।

सुधा। (स्वगतम्) अहो गर्व्वप्रकारः!

कुम्भ। नात्र मम विप्रतिपत्तिः।

धसु। (विहस्य) सर्व्वः खलु कोविदमात्मीयं मन्यते।

Digitized by Google

(दम्भमयं विलोक्य) सखे, कथमिदं मौनव्रतम् ?

दम्भ । किं करीअदु[१] ।

वसु । कथ्यतां यस्ते सर्गः ।

दम्भ । जइ मं पुच्छसि, तइ अलीअगुणेण तुअन्तस्स लहुचेदो त्ति ण उण पज्जत्तं विसेसणम्[२] ।

वसु । कथं पुनः पर्य्याप्तं भवति ?

इतरौ । (सस्मितम्) नूनमधुना तिरस्कृतो दृढस्यतिर्भविष्यति ।

दम्भ । (सगर्व्वम्) कधं णाम पज्जत्तं होहिदु । लहुचेदो, भोत्तुओ, कखहासओ, मुक्खो, वालिसो त्ति सअसो वि वुच्चीअमाणं विसेसणं ण पज्जत्तं होदु[३] ।

(सर्व्वे हसन्ति) ।

वसु । साधु दम्भमय, साधु । स्थाने खलु मदयस्योऽसि ।

दम्भ । (इतरौ प्रति सगर्व्वम्) पेक्खह तिरक्किदो भअप्फई ण वा[४] ।

---

(१) किं क्रियताम् ?

(२) यदि मां पृच्छसि, तदा अलीकगुणेन लुप्तवती लघुचेता इति न पुनः पर्य्याप्तं विशेषणम् ।

(३) कथं नाम पर्य्याप्तं भविष्यति । लघुचेताः, भोक्तृकः, लुप्तात्मवः, मूर्खः, बालिशः,—इति शतशोऽप्युच्यमानं विशेषणं न पर्य्याप्तं भवति ।

(४) पश्यत तिरस्कृतो दृढस्यतिर्न वा ।

Digitized by Google

सुधा। (स्वगतम्) अहो धार्ष्ट्यम्!

वसु। तिष्ठतु तावदेतत्। श्रुतं युष्माभिर्दौर्ज्जन्यं पुण्यकीर्त्तेः? यः कौमुदीं याचमानमपि मां प्रत्याचष्टे।

कुम्भ। श्रुतम्। किं क्रियताम्? क्षुद्रः खल्वेषः।

दर्प। (सगर्व्वम्) किमुच्यते, किं क्रियताम्,—इति? ननु यदेव रोचते, तदेव क्रियताम्। कोऽत्र प्रतीपयिता? राजमन्त्री खल्वेषः।

दम्भ। राआ त्ति भणाहि। णाममत्तेण क्खु राआ वीरआरू[१]।

कुम्भ। सम्यगभिहितम्। किमन्यत्, निगृह्यैव पुण्यकीर्त्तिं कौमुदी ग्रहीतव्या।

सुधा। अहो साहसरुचिता पापानाम्।

वसु। नैतदतिपुष्कलं भवति।

कुम्भ। कथमिव?

वसु। अमुमर्थमाशङ्क्य तेन दुष्टवटुना महाराजो विज्ञापितः। स च तस्मै अभयं प्रतिश्रुत्य मामाज्ञप्तवान्।

दर्प। किमिति?

वसु। न खलु रक्षाधिकृतानां दोषमन्तरेण प्रजास्वपकर्त्तुमुत्सहन्ते साहसिकाः। त्वन्तावदप्रमत्तो भव,

---

(१) राजेति भण। नाममात्रेण खलु राजा वीरबाहुः।

Digitized by Google

यथा न कोऽप्यार्यस्य पुण्यकीर्त्तेः किमप्यत्याहितं करोति,—इति। विपर्य्यये पुनर्नियतस्ते दण्डः। सोऽयमादेशो देवस्य।

कुम्भ। (सावज्ञम्) भवन्तमन्तरेण राज्ञः स्पन्दितुमपि नास्ति सामर्थ्यम्। कथं सएव त्वां दण्डयेत्? अश्रद्धेयमेतत्।

दर्प। किं बहुना? यद्यनुमन्यसे, नातिचिराद्विगृह्य वीरबाहुं त्वामेवाधिराज्यमारोपयामः।

सुधा। धिक् दुर्ज्जनानाम्, ये प्रभुमपि हन्तुमिच्छन्ति।

वसु। (विचिन्त्य) मा मैवम्। अपि नाम,

परिभवकलुषाणां राजधानीं महत्त्वं
किमपि किमपि गूढं दुर्विलक्ष्यं समस्ति।
दहनदव दृणैरप्याहतो भस्मगुप्तः
क्षितिपतिरविरोधं तत्क्षणं दन्दहीति॥

अपिच,

विपश्चितोनीतिकथासु दक्षाः
वीराश्च विद्राविताशत्रुपक्षाः।
आज्ञाविधेयाः किल यस्य सर्व्वे
सामान्यलोकोन स लोकनाथः॥

सुधा। साधु वसुमित्र, साधु। स्वपदोचितमिदानीं मन्त्रितवानसि।

Digitized by Google

कुम्भ। आः केयमलीकाशङ्का? हस्त्यश्वरथपादातं सर्व्वमेव बलं तवाधीनम्। अनिच्छाप्रतिरुद्धानि नः श्रेयांसि।

दम्भ। सोहणं मन्तेइ कुम्भमुहो[१]।

वसु। (निःश्वस्य) वयस्य, न जानासि राजकुलदुष्टान्तं, येनैवं भणसि। सर्व्वमेव तन्त्रमाकुलीभूतम्। न खल्विदानीं पूर्व्वमिव मय्यनुरागो देवस्य। स खलु स्वयमेव तन्त्रमालोचयति।

दर्प। कः पुनरत्रोपायो भवेत्? न खलु कौमुदीमन्तरेण शक्ष्यसि जीवितमवलम्बितुम्।

वसु। एवं यदात्थ। उपायं पुनर्न पश्यामि।

दम्भ। (विहस्य) भो वअस्स, जइ एव्वं, जोअं आलंवेहि[२]।

वसु। (सहर्षम्) सम्यक् स्मारितोऽस्मि।

कुम्भ। किमिति?

वसु। योऽसौ योगसिद्धः खण्डमुण्डोनाम कापालिकः, विदितप्रभावोऽवारितव्यवसायश्चासौ देवस्य। तेनैव तावत् समीहितं करिष्ये। अस्ति च तस्य अस्मासु पक्षपातः।

---

(१) शोभनं मन्त्रयते कुम्भमुखः।

(२) भो वयस्य, यद्येवं, योगमवलम्बस्व।

Digitized by Google

दम्भ। अव्याहतं मन्त्रमेतत्[१]।

इतरौ। अहो बुद्धिकौशलं वयस्यस्य।

वसु। तदाकार्यतां तपोनिधिः।

सुधा। धिक् पाषण्डानाम्।

दम्भ। णं आआरिदो ज्जेव्व सो भवदा रण्णो वस्सदा-
मुप्पादेदुम्[२]।

वसु। आं स्मृतम्। अपसर्पः खलु मयैव प्रेषितः।
पर्य्याकुलत्वात्तु चेतसो न पुनरनुस्मृतम्।

(नेपथ्ये)

परस्त्रीभिः सार्द्धं परिचितकलाभिर्युवतिभिः
सुराभिर्मांसैर्वा सरसमधुरैर्भोगसुकरैः।
वसुद्रा चोपात्तिः फलमपि च मोक्षो न चिरतो-
ध्रुवं कौलोधर्म्मो जयति किल गम्भीरमिमतः॥

वसु। (सहर्षम्) अयमुपस्थितो भगवान् कापालिकः।
आसनमासनमर्घभवतः।

सुधा। अहो वीभत्सा वाचोयुक्तिः।

(प्रविश्य आसनं स्थापयित्वा निष्क्रान्तः परिजनः)।

(ततः प्रविशति कापालिकः। सर्व्वे उत्तिष्ठन्ति)।

---

(१) अव्याहतं मन्त्रमेतत्।

(२) मन्त्राकारितएव स भवता राज्ञोवशंवदतामुत्पादयितुम्।

Digitized by Google

वसु । भगवन्नमस्ते (इति प्रणम्य) इदमासनमास्यताम् ।

(इत्यासनं दर्शयति । सर्वे प्रणमन्ति) ।

कापा । (उपविश्य)

आलिङ्गितः पुलकिताञ्चितया सलीलं
लक्ष्मीश्वरत्यतिकरादचलेन्द्रपुत्र्या ।
साचीकताननमनल्पविलासजालं
निर्व्वाणवानवतु वो नवचन्द्रमौलिः ॥

यूयमप्युपविशत ।

(सर्वे उपविशन्ति) ।

कापा । किमर्थं पुनरहमाहूतः ?

वसु । भगवतश्चरणवन्दनेनात्मानं कृतार्थीकर्त्तुम् ।

कापा । (स्मितं कृत्वा) अलं प्रश्रयेण ? कथ्यतामर्थः ।

वसु । नन्वेष शिरसा प्रणिपत्य विज्ञापयामि । रक्षणीयः खलु शिष्यजनो गुरुभिरित्यस्ति नो विज्ञापनाऽवकाशः ।

कापा । वत्स, अलमाशङ्क्य ? कथ्यतां, कुतोरक्षितव्य इति ।

कुम्भ । भगवन्, महतो व्यसनात् ।

कापा । (सविस्मयं वसुमित्रं प्रति) न खलु परिहासोऽयम् ?

वसु । (सविनयम्) भगवन्, न खलु परिहासः । यदाह कुम्भमुखः ।

Digitized by Google

कापा । (सविषादम्) वत्स, तवापि व्यसनमिति यत्सत्यं विषीदति मे चेतः ।

वसु । जानाम्यनुग्रहं तपोनिधेः ।

कापा । कथ्यतां किं व्यसनमुपस्थितम् ?

दर्प । अपि श्रुतिमुपगतो भगवतो कौमुदीवृत्तान्तः ?

कापा । श्रुतोऽस्माभिः । किं तस्य ?

कुम्भ । प्रात्यख्यातः पुण्यकीर्त्तिना वयस्यः ।

कापा । कस्य हेतोः ?

कुम्भ । सुधाकराय तां दास्यतीति ।

कापा । (विहस्य) धिक् पुण्यकीर्त्तिम् । यो वसुमिचमतिक्रम्य वटवे सुधाकराय कौमुदीं दातुमिच्छति । (विमृश्य) भवतु । यद्येवं, निगृह्य पुण्यकीर्त्तिं गृह्यतामेषा ।

सुधा । अहो पापाभिसन्धिः ।

कुम्भ । राज्ञा चाभयन्तस्मै प्रतिश्रुतम् ।

काका । आः कथ्य राजा नाम वसुमिचस्याग्रे ?

दर्पः । (सहर्षम्) वयमप्येवं कथयामः । विप्रतिपन्नः खल्वत्र वयस्यः ।

कापा । (वसुमिचं प्रति) वत्स, किं सुहृद्वाक्येषु विप्रतिपद्यसे ?

वसु । भगवन्, अन्यदपि श्रोतव्यमस्ति ।

Digitized by Google

कापा। क्रियताम्।

वसु। (कर्णे एवमेवम्)।

कापा। (विचिन्त्य) तर्हि त्यज्यतामयं प्रणयः।

वसु। भगवन्, अशक्यः खल्वेष त्यक्तुम्।

कापा। कथमिच्छसि?

कुम्भ। (कर्णे एवमेवम्)।

कापा। (वसुमित्रं प्रति) त्वमपि चिन्तय। (स्वगतम्) एवं ममाभिलाषो न सिध्यति। अनुवर्त्तनीयश्च राज-मन्त्री वसुमित्रः। अथवा, किमिदानीं वसुमित्र-स्यानुवर्त्तनेन। यथाऽयं भणति, तथा तर्कयामि भद्र-प्रायोऽस्याधिकारः,—इति। (विमृश्य) को दैवस्याभि-प्रायमवगच्छतु। एवमिदानीमुपेक्षितोऽयं यदि स्वाधिकारएव तिष्ठेत्, कष्टमस्मानापतिष्यति। भवतु। अनुवर्त्तनीयोऽस्य च्छन्दः। अपिच। एव-मपि दुष्टवटोः सुधाकरस्यापकृतं भवति। महत् खल्वेतत्परितोषस्थानम्। तथाहि,

स्वार्थाविरोधेन परस्य साधा-
दनिष्टपातो यदि तन्महत्त्वम्।
अम्भस्यतावासुभयोर्महाब्धो-
र्वाञ्छन्ति भक्तोरपकारमेव॥

Digitized by Google

अपकारो न कर्त्तव्यः प्रभोरपि कदाचन ।
अयं कापुरुषैरेव प्रवादो वज्र मन्यते ॥

वसु । चिन्तितमस्माभिः । भगवतः करुणा खेदयमेव तावत् सुकरः पन्थाः ।

कापा । यद्येवं, त्यज्यतां विषादः । यतिष्ये भवतः समीहितसिद्धये ।

वसु । अनुगृहीतोऽस्मि ।

कापा । (सगर्व्वम्) वत्स, अलं बहु विकत्थया । कथयामि ते भूतार्थम् ।

अचिरेणैव कालेन कौसुद्या योक्ष्यते वटुः ।
भवान् वृथापरिश्रान्तः केवलं परितप्यते ॥

(सर्व्वे विमनसः स्थिताः) ।

सुधा । वयस्य, सुष्ठु खल्विदमुच्यते, दैवप्रेरितानि भवन्ति वचांसि,—इति ।

साल । अथकिम् ।

एकमर्थं विवक्षुर्यद्दीनोऽहव भाषते ।
अर्थमन्यमसामान्यं दैवस्यैतद्विजृम्भितम् ॥

अत्र तावदयमेव निदर्शनम् ।

वसु । (निःश्वस्य) असङ्गतमिव भगवतो वचनम् ।

कापा । (स्वगतम्) अहो प्रमादः ! कथं मुग्धेनेव मया एकं

Digitized by Google

वक्तुमिच्छता अन्यदेवोक्तम्। भवत्वेवं तावत्।
(प्रकाशम्) वत्स, न खल्वसङ्गतम्। ननु ब्रवीमि,

अचिरेणैव कालेन कौमुद्या योक्ष्यते भवान्।
वटुर्वृथापरिश्रान्तः केवलं परितप्यते॥

(इति तदेव वत्सस्य पठति)।

(सर्व्वे हर्षं नाटयन्ति)।

वसु। सङ्गतमिदानीम्।

कापा (सगर्व्वम्) वत्स, किमनेन खलप्रतेर्वचसः सङ्गतासङ्गतत्वविचारेण? नन्वचिरादेव,

अभिनवपरिहासप्रौढ़रागालसाङ्ग्या
व्यतिकरमुपयान्त्या भीरुतयोर्मीलिताक्ष्या।
तरलभुजलतासंश्लिष्टकण्ठान्तरालं
विगणय निजमङ्गं सङ्गतं भोक्ष्यसे एव॥

सुधा। आः पाप, अलीकवाचाल, एवं जल्पतस्ते कथं शतधा न दीर्य्यते जिह्वा?

वसु। किं दुष्करं भगवदनुग्रहेण।

साल। (स्वगतम्) कथमन्यादृशइव दृश्यते वयस्यः।

कापा। अयमहमिदानीम्,

आक्रन्दिताश्रुजलसिक्तमुखेन्दुबिम्बां
लङ्केश्वरो रघुपतेरिव धर्म्मपत्नीम्।

Digitized by Google

तामाविलाच्चकलुषामवर्णां हरिष्ये
शक्नोति यः स खलु रक्षतु तत्सपत्नः ॥

(इत्युत्तिष्ठति । सर्वे प्रयान्ति) ।

सुधा । (सकोपम्) अरे रे पाषण्ड,

राहोरिव कलां चान्द्रीं तां तन्वीमुपपुप्लुषोः ।
यथा क्रान्तिविपर्य्यासः प्रतीपस्ते सुधाकरः ॥

(इत्युत्पातुमिच्छति) ।

कापा । एकं तावत् प्रत्युपकारमस्माकं करिष्यसि ।

वसु । विधेयोऽस्मि भगवतः ।

(कापालिकः परिक्रम्य निष्क्रान्तः । सुधाकर उत्तिष्ठति) ।

साल । (सुधाकरं निवार्य्य) वयस्य, कोऽयमस्थाने संरम्भः ? ननु प्रेक्षणकमिदम् ।

सुधा । (प्रकृतिस्थः सलज्जम्) कथं प्रेक्षणकमिदम् ! मया पुनर्ज्ञातं सत्यमेव प्रियामपहर्त्तुं पापानामारम्भः इति ।

साल । विस्मृणातु तावदभिनयचातुर्य्यं भरतानाम् ।

सुधा । नूनमतीत्य वचसां विषयं वर्त्तते ।

वसु । अपिनाम कृतार्थः कापालिको भवेत् ?

कुम्भ । कः संशयः ?

Digitized by Google

दम्भ। मा संसअं करेहि। अविइन्तणिज्जप्पहाओ क्खु जोआआरो सुणीअदी(१)।

कुम्भ। अलमनेन क्लैव्येन? गर्व्वभूयांसः खलु सत्पुरुषा भवन्ति।

वसु। (स्मितं कृत्वा) एवं यदात्थ। कौमुदी परमस्मान् व्यथयति।

कुम्भ। अचिरात् सुखयिष्यति।

दर्प। सत्यवचनो भव।

कुम्भ। किमिदानीं सत्यवचनो भविष्यामि? ब्राह्मणजातिः खल्वहम्। यदुत्पन्नेन भृगुना पुरुषोत्तमवक्षस्यपि कृतश्चरणप्रहारः, कुम्भोद्भवेन च मुनिना पीतः पयोनिधिः।

वसु। (सस्मितम्) गृहीतं ब्राह्मणवचः।

दम्भ। (विहस्य) सुरहुणीवाणम्पि किं ओसिसीअदि(२)।

कुम्भ। (सक्रोधम्) किमस्मीकमिदमुपन्यस्यते?

दम्भ। कधं अस्मीअं णाम? जस्स तुमं अज्जवि पच्चक्खं पमाणं(३)।

---

(१) मा संशयं कुरु। अविचिन्तनीयप्रभावः खलु योगाचारः श्रूयते।

(२) सुरधुनीपानमपि किमवशिष्यते।

(३) कथमस्मीकं नाम? यस्य त्वमद्यापि प्रत्यक्षं प्रमाणम्।

Digitized by Google

कुम्भ । कथं महर्षीनपि न प्रमाणयसि ?

दम्भ । धी मुक्खु ! जइ महस्सिणो पमाणं, कधं रत्ति-रण तुमम्पि णाम विम्हत्थेसि ? पवणतणयस्सद्धा पारावारमुत्तिईस्सुणो उप्पद्दे वाणआरस्स कधं ण सुमरेसि[१] ?

कुम्भ । ननु रे पाषण्ड, वयस्यत्वात् सोढ़मेतावत् । तदतः परं न सहिष्ये ।

दम्भ । ण क्खु बम्हतेएण मं भप्पसा कुणहिसि[२] !

वसु । आः कोऽयमस्थाने कलहो भवतोः ?

कुम्भ । तिष्ठ रे तिष्ठ, न त्वां क्षमिष्ये ।

वसु । अलमलमात्मकलहेन ? निवर्त्तेतां भवन्तौ ।

(नेपथ्ये)

एकाकिनीसुपवनान्तलतावितानेद्राक् कौमुदीं भ्रमतिप्रसभं जिघृक्षुः ।

(सर्व्वे आकर्णयन्ति) ।

दप । नूनमिदं तच्चभवतः कापालिकस्य पौरुषं विजृम्भते ।

---

(१) धिक्मूर्ख ! यदि महर्षयः प्रमाणं, कथमेतावता त्वमपि नाम विक-त्थसे ? पवनतनयस्यर्द्धया पारावारमुत्तितीर्षोरुत्पततो वानरवानरस्य कथं न स्मरसि ?

(२) न खलु ब्रह्मतेजसा मां भस्मसात् करिष्यसि ।

Digitized by Google

सुधाकरवसुमित्रौ । किमतः परं वक्ष्यति ?

दर्प । किमपरम् ? सिद्धमनोरथमात्मानमभिनन्दस्व ।
नखल्वकृतार्थः कापालिको निवर्त्तिष्यते ।

कुम्भ । अलं सन्देहेन ? न खल्वनृतं मे वचनं भविष्यति ।

(पुनर्नेपथ्ये) ।

आश्चर्यमाश्चर्यम् !

कापालिकः प्रलयलक्षितएष शेते
साऽप्यालयं गतवती विगतारिशङ्का ॥

(सर्व्वे विषण्णाः स्थिताः) ।

सुधा । नूनमयं मुद्राप्रभावः ।

साल । कथमन्यथा निर्निमित्तः प्रलयोदयः ?

दम्भ । तं एदं सच्चवादित्तणं भवदो[१] ।

वसु । (निःश्वस्य) हा हतोऽस्मि मन्दभाग्यः ।

कुम्भ । अलं विषादेन ? वयमेव तां गृह्णीमः ।

वसु । चिन्त्यतां परिणामः । ननु प्रतीपो देवादेशः ।

कुम्भ । आः कोऽयं देवादेशोनाम ?

दर्प । (सगर्व्वम्) परिणामदर्शित्वं नाम कापुरुषत्वस्य नामान्तरम् । नेदं भवादृशेषु सत्पुरुषेषु शोभते ।

---

(१) तदेतत् सत्यवादित्वं भवतः ।

Digitized by Google

कुम्भ। प्रथमः कल्पः। वीरपुरुषोचितं वचनं दर्प-सन्धस्य।

दम्भ। वीरा किल इत्थं ण वीहंति[१]।

वसु। यद्येवं, कार्यसिद्धये प्रतिष्ठामहे।

(सर्वे उत्तिष्ठन्ति)।

(नेपथ्ये)।

सुधाकरं प्रपन्नैषा गुरुणैवोपपादिता।
अविघ्नं कौमुदी साक्षादभिभूय तमः परम्॥

वसु। (सक्रोधम्) अरे रे दुष्टवटो, मृगेन्द्रहस्तादाच्छिद्य मृगीं ग्रहीतुमिच्छसि। नन्वेष न भवसि।

एष त्वामद्यतोऽहला प्रतिपत्स्ये मनस्विनीम्।
अस्ताचलमनुप्राप्ते रवौ दीप्तिमिवानलः॥

(इत्युद्धतं परिक्रामति)।

दम्भ। भो वयस्स, ण क्खु गहीदुं इच्छइ[२]।

वसु। किन्तर्हि?

दम्भ। णं अग्गाहीदेव्व[३]।

(पुनर्नेपथ्ये)।

कापालिकं यतिकुलैककलङ्कमुच्चै-

---

(१) वीराः किलेत्थं न विभ्यति।
(२) भो वयस्य, न खलु ग्रहीतुमिच्छति।
(३) नन्वग्रहीदेव।

Digitized by Google

गर्व्वाविलघ्य वसुमित्रममित्रलोकम् ।
आहत्य वामचरणेन गता स्वकान्तं
सा कौर्त्तिवासमिव गोपसुता गिरीशम् ॥

वसु । आः पाप, इत्था स्तुतिपाठक, नन्वयमहम्,

असुधाकरमापाद्य जगदद्य न संशयः ।
ग्रहीष्ये कौमुदीं साक्षाद्क्षोभं प्रियसाहसः ॥

(सर्व्वे परिक्रामन्ति) ।

कुम्भ । (नेपथ्याभिमुखमवलोक्य) । एहि तीक्ष्णदंष्ट्र, एहि ।

(ततः प्रविशति सुन्दरकः । सर्व्वे विस्मितास्तिष्ठन्ति) ।

वसु । (स्वगतम्) कथं सुन्दरकः !

सुन्द । जेदु जेदु अमच्चो[१] ।

वसु । सुन्दरक, किमागमनकारणम् ?

सुन्द । भट्टारअस्स आणत्तो[२] ।

वसु । (सहर्षम्) किं देवो मामाज्ञापयति ?

सुन्द । ण क्खु ण क्खु[३] ।

वसु । (साशङ्कम्) का तर्ह्याज्ञप्तिः ?

सुन्द । इदं आणावत्तं अमच्चं गहीदत्थं कुणहिदु[४] ।

(इति पत्रमर्पयति) ।

---

(१) जयतु जयतु अमात्यः ।
(२) भट्टारकस्याज्ञप्तिः ।
(३) न खलु न खलु ।
(४) इदमाज्ञापत्रममात्यं गृहीतार्थं करिष्यति ।

Digitized by Google

वसु । (पत्रं गृहीत्वा वाचयति) परमेश्वरः समाज्ञापयति । विदितमेतद्युष्माकम्, आज्ञाभङ्गं न सहन्ते नरेन्द्राः —इति । तथापि पैतृकत्वममात्यः—इति क्षान्तमस्माभिर्बहुशः । साम्प्रतं पुनरनेकशो निवार्यमाणोऽप्यार्यपुण्यकीर्त्तिमधिकृत्य यमविनयमकार्षीः, नासौ क्षन्तुमर्हः । राजपुरुषाणां विशेषतस्त्वमात्यानां खल्वीदृशोऽविनयः सर्व्वमेव प्रकृतिमण्डलमाकुलयति । तदिदानीमप्यनुग्रहबुद्ध्यैवास्माभिरादिश्यसे, सकलद्रव्यमादायाविलम्बमितः प्रस्थीयताम् । स्वः खल्ववसुमिचं राष्ट्रमिच्छामि,—इति ।

(सर्व्वे विषण्णास्तिष्ठन्ति) ।

सुधा । (सविषादम्) हन्त हतोऽधिकारः !

साल । कुतः पुनरत्र विषादः ? उचितमेवैतत् ।

सुधा । (सकरुणम्) वयस्य, मा मैवम् ।

अधिकारपरिभ्रंशो मृत्युरेवाधिकारिणाम् ।
विशीर्य्यते पुष्पराशिर्मरुता हृतसौरभः ॥

साल । ननु मृत्युमप्यर्हत्येष वैधेयः ।

सुधा । अलमसद्भिनिवेशेन । आपन्नानुकम्पा हि महाव्रतम् ।

Digitized by Google

सुन्द । सेणावई विण्णवेदि, सोग्धं अणुचिट्ठीअदु भट्टारआदेसो त्ति[१] ।

वसु । (स्वगतम्) का गतिः ? (प्रकाशम्) विज्ञाप्यतां सेनापतिरेष देवादेशोऽनुष्ठीयते इति । अपिच, मद्वचनाद्विज्ञापयितव्यस्त्वया देवः ।

वसुमित्रेण देवानामाज्ञैषा शिरसा धृता ।
क्षम्यतामपराधोऽयं प्रणयस्तस्य पश्चिमः ॥

सुन्द । जं अमच्चो अणुवेदि[२] । (इति प्रणम्य निष्क्रान्तः) ।

वसु । (सनिर्वेदम्) ।

क्षणेन रङ्कोऽपि नृपत्वमेति
नृपोऽपि रङ्कत्वममार्ज्जनीयम् ।
हा धिक् कृतान्तस्य विलासमुच्चै-
स्तथापि न प्राणभृतां प्रबोधः ॥

तदेत, देवादेशमनुतिष्ठामः । (इति परिक्रम्य निष्क्रान्ताः सर्व्वे ।

(इति कौमुदीपरिणयो नाम गर्भाङ्कः) ।

सुधा । वयस्य, यत्सत्यमनेन वसुमित्रवृत्तान्तेन दुर्म्मनायितोऽस्मि । स खलु,

अलभत न स्पृहणीयं भ्रष्टः स्वपदाद्विडम्बितोऽप्यभवत् ।
सांयात्रिकइव जलधौ निमग्नपोतोऽथ रक्षितो दैवात् ॥

---

(१) सेनापतिर्विज्ञापयति, शीघ्रमनुष्ठीयतां भट्टारकादेश इति ।

(२) यदमात्य आज्ञापयति ।

Digitized by Google

साल। अलमपकारिणः करुणया। (नेपथ्याभिमुखमवलोक्य) कः पुनरयमागच्छति?

(ततः प्रविशति चेटी)।

चेटी। (प्रणम्य) भट्टारअ, क्खीरोदसरक्खीरगदा भट्टिणी विण्णवेदि, अज्जसालङ्काअणं दट्ठु पेक्खिदुमिच्छामि त्ति[१]।

सुधा। रक्ष्यतां सखीप्रणयः।

साल। एष रक्ष्यते। (इति चेट्या सह निष्क्रान्तः)।

सुधा। किमिदानीं करोमि। न च वसुमिचत्तान्तोपनतं दौर्म्मनस्यमपैति। (विचिन्त्य) भवतु। उपवनशोभानिर्व्वर्णनेनैतदपनयिष्ये। (परिक्रम्य प्रवेशं रूपयित्वाऽवलोक्य) अहो साम्प्रतमुपवनस्य रमणीयता!

विकसितकतिपयपुष्पं जलयन्त्रजलैर्निषिक्तमेतदभितः।
मसृणज्योत्स्नाधौतं प्रविरलतारं गगनमिवाभाति॥

(किञ्चिदूर्द्धमवलोक्य) कथमवसानभूयिष्ठो दिवसः। तथाहि,

---

(१) भट्टारक, क्षीरोदसरक्षीरगता भट्टिनी विज्ञापयति, आर्य्यसालङ्कायनमिह द्रष्टुमिच्छामीति।

Digitized by Google

ज्वलत्तेजोराशिः प्रलयमुपयास्यन्नचिरतः
पयोराशेः साक्षादुपरि विवृणो लम्बितवपुः ।
प्रचण्डश्चण्डांशुर्विरहविधुरोऽयं मृदुरभू-
न्नलिन्या न प्रायः स्फुरति परिखिन्नो गुरुरपि ॥

अपिच ।

व्यालम्बे कमलैकवान्धवदृशे स्नानेऽथ रक्तालिषि
प्रेम्णेवोन्मथिते कथं कथमपि स्वैरं शनैर्गच्छति ।
सन्ध्यामारुतलालिताऽपि मधुपैर्गुञ्जद्भिरास्वासिता
संप्रोष्यत्पतिकेव योषिदधुना स्वायत्यसौ पद्मिनी ॥

(ततः प्रविशति हस्तः सालङ्कायनश्च) ।

साल । (सहर्षम्) **वयस्य, दिष्ट्या वर्द्धसे । एषा खलु महानुभावा प्रियसखी सुन्दरीं मह्यमर्पितवती ।**

सुधा । (स्वगतम्) **जानामि ।** (प्रकाशं सहर्षम्) **निर्वृतोऽस्मि ।**

साल । यावदिममभ्युदयवृत्तान्तं अम्बायै निवेदयिष्ये ।

(इति निष्क्रान्तः) ।

सुधा । (परिक्रम्य) **काममुपवनशोभामवलोकयतः प्रसीदति मे चेतः । इदं हि,**

गन्धामोदितदिङ्मुखं कुसुमितैर्व्याप्तं सदा शाखिभि-
र्वल्लीभिर्नवपल्लवाभिरभितः पुष्पोद्गमाभिः श्रितम् ।
धारायन्त्रविमुक्ततोयकणिकाघर्मोदबिन्दुस्फुर-
च्छोभिः स्तवकस्तनाभिरभवत् स्थाने मनोबन्धनम् ॥

Digitized by Google

(अग्रोक्तवदवलोक्य) **कथमसुना पुष्पमात्रधनुषा ससुरासुरं जगदधीकरोति भगवान् मकरकेतनः ?**

(विभाव्य) **अथवा, किमत्र चित्रम् ? अविचिन्तनीय-प्रभावः खल्वसौ । तथाहि,**

अशोकः शोकाग्निं ज्वलयति विशोकाकुलहृदां
शरत्वं पञ्चेषोरपि परिगतो वक्त्रमि कृतः ।
प्रियासंयुक्तानां श्वयति पुनराकल्परचनां
प्रतीपोऽयं लोके जयति महिमा पुष्पधनुषः ॥

(विलोक्य) **कष्टमतिकरुणमग्रे वर्त्तते !**

दुर्वारविरहक्लेशैः प्रत्यासन्नैर्विलोड़ितः ।
आलपत्यवशः स्नेहाच्चक्रवाकः प्रियामसौ ॥

(अन्यतोऽवलोक्य) **हन्त हन्त ललितमितोवर्त्तते ।**

गाढ़मेषा समालिङ्ग्य लतान्तिः कुसुमस्मिता ।
द्विरेफकलझङ्कारैराभाषतइव प्रियम् ॥

(विचिन्त्य सकरुणम्) **सर्व्वथा सुखपरिपन्थी कृतान्तः । कालेन खलु,**

स्तवकस्तनरमणीयां प्रवालहस्तां सरागसुकुमाराम् ।
अद्योऽविलो हरिष्यति लतामिमां विटपिनोऽन्त ॥

(विभाव्य) **अप्रतिकार्य्यः खल्वयं प्रकारः । तत्किमनेन चिन्तितेन ?** (निरूप्य सस्मितम्) **कथमस्तमितएव

Digitized by Google

त्रिभुवनतलैकमणिप्रदीपे प्रचण्डातपे मार्त्तण्डे विजृम्भितमन्धकारैः। तथाहि,

तिरोहिते सहस्रांशौ तमःस्तोमो विजृम्भते।
दुस्त्यजो मलसंघातो मायाच्छन्नदृवात्मनि॥

(विभाव्य) **आश्चर्यमाश्चर्यम्!**

दूरस्थितानां तरुवल्लरीणा-
मापाद्य साचादिव सन्निकर्षम्।
आराममध्येऽपि वनान्तशोभा-
मारोपयत्येष किलान्धकारः॥

अहो तीव्रकारित्वं दोषाणाम्!

क्षपयति तिमिरास्त्रियादृशं वस्तुजातम्
न खलु न खलु तादृक् रञ्जयत्युष्णरश्मिः।
कदव विधिविड़म्बो मर्त्यलोकस्य योऽयं
चिरमिव गुणलेशं दोषमाश्वभ्युपैति॥

(विभाव्य) **उचितमेवैतत् संविधानकम्, यत् खलु,**

तामसं कर्मसन्तानं तन्वन्ति किल तामसाः।
सहसा साहसप्रायास्तमस्तेषां सहायकृत्॥

(दिशोऽवलोक्य) **अलमतः परमिह स्थित्वा। तिमिरितप्रायोऽयं प्रदेशः। तदुदवसितमेव गच्छामः।**

(इति परिक्रामति)।

Digitized by Google

(ततः प्रतिगृति सम्भ्रान्तः साक्षद्वायनः)।

साल । वयस्य, हृता हृता ।

सुधा । का ?

साल । सा ।

सुधा । कथ्यतां, का सा ?

साल । अशोकसामान्या ।

सुधा । कस्य ?

साल । भवतः ।

सुधा । (सविरागम्) आः कोऽयमद्य ते दारुणः परिहासः ?

साल । वयस्य, न खलु परिहासः । सत्यमेव । हृता साऽशोकसामान्या भवतः ।

सुधा । (सोद्वेगम्) केन ?

साल । तेन वैरिणा ।

सुधा । आः, प्रभिन्नाक्षरमभिधीयताम् । केन वैरिणा ?

साल । कापालिकेन ।

सुधा । हा प्रिये, कौमुदि, कवलिताऽसि क्रूरेण ।

(इति मोहमुपगतः)।

साल । (ससम्भ्रमम्) वयस्य, समाश्वसिहि समाश्वसिहि ।

सुधा । (समाश्वस्य) अलमतः परं समाश्वस्य ।

साल । शान्तं पापम् । न खलु तत्रभवतीं कौमुदीमधिकृत्य ब्रवीमि । किन्तु,—

Digitized by Google

हृता साऽलोकसामान्या भवतस्तेन वैरिणा।
कापालिकेन मद्धस्तादलान्मङ्गलमुद्रिका॥

सुधा। (सामर्षम्) कथं पुनस्तां मुद्रामपहरन्नुपेक्षितः कापालिकापसदो वयस्येन?

साल। (सविषादम्) वयस्य, न पारितं मया तस्योपरोद्धुम्।

सुधा। तेन हि मिलितावावां तं दुष्टमन्विष्यावः।

साल। यथा रोचते वयस्याय।

सुधा। असिरसिः।

(प्रविश्य वञ्जुलकोऽसिमर्पयित्वा निष्क्रान्तः)।

सुधा। वयस्य, एहि, गच्छाव इदानीं कापालिकाविनयस्य प्रतिकर्त्तुम्। (इत्यसिमादाय निष्क्रान्तौ)।

इति कौमुदीसुधाकरे चतुर्थोऽङ्कः॥

Digitized by Google

पञ्चमोऽङ्कः ।

(ततः प्रविशति विषण्णः साधुशायनः) ।

साधु । (निःश्वस्य) । अहो प्रातिकूल्यं दैवस्य !

तमिस्रपक्षं परिभूय यातः
सुधाकरस्यद्धिकया च योगम् ।
तस्याभिषङ्गं जनयन्नकाण्डे
तां काप्यनेषीच्च घनोदुरन्तः ॥

ह्यः किल प्रदोषे ललितोद्यानसुषमाऽवलोकनकुतूहलोद्दीपितान्तरा एकाकिन्येव तच्चभवती कौमुदी तच्च गता । यावन्नृहीतार्थः परिजनस्तामनुसरन्नुद्यानपरिसरं प्राप्तस्तावदसौ कुतोऽप्यन्तर्हिता । अतः परिजनोऽप्यनभिज्ञोवृत्तान्तस्य । प्रियायामनार्य्यकारी दुष्टः कापालिकोऽपि मयैव व्यापादितः । तत् किमच्च निमित्तमिति न खल्वधिगच्छामि । वयस्यस्त्वनेन प्रत्यग्रशोकावेगेनोन्मादितइव इतः कौमुदी ततः कौमुदी कुतः कौमुदी,—इति जल्पन् अश्रुप्लावितवदनकमलः कथं कथमपि धारयति जीवितम् । यद्या च तस्य मनसोविकारस्तथा प्रेक्षे, नून-

Digitized by Google

मप्रतिकार्य्योभविष्यति। सर्व्वथा भगवत्योदेवताः स्वस्ति करिष्यन्ति। (विचिन्त्य)। कुतः पुनरचभवत्याः प्रवृत्तिमुपलप्स्ये।

(परिक्रम्य निःश्वस्य)।

अयमपरः श्लीपदस्योपरि विष्फोटकोद्भेदः, यत्तचभवत्या विप्रयोगेणातिमाचमाकुलिता प्रियतमा मे सुन्दरी।

तथाहि,

व्याहृताऽपि मधुरं न भाषते
सान्त्विता न च धृतिं प्रपद्यते।
गाढ़मश्रुसलिलैः परिप्लुता
सा दुनोति हृदयं दिवानिशम् ॥

अपि च।

प्रत्यग्रशोकाश्रुभिरुज्झवह्निः
परिस्फुरत्स्मेरमुखं प्रियायाः।
हिमप्रपातैः प्रथमैरिवाभूत्
म्लानं समुत्फुल्लमिवारविन्दम् ॥

(विभाव्य निःश्वस्य च)।

किमहमिदानीं करोमि मन्दभाग्यः?

किं सान्त्वयामि दयितामथवा वयस्य-
मन्वेषयाम्युत सखीं सुलभव्यलीकाम्।

Digitized by Google

दयिताविरहाकुलं न खलु ग्लानिमुपैति सत्यं
लोनं नु लक्ष्मणविरहैर्मथितं नु चेतः ॥

भवतु, प्रियतमामास्वास्य प्रियवयस्यं सम्भावयामि ।

(निष्क्रान्तः । विष्कम्भकः ।)

(नेपथ्ये सुधाकरस्य प्रावेशिकी ध्रुवा ।)

दइआविरहाउलिओ पच्चग्गोवणअणोअविअलमणो ।
पिअअम अण्णेसन्तो मिलाणकन्तो परिब्भमइ[१] ॥

(ततः प्रविशत्युन्मादावस्थः सुधाकरः) ।

सुधा । प्राप्तयं श्मशानभूमिः । (विलोक्य) अहो रौद्रता श्मशानवाटस्य । अयं हि,

व्याकीर्णैः केशपाशैरधिकतरमिलद्रूक्षतैर्दुर्निरीक्ष्यैः
कङ्कालैः शङ्खशुभ्रैरविकलसकलैर्भूयसाऽभ्युपेतः ।
काष्ठैरर्द्धावदग्धैर्गलितचरणशिरःपाणिमध्यैः शरीरै-
रङ्गारैश्चापि भीमः कुणपशयनकैः सम्परीतश्चिताभिः ॥

अपिच,

ज्वालामालावलीढ़चिदग्रपुरवधूवस्त्रखण्डः प्रचण्डो-
मेदोमज्जास्थिधातुप्रचुरपरिचयस्तुङ्गमापिङ्गलाभः ।

---

(१) दयिताविरहाकुलितः प्रत्यग्रोपनतशोकविकलमनाः ।
प्रियतमामन्वेषयन् ग्लानकान्तिः परिभ्रमति ॥

Digitized by Google

घोरारावश्चिताभ्योज्ज्वलति परिमिलत्सप्तजिह्वाकरालो-
वह्निर्गर्व्वं शरीरेष्वखिलमसुभृतां दर्शयिष्यन्नसारम् ॥

स्थाने खलु श्मशानं वैराग्यस्थानमुपदिशन्ति । लोकानां खलु,

अर्द्धावदग्धविकटास्थशरीरघोरा-
भूयः चरद्वसतैलवसाऽऽमांसाः ।
विस्तारितोरुदशना मदगर्व्वमुचै-
रेते चितानलगताः कुरुपा हसन्ति ॥

(चर्चर्या विचिन्त्य) **यदा कुरूपा अपि हसन्ति, तदा वयमपि किं न हसामः ? (उपविश्य) भवतु हसामः ।**

(अनन्तरं चर्चरी) ।

चिउरप्पअरे पिअकाणणए
परिदाहमए कुणवाट्ठिमए ।
समिदङ्गअलेअरओ मअओ
पुरिसे हसइ क्खु विआरमओ[१] ॥

(विहस्य । पुनश्चर्चरिकया विचिन्त्य) **अथवा न हसामि ।**

(विहस्य । पुनः "चिउरप्पअरे"—इत्यादि पठित्वा) ।

यावत्प्रणष्टां प्रियामस्मिन् श्मशानकान्तारे अन्वेषयामि । (इत्युत्थाय परिक्रामति) ।

---

(१) चिकुरप्रकरे पिटकाननके परिदाहमये कुणपास्थिमये ।
सामिदग्धकलेवरकोमलकः पुरुषान् हसति खलु विकारमयः ॥

Digitized by Google

(नेपथ्ये साट्टहासं सत्रासं च)।

(वामदेवावलोक्य) अहो प्रमोदनिर्भरः पिशाचाङ्गनानाम्!

अस्त्रैः कल्पितभूरिवेग्रचनाः कङ्कालमालाधरा-
मेदोभिर्मिलितरां विलिप्तकरणा धाराङ्किताः शोणितैः।
दीर्घाङ्गोविकृताननाट्टहसिता रूक्षाम्बका दक्षुराः
संशुष्काः पिशिताशनप्रमुदिता नृत्यन्ति भूताङ्गनाः॥

(द्विपदिकया विलोक्य)।

हन्त हन्त! अदर्शनीयं खल्वग्रे वर्त्तते। एते खलु पिशाचाः,

प्रेतादुत्कृत्य त्वचिं प्रकटितदशनैः खण्डखण्डानि मांसा-
न्यादायादाय जग्ध्वा स्वतरसकृमियुक्पूतिगन्धीनि भूयः।
मस्तिष्कं द्राक् करोटीचषकपरिगतं काममापीय पश्चा-
दाचुष्याचुष्य मज्जप्रचुरमिति मुहुस्वर्व्वयन्त्यस्थिशङ्खम्॥

(चर्चरिकया प्रतिनिष्क्रम्य)।

किमित्यस्याममेध्यभूमौ प्रियतमाऽन्विष्यते। (विचिन्य साट्टम्)। आं स्मृतम्। पापः खण्डमुण्डस्तामपहृत्य कदाचिदिहानयेत्? स्थाने खलु श्मशानं साधनस्थानं पापानाम्।

(द्विपदिकया दिशोऽवलोक्य)।

Digitized by Google

कथं न कुत्रापि प्रियतमा ! तत्कुतः खल्वस्याः प्रवृत्ति-मुपलप्स्ये ? (विभाव्य) पुनरपि कदाचित् पापया दृष्ट-तापस्या तुङ्गपर्व्वतं नीता भवेत् ? (सकरुणं विचिन्त्य) भव-तु, तत्रैव गच्छामि । (इति परिक्रामति)।

(खड्गधारा)।

विरहालिङ्गमाणसओ
पिअअमपेक्खणलालसओ ।
बाहोदुग्गिअदिट्ठिअओ
गाहइ गहणं गइंदओ[१] ।

(चक्षुरिकया अवलोक्य)।

अयं तुङ्गपर्व्वतः । यावदधिरोहामि । (इति गात्रेणाधि-रोहति)।

(द्विपदिकया दिशोऽवलोक्य)।

दट्ठूआविरहाउलओ दुक्खालिङ्गुअहिअअओ ।
सरवरजले किलंतओ तम्मद चक्कजुआणओ[२] ॥

(सविषादम्) कथं न दृश्यते ! (सकरुणम्)।

---

(१) विरहाक्षीढ़मानसकः प्रियतमाप्रेक्षणलालसकः ।
बाष्पदूनदृष्टिकः गाहते गहनं गजेन्द्रकः ॥

(२) दृष्टिताविरहाकुलकः दुःखाक्षीढ़हृदयकः ।
सरोवरजले क्लान्तकः ताम्यति चक्रयुवकः ॥

Digitized by Google

प्रत्यूहं परिभूय नाम कथमप्यासादिता प्रेयसी
सोढ़ोनाम्नि कृतान्तदुर्विलसितैस्तस्मात् सुखं निर्विघ्नन् ।
(साश्रुम्) ।
अन्योन्यं प्रणयस्तु नौ प्रतिपदं भूयोऽतिभूमिङ्गतः
क्वासौ मे दयिता क्व चाहमकृती हा हन्त कोऽयं विधिः ! ॥
(इति मूर्च्छितः पतति) ।
(पुनर्दीपदीपिकयोत्थाय सविषादम्) ।
को नु खल्वयं प्रकारः ? (निःश्वस्य) ।
स्वप्नं निर्वृतिमन्तराधरहितां प्रेम प्रियायां कृतं
हा कष्टं विरहो दहत्यतितरां विस्मर्यते तत् कथम् ?
आदातुं मणिमप्यसम्पदमहो मन्दोविलाग्नं गतो-
दृष्टस्तच्च भुजङ्गमेन विषमज्वालाकुलस्याम्यति ॥
(विमृश्य) । **सोऽयमस्मदीयानां भाग्यविपर्य्ययानां दारुणः परिणामः ।**
(अनन्तरं चर्चरी) ।
विरहुम्मादोम्मथिअहिअओ
गरुअरपेम्मुग्गमिअसुदुक्खो ।
कसणङ्ग विअ परिक्खीणमिअङ्को
दीसइ विअ दवदहणअरुक्खो(१) ॥

---

(१) विरहोन्मादोन्मथितहृदयः गुरुतरप्रेमोद्गमितसुदुःखः ।
कृष्ण इव परिक्षीणमृगाङ्कः दह्यते इव दवदहनवृक्षः ॥

Digitized by Google

(विचिन्त्य) । सर्व्वथा भवितव्यताऽत्र बलवती । (विभाव्य) तत्किमेनामुपालप्स्ये ? (पुनश्चर्चरी) भवतु । उपालभे ।

(चर्चरिकयोपविश्य । जानुभ्यां स्थित्वा) ।

भगवति, भवितव्यते, मन्दभाग्ये मयि किमिदमकरुणत्वं भवत्याः ?

(वामकेन चलित्वा । आकाशे) ।

किमाह भवती,—किं नैर्घृण्यमनुष्ठितम् ? —इति । (सकरुणम्) भगवति, यदि मे सौभाग्यं न सहसे, मा सहस्व । किमेवं मामतिमात्रं दुःखाकरोषि ? (विचिन्त्य) अहो नैष्ठुर्य्यं भवितव्यतायाः ! कथम् ?—इति ।

कादम्बिनी यदिह कातरचातकाय
दत्ते न वारि सरसाऽपि न तत्र चित्रम् ।
दुःखं तदेतदसुमेकरसं मुहुर्यत्
सन्तर्ज्जयत्यलघुगर्ज्जिततीव्रशब्दैः ॥

(द्विपदिकयोत्थाय) ।

अलमस्याः परव्यसनरुचेरुपालम्भेन ?

व्यसनमथ परेषां निर्व्यथं यो विधत्ते
न खलु न खलु तस्मात् खेदमाप्नोति किञ्चित् ।
स कुटिलमतिरेतत्कातरोक्त्याऽभ्युपात्तै—
र्व्रजति न करुणत्वं किन्तु भूयः प्रमोदम् ॥

Digitized by Google

तत्किमनया परव्यसनसन्तुष्टया ? यावत् प्रस्थां प्रियतमामेवान्विष्यामि । (इति परिक्रामति)।

(अनन्तरं चर्चरी)।

कोवं मञ्जि मा करिहि दुरंते
णट्ठा मज्झ मिअलोअणि कन्ते।
परपुट्ठा जह सुलहिअसद्दा
विज्जूवआ विअ सुहलद्धा[१] ॥

(वाधां रूपयित्वा)।

को नु खल्वयं सूचीव्यधैर्मां व्यथयति ? (चर्चरिकया विचिन्त्य)। आं ज्ञातम्। वसन्तसखो मलयानिलः परागवर्षैर्बाधते।

(अञ्जलिं बध्वा)।

भगवन्, दक्षिणपवन, साधु खल्विदं बन्धुकृत्यमनुष्ठितम्। एतत्तु विज्ञापयामि,

जगत्प्राणो मम प्राणान् कथं व्यथयसि प्रभो।
मन्दभाग्ये मयि तथा भूयः कथमदक्षिणः ॥

अथवा। भाग्यविपर्ययस्यायं प्रकारः, यत् शीतोऽप्युपचारः सन्तापयति।

---

(१) कोपं मयि मा कुरु दुरन्तं नष्टा मम मृगलोचनी कान्ता।
परपुष्टा यथा सुखलितशब्दा विद्युदिव सुखरिता ॥

Digitized by Google

मम हि,

अन्तः सन्तप्यमानस्य स्निग्धवान्धवक्रिया यथा ।
कोटरज्वलनसृष्टतरोर्वृष्टिरिवोपरि ॥

भवतु । अभ्यर्थयाम्येनम् ।

हंहो मलयानिल,

त्वं सर्व्वगो भवसि नार्हसि तद्विहन्तुं
याच्ञामिमां विधिवशान्मम दूरबन्धोः ।

(आत्मानं निर्दिशन्) ।

निःश्वाससौरभविशेषितगात्रगन्धं
तस्या वहन् क्षणमिमां तनुमाखजस्व ॥

कथं वाधतएव! किमहमेकाकी करोमि ? (विमृश्य) क्व नु पुनः सखा मे सालङ्कायनः ? न खलु दयितासमागमहर्षितेन स्मरति मे मन्दभाग्यस्य ? उपालभे तावदेनम् ।

(अनन्तरे चर्चरी) ।

विरहाउलओ परिवाउलओ
सहअररहिओ मिअराअअओ ।
गहणे विहिणे वेअ भमन्तो
तम्मइ णिअपिअअम सुमरन्तो(१) ॥

---

(१) विरहाकुलकः परिव्याकुलकः सहचररहितो मृगराजगतः ।
गहने विपिने एव भ्रमन् ताम्यति निजप्रियतमां स्मरन् ॥

Digitized by Google

(आकाशे) ।

सखे,

स्मरसि किं ? दयिताधरमाधुरी-
मधुकर, प्रणयस्यमिमं जनम् ।
परिचयो न सतां प्रतिहन्यते
न च मनो हितयग्रहणक्षमम् ॥

भो वयस्स, आयरणेण मए लक्खीअदि[१] । (इति नर्त्तित्वा) । चर्चरिकया पुनः "स्मरसि किं"—इति पठित्वा । (विहस्य । पुनश्चर्चरी) । पुनस्तदेव पठित्वा । (विभाव्य सकरुणं निःश्वस्य) अथवा । नाहमिदानीं वयस्ययोग्यो भवतः । कुतः ?

दयितासहितोऽद्य भवानमृतार्णवगाहमानइव हृष्टः ।
प्रतिकूलविधेरधुना प्रियया नितरां वियुक्तोऽस्मि ॥

(इति मूर्च्छितः पतति) ।

(द्विपदिकयोत्थाय सोद्वेगम्) ।

हन्त हन्त ! दृष्टमाचा पुनरप्यपक्रान्ता मे प्रियतमा । (विभाव्य) । नूनमिहैव वर्त्तते । अन्विष्यामि तावत् ।

(पदद्वयं पुरत उपसृत्य) ।

(सवितर्कम्) । किमित्येवङ्गतमपि मामपहाय गता ? न

---

(१) भो वयस्य, आचरणेन मया लक्ष्यते ।

Digitized by Google

खलु क्रीड़ितमेतत् ? भवतु । उपालभे तावदेनाम् ।

(अनन्तरं चर्चरी) ।

कहं मज्झि पिअअम दिट्ठा णट्ठा ।
मिअपइलोअणि विअ परपुट्ठा[१] ॥

(आकाशे) ।

नयनान्तरिताऽपि सुन्दरि,
भवसि त्वं यदि निष्ठुरा सती ।
मनसस्तु परोक्षवृत्तितां
मम गन्तुं दयिते, न पार्य्यसे ॥

(तेन नर्त्तित्वा । पुनश्चर्चरी । विहस्य) । पुनर्नयनान्तरितेति पठित्वा । (विभाव्य सकरुणम्) । कथं प्रलयोपनतः स्वप्नोऽयं न पुनः परमार्थतः प्रियासमागमः ! (इति मूर्च्छति) ।

(उत्थायोपविश्य) ।

(सविषादम्) । किमत्र करणीयमिति न खल्वधिगच्छामि । अहह, कथं प्रबोधोऽपि दुःखहेतुरस्तमितभागधेयानाम् ! (विचिन्त्य) । अथवा । प्रतीपोविधिः सर्व्वं प्रतीपयति ।

---

(१) कुत्र मम प्रियतमा दृष्टा नष्टा ।
मृगपतिलोचनी इव परपुष्टा ॥

Digitized by Google

मम हि,

प्रलयोऽपि सुहृन्नीयो यदि तच्च मृगेक्षणा विलोक्येत ।
न पुनर्वियोगपरुषः प्राणेश्वर्याः प्रबोधोऽपि ॥

अपिच ।

अपनेयोऽपि प्रलयः श्लाघ्यो दयितासमागमोपायः ।
इति मे दग्धकृतान्तस्तमपि न सहते वताप्यभाग्यस्य ॥

(इति सकरुणं विभाव्य)।

(सुरकः)।

पिअअमविओअविसूरणओ
दूरुआविरहदुक्खादूअहिअओ ।
अहिअवाउग्गमम्मिलाणमुहओ
मन्थरगदूओ भमइ कुरङ्गओ[१] ॥

(सुरकानन्तरे घर्घरी)।

मउअरपरउअमउरुरूएहिं
सुन्दरसिणिद्धअवरूवेहिं ।
दक्खिणपवणुव्वेल्लिअकिसलअणिअरू
करइ मज्झि णट्ठा पिअ सदा विअ मणोहरू[२] ॥

---

(१) प्रियतमाविरोगविसूरणाकः दयिताविरहदुःखार्दितहृदयः ।
अधिकवाष्पोद्गमम्लानमुखकः मन्थरगतिक्षोभमति कुरङ्गकः ॥

(२) मधुकरपरभृतमधुरखनैः सुन्दरस्निग्धकवरूपैः ।
दक्षिणपवनोद्वेल्लितकिसलयनिकरे कुरु मम वसतिं प्रिया सतेव मनोहरा ॥

Digitized by Google

(विभाव्य । सास्रम्) । अहह !

दृष्टे यस्मिन् भवति करणं लुप्तवेद्यान्तरं द्राक्
लोलं चक्षुर्युगमपि सततं वीक्षितुं व्यग्रमास्ते ।
चेतो यस्य स्मृतिमपि रसान्मन्यतेऽत्युत्सवं मे
सोऽयं जातो वत नयनयोः प्रार्थनीयो जनोऽस्तम् ॥

(इति पुनर्मूर्च्छति) ।

(क्षणान्तरे संज्ञां लब्ध्वा) ।

(निःश्वस्य) । अहो मदीयानां दुरितानां दारुणः परिणामः, यस्य प्रभावात् आप्यायनमपि व्यथयति !

(पाठस्यान्तरे भिन्नकः) ।

पिअवज्जिअओ विरहाउलओ
परिदुक्खिअओ मिअराअमओ ।
उअ दुम्मिअओ पिअपेम्मरओ
अहिअं भमइ परिसुद्धमई[१] ॥

(द्विपदिकया परिक्रम्य) ।

कथमिति ?

प्रीतिर्यत्र प्रतिपदमहो निर्विशेषाऽप्यकाण्डे
भावाविद्धा भ्रुकुटिरचना यत्र कोपं व्यनक्ति ।

---

(१) प्रियावर्जितकः विरहाकुलकः परिदुःखितकः मृगराजमतः ।
पश्य दूनकः प्रियाप्रेमरतः अधिकं भ्रमति परिसुग्धमतिः ॥

Digitized by Google

लोकातीतामृतमपि सदा यच्च बिम्बाधरान्तः
प्रेम्णस्तस्मादहह मधुराद्ह्यते मेऽन्तरात्मा! ॥
(सविषादम्)। अहह! कथमिति?
अल्पं यच्च व्रजति गुरुतां वस्तु लब्धप्रसादा
दृष्टिर्यच्चामृतरसपरिस्यन्दिनी यच्च गर्हा।
अश्रून्मेषो लक्षितमधुरे प्रेम्णि तस्मिन्निमग्नो-
मुग्धो दग्धैर्विधिविलसितैर्दूयते मेऽन्तरात्मा ॥
भवतु। अन्यस्मिन्नवकाशे प्रियामन्वेषयामि।
(चर्चरिकयोत्थाय परिक्रम्य)।
(निःश्वस्य)। अहो प्रकारो भाग्यविपर्य्ययस्य!
तड़िदिव वपुरुच्चैः कम्पयत्येव भूयः
स्पृशति हृदयमेतन्मर्म्मजालानि चैव।
विरह दह नितान्तं संप्रमाथी प्रियायाः
न खलु विधिवशात्मे चेतना तु व्यपैति॥
(चर्चरी)।
विरहविकारसुमहिअहिअअओ
वज्जविअवेअणविअलिअधीरओ।
तम्मइ कुसुमप्पअरमणोहरु
दूमिअहिअओ अहिअं वनअरु(१) ॥

(१) विरहविकारसुमथितहृदयकः
वज्रविधवेदनाविगलितधैर्य्यकः।
ताम्यति कुसुमप्रकरमनोहरे
दूनहृदयः अधिकं वनवरे॥

Digitized by Google

(चर्चरिकया विचिन्त्य)।

अहह!

सुप्तः क्लेशज्वालावलयविषमेऽस्मिन् कतिपये
प्रियाप्रेम्णा प्रायो जगति सुखिनो धन्यजनुषः।
वयन्त्वेतेनैवोन्मथितमनसः क्लेशबडुलाः
ममैवोच्चैर्जन्मान्तरदुरितविस्फुज्जथुरयम् ॥

(इति सकरयं विचिन्त्य। द्विपदिकया परिक्रम्योपविश्य)। (सविषादम्)।

अकरुणविधिनाऽभूत् प्रेयसीविप्रयोगो-
हतहृदयमिदानीं तद्बलीकक्रमेण।
स्फुटति किमति नैतच्चेतना किं न धाता
किमपरमिदमुच्चैर्वज्रसारं मनो मे ॥

अहो असम्यक् कारित्वं दैवस्य! (पुनः सकरयं अकरुण-विधिनेति पठित्वा, पुनः साधिक्षेपं तदेव पठित्वा, निःश्वस्य)।

अकरुणविधिजन्मा विप्रयोगः प्रियायाः
दहति हृदयमध्वा कूकुलोत्थाग्निकल्पः।
भवति यदि तदेतन्नक्षमाचावशेषं
तदुचिततममुच्चैः स्यात् कृतान्तस्य कृत्यम् ॥

(इति विभाव्य द्विपदिकयोत्थाय)।

(खड्गधारा)।

पिअअमविओअजणिएहिं पचग्गसुसंदावेहिं।

Digitized by Google

अव्वो दुम्मिअमाणसओ वज्जइ गहणे दुक्खिअओ[१] ॥

(पदद्वयं पुरत उपसृत्य पुनरुपविश्य)।

(निःश्वस्य)। हा प्रियतमे, क्व गताऽसि ? (सकरुणम्)।

आस्वादिता सुरवधूरिव पुण्यपुञ्जैः
सम्प्राप्य कानिचिदहानि मयोपभोगम् ।
भूपालमन्धिरशनेव भयप्रमत्तं
मां मन्दभाग्यमपहाय गता प्रिया मे ॥

(इति मूर्च्छितः पतति)।

(उत्थायोपविश्य)।

अथवा। विरहेऽपि मत्प्रियासम्बद्धः, इति नास्ति मे द्वेषः।

(उत्थाय परिक्रामति)।

(अनन्तरं चर्चरी)।

वज्जविअविआरविमद्दिअहिअअओ
गरुअरवेअणाक्खलिअधीरओ ।
कुसुमप्पअरुम्मादिअहिअओ
तम्मइ काणणए जुआणओ[२] ॥

---

(१) प्रियतमावियोगजनितैः प्रत्यग्रसञ्चलापैः ।
अहो दूनमानसकः अस्ति गहने दुःखितकः ॥

(२) वज्रविधविकारविमर्दितहृदयकः
गुरुतरवेदनास्खलितधैर्यकः ।
कुसुमप्रकरोन्मादितहृदयः
भ्राम्यति कानने युवकः ॥

Digitized by Google

पुनः, विरहेऽपि,—इति पठित्वा। (विमृश्य) तथाप्यनुपक्रम्योऽयमातङ्कः।

किमिति ?

तद्विप्रयोगजनितैः कुसुमेषुतापै-
र्दाहोऽपि तत्कृततरति स्पृहनीयएव।
दुःखन्त्विदं मनसि मे विरहाग्नितप्ते
सा सर्व्वदा स्थितवती परितप्यते यत्॥

(विचिन्त्य) वृथा खलु मया मनसः सन्तापदृष्टिः क्रियते। यदा प्रियतमा मे मनस्येव निरन्तरं वर्त्तते, तदा किमित्यात्मनः खेदमुत्पादयामि।

(चर्चरी)।

मऊअरमऊरविरुअमणोहरु
धाराहरु विअ सुचिक्कणिअरु।
विज्जुलिपीअवसणमणोहरु
णट्ठा पिअ विअ मुद्धकणेरु[१]॥

(विहस्य, यदा प्रियतमा, इत्यादि पुनः पठित्वा)।

कथमिति ?

---

(१) मधुकरमधुरविरुतमनोहरा
धाराधरवत्सुचिकुरनिकरा।
विद्युत्पीतवर्णमनोहरा
नष्टा प्रिया इव मुग्धकरेणुः॥

Digitized by Google

प्रकल्प्य लोकं मनसाऽपि तावत्
तस्याः स्वमात्मानमवैमि धन्यम्।
चिन्ताऽप्यशक्तौ विहिता फलाय
प्राप्तोऽनुकल्पो मधुनो गुडोऽयम्॥

(तेन चर्चरिकया नर्त्तित्वा। पुनः प्रकल्प्य,—इत्यादि पठित्वा। पुनश्चर्चरी। पुनर्नर्त्तित्वा। विहस्य। पुनस्तदेव पठित्वा)।

(गणितकः।)

(विचिन्त्य। सविषादम्) अथवा। असदृशं पुनरेतदुपन्यस्तं, न खल्वेतदेवंविधम्। कुतः?

साक्षात् यद्यपि दुर्लभः प्रियतमालोकोत्सवालोकादिभे-
रन्तः किन्तु तथापि हन्त दयिता निर्व्वर्ण्यते सर्व्वदा।
तच्चिन्तोपनतेऽपि यो मम भवत्यानन्दसान्द्रोदय-
स्तस्मिन् केवलमात्मसाक्षिणि सुखे व्यर्थाः कवीनां गिरः॥

अहो असदृशव्यवहारो मनसः! यदिदमेवं गतमपि प्रियासमागमं नाभिनन्दति। (विभाव्य) अथवा। नायं मनसो दोषः। यतः,

हृदि स्थिता यद्यपि पद्मवक्त्रा
न पश्यतस्तां मम यस्तथापि।
क्लेशो भवत्यल्पगिरां कवीनां
स्थाने निदृक्षाः खलु तत्र वाचः॥

तत्कुतः पुनर्दयितां प्रेक्षिष्ये? न खलु प्रत्यक्षोपलम्भो-

Digitized by Google

ऽपि सुलभ। (विचिन्त्य निःश्वस्य) हृथा खल्वस्मदीयोऽन्तरात्मा क्लिश्यते।

गतैव सा पद्मपलाशनेत्रा
न नाम तस्याः पुनरागमोऽस्ति।
हृथैव सङ्कल्पशतं मनो मे
तनोत्यभित्ताविव चित्रकर्म॥

(इति मूर्च्छति)।

(उत्थाय परिक्रम्यावलोक्य च)।

कथमयमशोकतरुः! (उद्वेगं रूपयित्वा) कथमशोकोऽपि शोकहेतुरस्मद्विधानाम्! भवतु। विज्ञापयाम्येनम्।

(अञ्जलिं बद्ध्वा)।

भगवन्,

त्वं कामिलोकहृदयेशयपञ्चकल्पं
निःशोक, पुष्पधनुषः कुसुमास्त्रजालम्।
किं भीषणोषि बहुशो नितरामबोधं
शोचन्ति यैर्विरहिणः प्रहताश्चिरस्य॥

शृणुमस्तावत्किमयं वक्ति। (इति दत्तकर्णोत्पलौ तिष्ठति)।

(द्विपदिकया विलोक्य)।

(सहर्षम्) हन्त हन्त व्यवसितं मे सफलं सम्वृत्तम्। यथाऽयं पल्लवहस्तैर्मामाह्वयति, तथा तर्कयामि विदितोऽस्य प्रियोदन्तो भविष्यति। यावत्सम्भावयाम्येनम्। (इति परिक्रामति)।

Digitized by Google

(अनन्तरे चर्चरी)।

किसलयरुचिरप्रचलनसंज्ञाभिः
मधुरविहङ्गमकुलविरुतगीतैः।
गन्धामोदितवायुविनिर्धूतदेहकः
नृत्यति मधूत्सवे इह कल्पतरुवरकः(१)॥

(चर्चरिकयोपरक्तम्। अञ्जलिं बद्ध्वा)।

भगवन्, अशोकतरो, कथय कथय,

कुसुमव्यतिरिक्तमायुधं
कुसुमेषोः प्रहरिष्यतेऽधुना।
दयिता मम वामलोचना
यदि दृष्टा भवताऽत्र कौमुदी॥

(द्विपदिकया निरूप्य) कथमयं व्याधूयोत्तमाङ्गं न दृष्टा, इत्याह!

(चर्चरी)।

तुममाआक्खहि मइ कप्पअरु,
सा पइ दिट्ठा सुकसणचिउरु।
वित्थारिअगरुयणजुअमहुरु
अच्छइ विअ परिपुरिसमणोहरु(२)॥

---

(१) किसलयरुचिरप्रचलनसंज्ञाभिः
मधुरविहङ्गमकुलविरुतगीतैः।
गन्धामोदितवायुविनिर्धूतदेहकः
नृत्यति मधूत्सवे इह कल्पतरुवरकः॥

(२) त्वमाचक्ष्व मां कल्पतरो, सा त्वया दृष्टा सुकृष्णचिकुरा।
विस्तारितगुरुजघनयुगमधुरा अप्सरस इव परिपुरुषमनोहरा॥

Digitized by Google

(उपविश्य चर्चरिकया विचिन्त्य, सरोषम्)।

अरे रे वृक्षक, किं गोपायसि[१] ?

(इति नर्त्तित्वा उत्थाय)।

यदि तावत्,

चरणप्रहारमिषा नूपुरझिङ्कितमनोहरं नाथः ।
स्कन्धात्प्रभृति कथय ते रुचिराणि लसन्ति पुष्पाणि ॥

फलअणुसारे मए आणिज्जइ[२]।

(चर्चरिकया पुनः चरणप्रहारम्—इति पठित्वा)।

कथयाशोक, कान्ता मे कुत्रास्ति ? कुसुमोद्गमः ।
तदङ्घ्रिताड़नाज्जातः, कथानिङ्गोतुमिच्छसि ॥

(पुनश्चर्चरी)।

सा मज्झ पिअअम तरुवरअ पए ।
कुङ्कुमवण्णा दिट्ठा भणए[३] ॥

(चर्चरिकयोपविश्य । कथयाशोकेति पुनः पठित्वा । पुनश्चर्चरी । पुनः सानुनयं, कथयाशोकेति पठित्वा, पुनः साधिक्षेपं, तदेव पठित्वा निरूप्य)।

कथम्,

भूतार्थमप्यपह्नपन् तरुरेष सुदुःसहैः ।
हुङ्कारैस्तर्ज्जयित्वा मां पुष्पास्त्रैरभिवर्षति ! ॥

---

(१) अरे रे वृक्षक, किं गोपायसे ?
(२) फलानुसारेण मया ज्ञायते ।
(३) सा मम प्रियतमा तरुवरक, त्वया ।
कुङ्कुमवर्णा दृष्टा भण ॥

Digitized by Google

सर्व्वथा मदीयस्य प्रतिकूलदैवस्यायं प्रकारः। यावदन्यमवकाशं गमिष्यामि। (इतस्त्याय परिक्रामति)।

(द्विपदिकयाऽवलोक्य)।

अये, अयमसौ मालतीपुष्पप्रणयी मधुकरस्तिष्ठति। प्रक्ष्यामि तावदेनम्।

(कुटिलिका)।

णिअपिअअमविरहाउलओ।

(मन्दघटी)।

महुअरकोइलणिणाअवाउलओ[१]।

(अनन्तरे चर्चरी)।

मउअर, मउरकइावरपुट्ठा
आअक्खहि मइ कइ पइ दिट्ठा।
विज्जुलिकन्तीपरिचोरिअआ
पिअअम वम्महविअअपडाआ[२]॥

(वसन्तिकयोपसृत्य अञ्जलिं बद्ध्वा)।

भगवन्, अपि नाम दृष्टा भवता प्रियतमा मे कौमुदी? शृणु तस्या उपलक्षणम्।

---

(१) निजप्रियतमाविरहाकुलकः।
मधुकरकोकिलनिनादव्याकुलकः॥

(२) मधुकर, मधुरकथांपरपुष्टा
आचक्ष्व मां कुत्र त्वया दृष्टा।
विद्युत्कान्तिपरिचोरितका
प्रियतमा मन्मथविजयपताका॥

Digitized by Google

मधुकर, मधुरखना वरोरूः
प्रम्रधरपङ्कजनिन्दितानना श्रीः।
कुटिलचिकुरजालभूषिताङ्गी
अघनभराखगामिनी प्रिया मे॥

(तिर्य्यगवलोक्य भृङ्गारमनुभूय च)।

किमाह भवान्, कथमेवं प्रणयिनमपि त्वामुपेक्ष्य गता,—इति। (सकरुणम्) भगवन्, अस्ति ममाप्यत्र वितर्कः। न खलु निश्चयमधिगच्छामि।

दयिता मयि बद्धमानसा
स्वयमेषा न गतेति तर्कये।
न च हेतुरिहेक्ष्यते परो
न च कोपो मयि कोऽपि सुभ्रुवः॥

(विलोक्य) कथमयमदृष्ट्वैव प्रतिवचनं मधुपाने प्रवृत्तः। सुष्ठु खल्विदमुच्यते,

स्वार्थपरो लोकोऽयं निजसुखमेव बहु मन्यते प्रायः।
परदुःखद्रुतमनसो नितरां विरला महात्मानः॥

भवतु। अन्यतोगच्छामि।

(परिक्रम्यावलोक्य)।

अयं स्निग्धोच्चयप्राग्भारः। यावदेनं प्रियाप्रवृत्त्यर्थमभ्यर्थये। न पुनरयमुच्चैःशिरा मामवधीरयिष्यति।

(अम्बिकां)।

Digitized by Google

दइआविरहाउलिअओ दुक्खालिङ्गुअहिअअओ ।
वाहोमिलाणवअणओ तम्मइ वणे जुआणओ(१) ॥

अत्युन्नतत्वात् नूनमस्य दृग्गोचरं गता मे प्रियतमा ।

(अस्मावन्तरे अर्द्धविघतुरङ्गकः) ।

गहअरदइआविरुआअविसेसो ।
एक्को काणणए परितम्मइ पेमवसो(२) ॥

(चतुरङ्गकेशोपविश्य अञ्जलिं बद्ध्वा) ।

याता दृग्गोचरं धीर, तव कान्ता वने मम ।
उदहन्ती सुखं यानं हिमक्लिष्टहिमांशुवत् ॥

(नेपथ्ये तथैव प्रतिशब्दः) ।

(श्रुत्वा सहर्षम्) **कथं दृग्गोचरं यातेत्याह !**

(अवन्तरे चर्चरी) ।

गिरिकाणणए कुसुमप्पअरे
पवणान्दोलिअकिसलअणिअरे ।
आअक्खहि मं तए मअ कन्ती
दिट्ठी महिअरु, कत्थि भमन्ती(३) ॥

---

(१) दयिताविरहाकुलितकः दुःखालीढकहृदयकः ।
बाष्पस्नानवदनकः ताम्यति वने युवकः ॥
(२) गुरुतरदयितानिरहोन्मादविशेषः ।
एकः कानने परिताम्यति प्रेमवशः ॥
(३) गिरिकाननके कुसुमप्रकरे
पवनान्दोलितकिसलयनिकरे ।
आचक्ष्व मां त्वया मम कान्ता
दृष्टा महीधर, कुत्र भ्रमन्ती ॥

Digitized by Google

(सविनयम्)।

अपि निबद्धरतिं विधिपर्य्यया-
दकृतिनं न चिरेण विहाय माम्।
कथय कुच मृगेक्षणलक्षणा
प्रियतमा वसतीह महीधर॥

(नेपथ्ये तथैव प्रतिशब्दः)।

(आकर्ण्य। विभाव्य। साशङ्कम्)।

कथं ममैव प्रतिशब्देन प्रतारितोऽस्मि, न पुनरभ्युपपन्नः प्रत्युत्तरयता महीधरेण!

(इति मूर्च्छितः पतति। उत्थाय)।

अहह, न कोऽप्यभिज्ञः प्रियादृत्तान्तस्य! भवतु। अन्यतः पश्यामि।

(परिक्रम्य दिग्वहिकया दिशोऽवलोक्य)।

अये, इयं परभृता चूतशाखामध्यास्ते। प्रच्छाम्येनाम्। सम्भावयामि, स्त्रीत्वादभिज्ञैषा प्रियादृत्तस्य भविष्यति।

(खञ्जिका)।

कमणसिरी रअभूसिअओ पिअविरहविआरवं।
रण्णे धावइ वाउलओ दुहिओ पेच्छह कोलु(१)॥

(चर्चरिकयोपगम्य)।

---

(१) कमनशीलः रजोभूषितकः प्रियाविरहविकारवान्।
अरण्ये धावति व्याकुलकः दुःखितः पश्यत कोलः॥

Digitized by Google

मञ्जुस्वना त्वमिव मे दयिता प्रणष्टा
राकासुधांशुवदना वत वेदिमध्या ।
अन्वेषयामि विवशो मृगलोचनीनां
कुत्र स्थिता परमृते, वद सा वरोरूः ॥

(अकर्ण्य) अये, दूयं कुङ्कः कुङ्करित्याह, । तर्कयामि, दयापरवशैषा कुङ्करजन्यामस्मिन् गिरिकान्तारे भ्रमन्तं मां निवारयति ।

(वामकेनावलोक्य) ।

करुणवति, किमाह भवती,—कुङ्करिति । (सविषादं विहस्य) ।

नन्वभिमतैवाधुना कुङ्करस्माकम् ।

(पादद्वयं पुरतउपरुध्य) ।

यदि दयसे, आदिश प्रियाप्रवृत्तिम् ।

कथमिति ?

दयितावियोगाकुलात्मनो-
न कुङ्कर्मे न हि निर्वृतिस्थली ।
उदितः प्रणयाङ्कनोऽधुना
स्वपथत्युङ्कमयन् प्रियामुखम् ॥

(आकर्ण्य, सविषादम्) ।

यथेयं कुह कुह इत्याह, तथा व्यक्तमियमप्यनभिज्ञा प्रियोदन्तस्य । तत् किमेषा करोतु तपस्विनी । (अवलोक्य) अये, दूयमतिरूपावती प्रियोदन्तं वक्तुम-

Digitized by Google

क्षमा कातरेण चक्षुषा मामवलोकयति । भवति, अलं विषादेन । सुखमास्तां भवती । साधयामस्तावत् ।

(परिक्रम्योर्द्धमवलोक्य) ।

अहह, ललाटन्तपः सप्तसप्तिर्मां सन्तापयति । सुष्ठु खल्विदमुच्यते,—दुःखं दुःखमेवानुबध्नाति,—इति । उपालभे तावदेनम् ।

(अञ्जलिं बद्ध्वा) ।

भगवन्, सहस्रकिरण,

विरहानलदग्धं मां अग्निगर्भैर्गभस्तिभिः ।
भूयः किं दहसि, ? न्याय्या कातरे करुणा सताम् ॥

अथवा । अलं त्वामुपालभ्य ।

विरहानलदग्धस्य सन्तापः कियान् मम ।
आशीविषप्रदष्टस्य दृश्चिकस्येव दंशनम् ॥

(विभाव्य) भवतु । यावदेनं प्रार्थयामि ।

(भानुभ्यां स्थित्वा अञ्जलिं बद्ध्वा) ।

भगवन्, त्रिभुवनैकरत्नप्रदीप,

त्वां साक्षिणं परतरं वसुदाहरन्ति
तत्त्वावबोधसुलभाः खलु लोकतत्त्वे ।
आचक्ष से सकललोकललामभूता
कान्तेऽधुना प्रियतमा तरसारकान्तौ ॥

Digitized by Google

कथं तूष्णीमेवास्ते! तिष्ठतु। किमनेनं दृष्टा तेजो-गर्व्वितेन ? (इत्युत्थाय परिक्रामति)।

(विलोक्य) दूयमानमुक्तलता सहकारप्रणयिनी वर्त्तते। एनां प्रक्ष्यामि।

(खगतम्)।

तुवरइ गअपइवरओ पिअअमपेअमुद्धओ।
दइआपेक्खणलालसओ अहिअं लंहिअकाणणओ[१]॥

(वामभ्रूलतामुन्नमय्य)।

भवति, लतिके, अपि नाम दृष्टा भवत्या तत्रभवती कौमुदी ?

(वामकेन किञ्चिदवलम्ब्य। भ्रमरशब्दं सूचयित्वा)।

किमाह भवती,—किमुपलक्षणं तस्याः, इति। भवति, श्रूयताम्।

सावकलनरुचिरतरा भ्रमरावलिनीलिमचिकुरकलापा।
अभिनवकिसलयहस्ता कुसुमस्तोरा लमिव हि दयिता मे॥

(द्विपदिकयाऽवलोक्य, सविषादम्)।

कथमियमपि न जानाति!

निश्चिन्तमकरन्दाश्रुधुनाना करपल्लवम्।
व्यक्तमाह न वेद्मीति क्रोशन्ती मधुपस्वनैः॥

---

(१) त्वरते गजपतिवरकः प्रियतमाप्रेमसुग्धकः।
दयिताप्रेक्षणलालसकः अधिकं लङ्घितकाननकः॥

Digitized by Google

यावदन्यतो गच्छामि ।

(परिक्रम्यावलोक्य) ।

अयमदूरे करिणीसहायः करी परिभ्रमति । यावदस्मिन् प्रणयबन्धं करोमि ।

(कुटिलिका) ।

दुक्खमहिअहिअआउल्लओ

(मन्दघटी) ।

पिअअमविरहअवच्छिअओ ।

(चर्चरी) ।

मिअपई पवणुव्वेल्लिअए
विहरइ विहलो काणणए[१] ॥

(द्विपयानन्तरे चर्चरी) ।

अहिणअमेहसरिच्छा, खंभेरम कहेहि मइ ।
विज्जुप्पीअलवण्णा पिअअम दिट्ठा ण पइ[२] ॥

(जानुभ्यां स्थित्वा) ।

---

(१) दुःखमथितहृदयाकुलकः
प्रियतमाविरहकातरः ।
मृगपतिः पवनोद्वेल्लितके
विहरति विकलः काननके ॥

(२) अभिनवमेघसदृक्ष, स्तम्भेरम, कथय माम् ।
विद्युत्पीतवर्णा प्रियतमा दृष्टा न त्वया ? ।

Digitized by Google

करेणुकार्थां करिनाथ, पश्चात्
रंस्यस्युषां वप्रगा तवैषा।
मां तावदाश्वासय निःसहायं
तिष्ठ क्षणं निष्ठुरतां स्म मा गाः॥

(विलोक्य सहर्षम्)।

अयमसौ मद्विज्ञापनाकरुणमनाः सत्यमेव गमनाभिलाषी नागराजपतिः। अन्यैव खल्वापन्नानुकम्पनरीतिर्महात्मनाम्। अभ्यर्थये तावदेनम्।

(जानुभ्यामुपविश्य कृताञ्जलिः)।

कथय यूथपते, कृपया मम
यदि वने भवताऽऽच विलोकिता।
ननु वप्रापरिमन्थरगामिनी
कनकरम्भरुचिर्दृगलोचनी॥

(चर्चरिकया विलोक्य)।

अये! यथाऽयं स्निग्धोत्फुल्लेन चक्षुषा मामवलोकयति, तथा व्यक्तं विदितोऽस्य प्रियतमाहरणान्तो भविष्यति!

(द्विपदिकया निरूप्य)।

कथम्!

मन्दाकष्टरसितैर्मदधारा-
व्याप्तगण्डसुषमारमणीयः।
प्रीकरेण करिणीं करिनाथो-
ऽलालयत्यतितरामनुरक्तः॥

Digitized by Google

(जम्भलिका) ।

पेक्खहि दीहम्बलाओ सद्दाऊरिअदिसाओ ।
अभिअनिसित्तकाणणओ अहिवरिसेइ जलहरओ[१] ॥

क्षणं प्रणयसुखमनुभवतु । रुचयः खल्वनुरोद्धव्या महताम् । नूनं परतः प्रियोदन्तं कथयिष्यति ।

(इति सप्रत्याशं तूष्णीं स्थितः) ।

(तिर्यगवलोक्य सविषादम्) ।

कथमद्यैव प्रतिवचनं प्रियया सममरण्याभ्यन्तरं गन्तुं प्रवृत्तः ! उपालभे तावदेनम् ।

(पदद्वयं पुरतउपसृत्य) ।

इंहो गजपते,

दयितविरहातिकातरं
समुपेक्ष्य च्युतभाग्यमद्य माम् ।
उचितं तव गन्तुमत्र नो
विरहं मा स्म गमस्तथापि भोः ॥

सुखमास्तां भवान् । (इति परिक्रामति) ।

(सहसोर्ध्वमवलोक्य, सहर्षम्) ।

हन्त हन्त ! प्रत्युज्जीवितोऽस्मि ।

नीलपटावृतदेहा प्रकटितसुखमाचलत्यमाणेयम् ।
दिवमुत्पतिता कान्ता पश्यति मां प्रेमतरलाक्षी ॥

---

(१) प्रेक्षस्व दीर्घजवलाकः शब्दापूरितदिङ्मुखः ।
अभ्यन्तरनिषिक्तकाननकः अभिवर्षति जलधरकः ॥

Digitized by Google

(खड्गधारा)।

प्रियमभविरहविकारितकः गृहदुःखोन्मादितमनस्कः।
वाष्पविमोक्षदुःखितकः धावति गहने व्याकुलकः(१)॥

अहह!

नीलं निचोलखण्डं रत्नैः खचितं समुद्रहन्त्येषा।
वपुषैव सुप्रसन्ना शरदीव कुमुदैः कलैः॥

कथमद्यापि न मामुपसर्पति! (सप्रणयकोपम्) उपालभे तावच्चिरकारिणीम्।

(चर्मरिकया ऊर्द्धमुखमुपविश्यात्मानं वञ्चयन्)।

मम तावत्,

क्लेशं सुन्दरि, नैव वेत्सि नितरां मर्मस्पृशं दुःसहं
विश्लेषात्मव यस्ततः प्रियतमे, मौनं समालम्बसे।
सम्प्राप्तोदयिते, त्वदेकरसतां सेोऽयं जनो निष्ठुरे,
आस्तां क्लेशविमोक्षणं कथमहो वाचाऽपि नाभ्यर्थते!॥

अथवा। न उपालभे। सुखभाभिमाना खलु स्त्रीजातिः। प्रसादयाम्येनाम्।

(खड्गिका)।

---

(१) प्रियतमाविरहविकारितकः गृहदुःखोन्मादितमनस्कः।
वाष्पविमोक्षदुःखितकः धावति गहने व्याकुलकः॥

Digitized by Google

कुसुमकिसलअभूसिअअरणओ पिअअमसोअसदुक्खो ।
अन्तरप्पअडपावअओ लज्जीअदि विअ दक्खो[१] ॥

(सखिकान्तरे चर्चरी) ।

आगच्छदि पिअअम, सुन्दरिए, तुह विरहे दुहिअस्स मज्झ एए ।
किं करुणए कोवं कुणहीअ मज्झि मिअलोअणि, तुमं पसिअ[२] ॥

(सकरुणम्) भवति,

मया दुःखात् किञ्चित्परुषमुदिते निष्ठुरधिया
प्रिये, लक्ष्मेत्कुप्येः पुनरपि हतः स्यां विधिहतः ।
किमन्यद्वा ब्रूमो विधुमुखि, तवैवास्मि नितरां
न पारुष्याद्वज्रं त्यजति किल माला जलमुचाम् ॥

(अवलोक्य) कथमद्यापि न प्रसीदति ? भवतु । भूयः प्रसादयामि ।

सुतनु, प्रसीद तावत् प्रभवन्त्योऽपि च न खलु कुटुम्बिन्यः ।
दयितेषु दीर्घरोषास्त्वदेकरसतां गतेषु स्युः ॥

(वामकेन वलित्वा आकाशे) ।

किमाह भवती,—किमेवं कातरोऽसि,—इति ।

(सखेदम्) भवति, मम भाग्यविपर्य्ययादेतदपि न जा-

---

(१) कुसुमकिसलयभूषितकरणकः प्रियतमाशोकसदुःखः ।
अन्तरप्रकटपावकको लज्जते इव दक्षः ॥

(२) आगच्छ प्रियतमे, सुन्दरिके, तव विरहे दुःखितस्य मम गत्वा ।
किं करुणे कोपमकरीः मयि मृगलोचनि, त्वं प्रसीद ॥

Digitized by Google

नासि ! किं ब्रवीमि ? भवत्याएव विरहो मां विधुरयति । शृणु प्रिये, शृणु ।

वाचस्ते श्रवणान्तरेऽमृतरसं सिञ्चन्त्यनल्पं मम
ब्रह्मानन्दरसादपि प्रियतमे, स्पर्शस्तवाह्लादकः ।
त्वं कर्पूरलतेवाकिंचेव नितरामाप्यायनी चक्षुषो-
र्विश्लेषस्तु तवापि यद्व्यथयति प्रायो न जानासि तत् ॥

(सायहम्) आगत्य जीवितं तावन्ममावलम्बस्व । पश्चात् सर्वं श्रोष्यसि सर्वं कथयिष्यामि ।

(पुनश्चर्चरी) ।

वाहजलाउलदुक्खिअवअणओ
झीणगई पेक्खहि वाउलओ ।
णिअकणेहविओअदुक्खिअहिअओ
तम्बइ गअपई भमिअविहिणओ(१) ॥

(आकाशे) ।

पुनः किमाह,—कथमस्मद्विरहमात्रेणैवं कातरोऽसि,—इति । (सखेदम्) सुन्दरि, यदेवं मामाह, व्यक्तमात्मानं न वेत्सि ।

कथमिति ?

समीपे स्थित्वा त्वं विधुमुखि, रसैरार्द्रहृदया

---

(१) वाष्पजलाकुलदुःखितवदनकः क्षीणगतिः प्रेक्षस्व व्याकुलकः ।
निजकरेणुवियोगदुःखितहृदयः ताम्यति गजपतिर्भ्रमितविधिनकः ॥

Digitized by Google

यदा प्रेम्णा स्निग्धामम्बतमिव वाचं कथयसि ।
तदा वर्णं वर्णं प्रति हृदयमेतत् प्रियतमे,
मुदं यामाप्नोति त्वमपि किल नैतत्सुविदिता ॥

कथय, कथमेतद्विस्मर्यतताम् ? अन्यच्च । भवति,

न मुग्धे, जानासि त्वमपि किल रत्नं निरुपमं
(आत्मानं निर्दिश्य) ।
अनोऽयं जानाति प्रचुरसुकृतैस्त्वत्परिचितः ।

उचितं खल्वेतत् ।

न रत्नं जानाति स्वमपि गुणजातं सुविपुलं
तदेतद्वेत्त्युच्चैः किमपि मणिकारो भिषगपि ॥
(आकाशे) ।

पुनः किमाह,—किमित्यात्मानं न नियमयसि,—इति । (सखेदम्) भवति, सर्वथा अस्मदीयानां भाग्यविपर्ययानामयं प्रभावः,—यत् त्वमपि नाम एवं ब्रवीषि ! तथापि श्रूयतां भूतार्थः ।

प्रिये, प्रेम्णि प्रायस्तव मधुरवारांनिधिरसे
निमग्नं मग्नं हृदयमिदमादौ तृणमिव ।
स्यादस्यैवैतद्भ्रमति न च शक्यं नियमनं
न चाकाङ्क्षे ध्यायाम्यपि न परिणामं विधुमुखि, ॥
(विलोक्य, सानन्दम्) ।

Digitized by Google

हन्त हन्त! चिरात्सम्पन्नो मे मनोरथः। एषा खलु मदनुनयप्रसन्ना प्रियतमा ममाभ्यर्णमभ्यागन्तुं प्रवृत्ता। प्रत्युद्गच्छाम्येनाम्।

(खड्गधारा)।

दइआपेक्खणलालसओ मिच्छापिअमअवम्मिओ।
दुक्खाहूविअमाणसओ अहिअं तप्पइ जुआणओ(१)॥

(ससम्भ्रममुत्थाय आकाशवद्ग्रहणाय बाहू प्रसार्य)।

एह्येहि तामरसकोमलसन्नताङ्गि,
बिम्बोष्ठि, चन्द्रमुखि, पीननितम्बबिम्बे।
आश्लिष्य मे वरतनो, विरहाग्निदग्धा-
न्यङ्गानि जीवय पुनः करणामृतेन॥

(पर्णकुटिकया कतिपयपदं पुरत उपसृत्य द्विपदिकया निरूप्य। साक्षम्)।

कथम्!

तरङ्गितरुचक्षारा एता न रत्नपरम्पराः
इदमपि नभो वैदूर्याभं न नीलनिचोलकम्।
अयमपि शशी पूर्णाभोगो मुखं न मृगीदृशः
स्फुरति नितरामङ्कः सोऽयं न नाम विलोचनम्॥
पृषदश्वोपनीतस्य मेघस्य गतिपर्य्ययात्।
आयन्निवेन्दुराभाति नायाति मम कौमुदी॥

(इति मूर्च्छितः पतति। पुनर्द्विपदिकयोत्थाय सविषादम्)।

---

(१) दयितापेक्षणलालसकः मिथ्याप्रियतमावञ्चितकः।
दुःखाघूर्णितमानसकः अधिकं तप्यति युवकः॥

Digitized by Google

ज्ञातं मया प्रियतमा दिवसुत्पतिता निरीक्षते प्रेम्णा ।
यावन्नीलविहायसि सकलशशधरः परिस्फुरति ॥

(इति सकरुणं विचिन्त्य) ।

अहह ! अतितरां परिश्रान्तोऽस्मि । यावदस्य छाया-तरोर्मूले क्षणं विश्राम्यामि ।

(परिक्रम्य तत्रोपविश्य, करतले कपोलं संस्थाप्य सखेदमात्मगतम्) ।

कण्ण, सि सफलिअजम्मो
लोअण, जाआ तुह वि सफलदा व्व ।
मअरं सुणीअ वअणं
पेक्खीअ विसुद्धमाणणं से(१) ॥

(निःश्वस्य) ।

एतावदेव सुकृतं कथमप्यासीन्ममापि मन्दस्य ।
आसादिता वरोरूः कञ्चित्कालं यतो मयाऽप्येषा ॥

(इति विभाव्य । सहसोत्थाय) ।

क्व पुनर्मे प्रियतमा तिष्ठति ? (विचिन्त्य) भवतु । तदेव लतागृहमुपगम्य प्रियामन्वेषयामि, यत्र प्रागपि तत्र-भवती मया प्राप्ता । (परिक्रम्य । विलोक्य) इदमदूरे लतागृहं दृश्यते । (इति त्वरितं परिक्रामति) ।

(अनन्तरं चर्चरी) ।

---

(१) कर्ण, असि सफलितजन्मा लोचन, जाता तवापि सफलतैव ।
मधुरमसौ वीक्षणं अद्याक्षीर्विसुखमाननं तस्याः ॥

Digitized by Google

कुङ्कुमवण्णा सिणिद्धकन्ती
विरहम्मिलाणा वेअ दीसन्ती।
एत्थ णु मज्ज परिचिट्ठदि कन्ती
गहणे विविणे क्खु परिभमन्ती[१] ॥

(चतुर्दिक्षु पश्यन्ती)।

भगवन्, लतागृह,

कथयतु दयितोदन्तं तद्विरहपरिमथितस्य मेऽद्य भवान्।
कुसुमसुकुमारगात्री सुतनुस्ते पूर्वदृष्टैव ॥

(द्विपदिकयाऽवलोक्य)।

कथं तूष्णीमास्ते! उपालभे तावदेनम्। भगवन्, निकुञ्ज,

त्वत्तः प्राक्प्रदिरेचणा प्रियतमा प्राप्ता मया कौमुदी
सा नष्टा पुनरप्यतस्त्वमधुनाऽप्यस्माभिरभ्यर्थ्यसे।
कोऽयन्ते मतिविभ्रमोऽद्य शरणं प्राप्ते जने दुःखिते
आस्तां तावदनुग्रहो मधुरया वाचाऽपि नालप्यते ॥

कथमयं प्रत्युत्तरमप्रयच्छन्नवधीरयत्येव माम्!

(अञ्जलिं बद्ध्वा)।

अवधीरणामपीमां निकुञ्ज, तव मर्षये कुरङ्गाक्षीम्।
तां मञ्जुलमुखकमलां पूर्वमिवार्पयसि चेद्भूयः ॥

---

(१) कुङ्कुमवर्णा स्निग्धकान्तिः विरहम्लानेव वदती।
अत्र नु मम परितिष्ठति कान्ता गहने विपिने खलु परिभ्रमन्ती ॥

Digitized by Google

(चर्चरी)।

दिट्ठो पञ्जि मिअलोअणि तणुई
जहणभरालस थणभरगरुई।
वअणविणिन्दिअससहरकन्ती
दीहापाङ्गि लदाघर, कन्ती[१]॥

(विभाव्य)।

कथमयमारब्धमौनव्रतः साध्वसमिवात्मानं दर्शयति! (सरोषम्) अरे रे निकुञ्ज, क्वेदानीं यास्यसि?

प्रागेकवारमसि मे दयिताऽपहारी
स्पष्टं प्रिया न खलु सा पुनरेव नष्टा।
तामर्पयाशु यदि काङ्क्षसि मङ्गलं स्वं
न क्षम्यते नृपतिभिः प्रथितो हि चौरः॥

(पुनश्चर्चरी)।

(चर्चरिकया विलोक्य) कथमयमानमितपूर्वकायो मां प्रणमति! (सरोषधिरःकम्पम्) नाहं नाहं दयितापहारिणं क्षमिष्ये। अथावश्यन्तवात्मनो रिरक्षिषा, अलं प्रणतिविडम्बनाभिः? श्रूयतामभिसन्धिः। (सविनयम्)।

निताम्बं यच्छ मे कान्तां कुञ्ज, कुञ्जरगामिनीम्।

---

(२) दृष्टा त्वया मृगलोचनी तन्वी जघनभरालसा स्तनभरगुर्वी।
वदनविनिन्दितशशधरकान्तिः दीर्घापाङ्गी लतागृह, कान्ता॥

पश्चात् त्वामर्चयिष्यामि तद्भक्तकुसुमैरहम् ॥

(पतङ्गविक्रोशमाकर्ण्य सविषादम्) ।

यद्याऽयं परिक्रोशति, व्यक्तमस्यापि न गोचरस्तव-भवत्या वृत्तान्तः । तत्कुतः पुनरत्रभवत्याः प्रवृत्ति-मागमयेयम् ।

(परिक्रम्यावलोक्य) ।

अये, अयमसौ कदम्बशाखानिषण्णः प्रियाऽनुगतः कपोतकस्तिष्ठति । सम्भावयाम्येनम्,

(सर्वतिकयोपक्रम्यात्मगतं वदन्) ।

भगवन्, विहगोत्तम,

जिराजम्बे मार्गे चरसि कणभक्षोऽसि नितरां
सदा तिष्ठस्युच्चैरुपरि मनुजानां कृतधियाम् ।
ध्रुवं सत्यक्षोऽसि प्रचुरवनितापेमरसिकः
परं साङ्गानन्दं कलयसि विलिप्तोऽसि न च तैः ॥

किं बहुना,

गच्छन्तो भूतलान्तोऽपि प्रच्छन्नन्यक्षमेधसः ।
त्वन्तु खलङ्गतिर्नासि सत्यक्षलाञ्छनस्यपि ॥

द्विजपते, भूयान् खलु मम त्वयि बहुमानः । कुतः ?

अवदातत्वमहिंसा द्विजत्वमित्यावयोः समा धर्म्माः ।

(सकरुणम्) ।

विरहाकुलितोऽस्मि सखे, दयिताभाग्यं पुनर्मा भूः ॥

Digitized by Google

यावत्प्रक्ष्यामि।

(अनन्तरं चकोरी)।

अतुलपओहर विउलजहणभरालस मज्झ सुकन्ती।
दिट्ठो पइ पारावअ, काणणए भमन्ती[१]॥

भो विहगकुलललाम, यदि तावत्,

दृष्टा भवेत् प्रियतमा तरलायताक्षी
क्वापि प्रियारसविशेषविशेषविज्ञ।
आचक्ष्व मे विरहजर्जरिताय बन्धो,
प्रोद्दामशोकविकलः शरणागतोऽहम्॥

अयं "वाग्वाकम्"—इत्याह। न खलु विदितमस्य, कं प्रति अस्मदीया प्रश्नवाक्,—इति। भवतु। विज्ञापयामि। भगवन्, विहगराज,

एषाऽनुयोगवाङ्मे प्रियया विश्लेषितस्य दैवेन।
त्वां प्रत्येव दयालुं दयया शंसामु साऽधुना कुत्र?॥

(क्षणं स्थित्वा) कथं न कथयति! उपालभे तावदेनम्। हंहो विहगपते, स्थाने परेषामप्यात्मानुमानेन प्रवृत्तिर्महात्मनाम्। कुतः पुनरयन्ते मन्दभाग्ये मयि प्रतीपो व्यवहारः?

---

(१) अतुलपयोधरा विपुलजघनालसा मम सुकान्ता।
दृष्टा त्वया पारावतक, कानने भ्रमन्ती॥

Digitized by Google

क्षणमपि भवान् कार्य्यस्यार्थे दयितां गताम्
अपि न सहते विच्छेदोत्थामुपैति गुरुव्यथाम्।
कथमतितरां सारङ्गाक्ष्या रहिते मयि
कथय करुणां कारुण्यार्हे न खल्ववलम्बते? ॥

(चर्चरिकयाऽवलोक्य)।

कथमयं विस्फारितग्रीवो मूर्द्धानमाधूर्णयन् सगर्व्वं पुनः पुनर्वाग्वाकमित्याह! नूनमयमस्मदुपालम्भमसहमानः पापमेवैषा वागिति मामधिक्षिपति। धिक्कष्टं, एतादृशो मम दुरितपरिणामः, यदयमपि नाम एतावन्तमप्युपालम्भं न सहते!

(द्विपदिकया निरूप्य)।

कथमयमधिक्षिप्यैव मां कलत्वानुवृत्तौ प्रवृत्तः! (सखेदम्) सर्व्वथा परिभवास्पदं भाग्यविपर्य्ययः।

(परिक्रम्यावलोक्य च)।

हन्त हन्त, कथमियमसौ प्रियतमा मे सरसि निमज्जति! अहह,

एतन्मुखं विकचतामरसप्रकाशं
लोलभ्रमद्भ्रमरविभ्रमलोचनान्तम्।
आलक्ष्यते सरसि मज्जदिव प्रियायाः
मङ्गाग्यविन्दुरिव दुर्गतनीरसिन्धौ ॥

यावत् सम्भावयाम्येनाम्।

Digitized by Google

(अन्तरिका) ।

विरहोन्मादविभ्रारभ्रो दयिताताभलाभसभ्रो ।
सरवरस्तङ्गानुगभ्रो तम्यद् भमिभ्रारखभ्रो[१] ॥

(परिक्रम्यावलोक्य) ।

कथमयं सरित्पतिस्तरङ्गहस्तैरिमां धर्षयति! उपालभे तावदेनम् । (अञ्जलिं बद्ध्वा) ।

न खलु शैवलिनीदयित, त्वया
प्रियतमा मम धर्षयितुं क्षमा ।
व्यसनितोऽपि न जातु महाशयः
परकलत्ररुचिः खलु सज्जनः ॥

(उपसृत्य द्विपदिकया निरूप्य । साक्षम्) ।

कथम् !

परमार्थकमलमेतत् न पुनः क्षीराननं प्रियतमायाः ।
इदमपि मधुकरमिथुनं विभ्रममूले न लोचने तस्याः ॥

(इति मूर्च्छितः पतति । उत्थायोपविश्य विभाव्य च) ।

अहह, प्रतारितोऽस्मि । कुतः पुनरस्यां रात्रौ कमल-विकाशः ? नूनं सुखमेतत् भविष्यति । भवतु । पुनरपि निरूपयामि ।

(चर्चरिकयोत्थाय निरूप्य, सविषादम्) ।

कथं सत्यमेव कमलम्! तत् किमिदं दिनं भवेत् ?

---

(१) विरहोन्मादविकारकः दयितालाभलाभसकः ।
सरोवरोत्सङ्गानुगतः ताम्यति भ्रमितारखकः ॥

Digitized by Google

(दिपदिकया दिशोऽवलोक्य)।

असंशयं राचिरियम्। (सवितर्कम्) कथं मत्प्रतारणा-व्यसनिना दैवहतकेन समयोऽपि लङ्घितः! (विभाव्य) अथवा। तपस्विजनाध्युषिता देवभूमयश्चैवमादयः प्रदेशाः, तत्सर्व्वमुपपद्यते।

(निःश्वस्य) अहह, परिश्रान्तोऽस्मि। न खल्वतः परं शक्नोमि प्रियामन्वेष्टुम्। यावदिहैव तरङ्गवातसुलभे सरस्तटे क्षणं विश्रामं करोमि। (इति सविषादमुपविश्य स्थितः)।

(आकर्ण्य, सहर्षमुत्तिष्ठन्)।

हन्त हन्त, पश्चिमेनारण्यं हंसाः कूजन्ति। नूनमिदानीमुपलब्धः प्रियोदन्तो भविष्यति। कुतः?

कूजितमनुहरतीदं हंसानां नूपुरस्य दयितायाः।
गिञ्चितमिवता श्रद्धे जानन्त्येते प्रियोदन्तम्॥

कथमन्यथा एतादृशस्य कूजितस्याधिगमो हंसानाम्? स्थाने खल्वाकर्णितेनानेन कूजितेन मानसं मे समाश्वसिति।

तथाहि,

आकर्ण्य दूरादपि कूजितानि
योगीव साक्षादशरीरवाचम्।
स्थाने मनोनिर्वृतिमभ्युपैति

Digitized by Google

चक्षुः परोक्षं तदिदं वदन्ति ॥

(विचिन्त्य) **न खलु प्रत्येमि। कुतः?**

ये तावद्दयिताप्रवृत्तिविधये भूयो मयाऽभ्यर्थिता-
स्तेषां मय्यवधीरणा कथमपि प्रायोऽधुना युज्यते।
आत्माऽप्येष विवेकमन्थरतया मद्भाग्यदोषेण वा
मामुच्चैर्ग्वपयत्यरातिरिव तां सम्भावयन्नन्यथा ॥

(इति सकरुणं निःश्वस्य)।

भवतु। पश्यामि।

(परिक्रम्य दूरादवलोक्य च सहर्षम्)।

कथम्!

सन्तर्पणमतिमात्रं कूजितमेतन्न राजहंसानाम्।
विभ्रमविशेषभूमिर्नूपुरशिञ्जितमिभेन्द्रगामिन्याः ॥

(सवितर्कम्) **अपि नाम ममैव कौमुदी भवेत्? अथवा। नास्ति ममाधन्यस्य एतादृशं सौभाग्यम्। नूनमस्य-रसामयं सञ्चारः। निरूपयामस्तावत्।**

(इति सत्वरं परिक्रामति)।

(खड्गधारा)।

पिअविरहाउलमाणसओ विविणे अहिअं वाउलओ।
दइआपेक्खणणिव्वुदओ हरिसङ्कच्छदु जुआणओ(१) ॥

(ततः प्रविशति कौमुदी-सुन्दरी-सालङ्कायन-परिव्राजिकाः)।

---

(१) प्रियाविरहाकुलमानसकः विपिने अधिकं व्याकुलकः।
दयिताप्रेक्षणनिर्वृतकः हर्षं गच्छति युवकः॥

Digitized by Google

सुधा। (विलोक्य) कथं कौमुदीव दृश्यते! (उन्मृज्य चक्षुषी। निरूप्य) कथं सत्यमेव कौमुदी! (इति मूर्च्छितः पतति)।

परि। वत्से, कौमुदि, अविलम्बं सम्भावयैनम्।

कौमु। (सत्वरमुपसृत्य) अम्म, कधं एरिसीं दसां गदो अज्ज-उत्तो[१]! (इति मूर्च्छिता पतति)।

(सर्व्वे सत्वरमुपसर्पन्ति)।

साल। वयस्य, समाश्वसिहि समाश्वसिहि।

सुन्द। सहि, समस्वस समस्वस[२]।

परि। वत्से, समाश्वसिहि समाश्वसिहि। वत्स, समाश्वसिहि समाश्वसिहि।

कौमु। (समाश्वस्य) अज्जउत्त, समस्वस समस्वस[३]।

सुधा। (समाश्वस्य, कौमुदीं विलोक्य सहर्षविस्मयम्) कथम्!

सैषा मम प्रियतमा कमनीयकान्तिः

(सुन्दरीमवलोक्य)।

सेयं सखी

(परिव्राजिकामवलोक्य)।

भगवतीयम्

(सालङ्कायनमवलोक्य)।

---

(१) अहो, कथमीदृशीं दशां गत आर्य्यपुत्रः!

(२) सखि, समाश्वसिहि समाश्वसिहि।

(३) आर्य्यपुत्र, समाश्वसिहि समाश्वसिहि।

Digitized by Google

अयं वयस्यः।

(साश्चर्यम्)

उत्पातवातविगमेऽधिकदर्शनीयो-
दिष्ट्याऽभवन्मम सएव हि जीवलोकः॥

परिव्राजिकासालङ्कायनौ। यथाऽऽह भवान्। कौमुदीसुन्दर्य्यौ। एवं णु एदं। विसेसदो मह मन्दभाइणीए[१]।

सुधा। (उत्थाय) भगवति, वन्दे। (इति प्रणमति)।

परि। समीहितसिद्धिर्भूयात्। वत्स, क्लिष्टोऽसि। क्षणमात्रं तावत् विश्राममनुभव।

सुधा। भगवतीप्रसादेनैवानुभूतो विश्रामः। (कौमुदीं प्रति) प्रिये,

त्वद्विप्रयोगतमसोन्मथितेन वार्त्तां
पृष्टा मया तरुलताविहगादयोऽपि।
सम्भाव्य ते सुखमितीन्दुसरोजमस्मि
प्राप्तो न खल्विह न सङ्गममाभिषङ्गम्॥

किं बहुना,

जन्मान्तरादिवोत्तीर्णस्त्वद्वियोगतमोऽर्णवात्।
दिष्ट्या त्वां प्राप्तवानस्मि च्युतां मृत्युमुखादिव॥

कौमु। हञ्जे हञ्जे, मह मन्दभाइणीए कए एरिसीं

(१) एवं नु इदं। विशेषतो मम मन्दभागिन्याः।

Digitized by Google

दसां पत्तो अज्जउत्तो। अवराद्धा म्हि अज्जउत्तस्स[१]।

सुधा। प्रिये, अपराधइति न खल्वधिगच्छामि। कथ्यतां तावदुदन्तः।

कौमु। सुणादु अज्जउत्तो। तह्मिं दिअहे सायंतणकम्मस्स गदे क्खु अज्जउत्ते ललिदुज्जाणसोहावलोअणकुदूहला मन्दभाइणी तत्थ गदा म्हि[२]।

सुधा। श्रुतमेतावदस्माभिः। ततस्ततः?

(सर्वे सोत्सुकमाकर्णयन्ति)।

कौमु। तदो काबि विअडवेससरीरा पिसाअी विअ सहसा मङ्केणिहअ सुण्णमग्गमुप्पदिदा। एत्तिअमत्तं अहं सुमरामि। तदो भअवदीए परित्ताद म्हि[३]।

परि। परतः श्रूयताम्। अहं किल निर्विकल्पकसमाधिं परिचेतुमिहागत्य विन्दुमतीप्रपाते नियमितप्राणा योगानुष्ठानमकरवम।

साल। ततस्ततः?

---

(१) हाधिक् हाधिक्, मम मन्दभागिन्याः कृते ईदृशीं दशां प्राप्त आर्यपुत्रः! अपराद्धाऽस्मि आर्यपुत्रस्य।

(२) शृणोतु आर्यपुत्रः। तस्मिन् दिवसे सायन्तनकर्म्मणो गते खल्वार्यपुत्रे ललितोद्यानशोभावलोकनकुतूहला मन्दभागिनी तत्र गताऽस्मि।

(३) ततः काऽपि विकटवेषशरीरा पिशाचीव सहसा मां गृहीत्वा शून्यमार्गमुत्पतिता। एतावन्मात्रमहं स्मरामि। ततो भगवत्या परित्राताऽस्मि।

Digitized by Google

सुधा। न खलु भवानप्यनभिज्ञोदृत्तान्तस्य?

साल। अथकिम्। तादृशे सख्युपप्लवे भवतोऽपि प्रवृत्तिमविदुषा व्याकुलेन भगवत्याश्रमं गतवता भगवतीशिष्यादेदव्रतादुपलब्धभगवतीवृत्तान्तेन उपायान्तरमपश्यता मयाऽपि (सन्दरीमङ्गुल्यो दर्शयन्) अनया सह अस्मिन्नेव क्षणे समासादिता तच्चभवतीद्वितीया भगवती।

सुधा। ततस्ततः?

साल। ततः प्रणिधानावगतभववृत्तान्ताया भगवत्याएवान्नया सममेव सर्व्वे वयं परिक्रान्ताः। ततश्चोपलब्धोभवान्। इत्येतावत्यस्माकं प्रवृत्तिः। अतो वयमप्यनभिज्ञाः वृत्तान्तस्य। (परिव्राजिकां प्रति)। अपनयतु भगवती कुतूहलमस्माकम्।

परि। श्रूयताम्। तथाविधध्यानावस्थिताया मम, अकस्मात्,

(कौमुदीं निर्दिशन्ती)।

अस्याः समाक्रन्दितमाकुलाख्याः
समाधियोगं निबिड़ं बिभेद।
सूचीव्यधोवक्षसि गाढ़लग्नो-
मोहं बलीयांसमिव क्षणेन॥

Digitized by Google

सुधा। कथमेवं गतस्यापि मम भागधेयपरावृत्तिः! अथवा। भगवतीप्रसादोऽच प्रभवति। ततस्ततः?

परि। ततोऽहं व्युत्थानमापन्ना दृशमितस्ततो व्यापारयन्ती दूरादेवमपश्यम्।

मिथ्यादृष्टिरिव श्रद्धामाकुलामकलङ्किनीम्।
बलात्कर्षति कल्याणीमिमां कङ्कालमालिनी॥

(कौमुदीसुन्दर्यौ भयं नाटयतः)।

सुधाकरसालङ्कायनौ। (कौमुदीसुन्दर्यौ प्रति) भीरू, अलमावेगेन? अतीतं खल्वेतत्कथ्यते। (परिव्राजिकां प्रति) ततस्ततः?

परि। ततोऽहमिमामशरणां परित्रातुकामा कारुण्यामर्षविवशा यावत् तमुद्देशं गन्तुं प्रवृत्ता, तावत्,

दूराद्दृष्ट्वा मामुपारूढशङ्का
जातामर्षा गाढमेतामुपेत्य।
यावद्धन्तुं सोढुतं सञ्चचाल
तावद्घोरे गह्वरेऽस्मिन् पपात॥

(इति गह्वरमङ्गुल्या दर्शयति)।

(सर्व्वे विस्मयं नाटयन्ति)।

सुधा। भगवति, खेचरीसिद्धिस्तया समासादितेति श्रूयते, तत् कुतइदम्?

परि। श्रयतान्तावत् परतः, ततोज्ञास्यते यतइदम्।

Digitized by Google

साल । आज्ञापयतु भगवती ।

परि । ततोयावद्हं विस्मितेन मनसा तस्याः प्रेपातं पर्य्यालोचयं, तावदशरीरिणी वागुदचरत् ।

सुधा । कीदृशी पुनः सा ?

परि । पतिव्रताधर्षणतीव्रपापै-
र्विलुप्तयोगाचरणप्रभावा ।
अधोगतिं याति तपस्विनीयं
दुष्टस्वभावा व्यसनानुरूपाम् ॥

ईदृशी सा ।

(सर्व्वे विस्मयं नाटयन्ति) ।

कौमु । (सविषादमात्मगतम्) हद्धी हद्धी, कधं मह एव मंद-भाइणीए कए दुग्गई तीसे[१] !

सुधा । (सहर्षं कौमुदीं प्रति) प्रिये,

त्वया खलु विशालाक्षि, विभ्रत्या धाम निष्कलम् ।
पावितं कुलमस्माकं वयमेव न केवलम् ॥

कौमु । (जनान्तिकम्) पिअंवदअ, किं मं लज्जेसि[२] ?

परि । अत्यल्पमिदमुच्यते, कुलमिति । पृथिवीति भण ।

साल । यथाऽऽज्ञापयति भगवती ।

---

(१) हाधिक् हाधिक्, कथं ममैव मन्दभागिन्याः कृते दुर्गतिस्तस्याः !
(२) प्रियं वदक, किं मां लज्जयसि ?

Digitized by Google

परि । महत् खल्वेतत् पुण्यमयत्नसुलभं स्त्रीणामामनन्ति, यत् पातिव्रत्यं नाम । वयमप्यस्याः समागमात् पवित्राः स्म । तथाहि,

परतत्त्वपरिस्फूर्त्तिर्न तथा योगचर्य्यया ।
(कौमुद्याश्चिबुकमुन्नमय्य) ।
अपांशुलायाः कौमुद्याः सन्निकर्षात् यथा मम ॥

कौमु । कधं भअवदी वि णाम मंदभाइणीं मं अवराहिणीं कुणइ[१] ?

परि । कल्याणि, मा मैवम् ।

देवतास्तां स्तुवन्त्युर्व्वैयमेव न संस्तुमः ।
यदृत्तं स्तूयते लोके न खल्वस्य समाश्रयः ॥

अशरीरिणी वागेवात्र प्रमाणम् ।

सुधा । कथं तादृशकठोरतपःपरायणाऽपि अभिभूयते स्म किल्बिषैरिति यत्सत्यं नास्ति नियतेरनभिभवनीयं नाम ।

परि । वत्स, नेदमाश्चर्य्यकारणम् । अपरिपक्वयोगाचारा हि सा स्वभावमलिनाशया न खलु निर्म्मलान्तरा संवृत्ता । यतः,

---

(१) कथं भगवत्यपि नाम मन्दभागिनीं मामपराधिनीं करोति ?

Digitized by Google

भूयोऽनलसंयोगात् मृत्वा रूपान्तरं चिराज्जयते ।
न खलु कथञ्चित् पक्वा मध्ये श्यामा बहिर्न रक्ताऽपि ॥

अपिच,

लौहधातुर्विशेषेण रञ्जितः काञ्चनद्रवैः ।
बहिः काञ्चनवर्णोऽपि न तद्भावं प्रपद्यते ॥

साल । वयस्य, यथाऽऽज्ञापयति भगवती । नैतत् विस्मयास्पदं; यत् तादृशस्य योगाचारस्याधिगमः, यच्च महतस्तपसोऽप्येकपदएव व्ययः । तथाहि,

किं दुर्ज्जना नातिचिराद्कार्ष्ण्ये
भवन्ति सत्यं पृथुवृद्धिभाजः ।
तेषां न खल्वेकपदे श्रमस्त-
व्ययोऽप्यकस्मान्न, किमत्र चित्रम् ॥

परि । वत्स, सम्यगाह सालङ्कायनः । तदिदानीम्,

सागरेणेव गङ्गेयं भवता परिगृह्यताम् ।
वृथैव दुर्ज्जनैः शैलैरिव व्याकुलिता भ्रुवम् ॥

(इति कौमुदीमर्पयति) ।

सुधा । (कौमुदीं प्रतिगृह्य) सबहुमानं प्रतिगृहीतो भगवतीप्रसादः ।

परि । वत्स, प्रतिहतास्ते प्रत्यूहाः । तदतः परं मत्प्रसादात्,

Digitized by Google

उपप्लवात्यये वत्स, भूयोविग्रदयाऽनया।
निरन्तरायं दीपस्व कौमुद्येव सुधाकरः॥

सुधा। जानामि तनयेष्विवानुग्रहमस्मासु भगवत्याः।

परि। इदमपरं विज्ञाप्यसे। इतः परं निर्व्यलीकेन मनसा दीर्घकालं समाधियोगमवलम्बिष्ये। तदुच्यतां, किन्ते भूयः प्रियं करोमि?

सुधा। अतः परमपि प्रियमस्ति? तथापीदमस्तु।

(भरतवाक्यम्)।

प्रणयिनां प्रणयामृतदीधिति-
र्विरहराहुसमाक्रमणोज्झितः।
अकलुषः शरदीव जलाशयो-
मनदवासमलं परिदीप्यताम्॥

अपिच,

कवीनां श्राव्योक्तावकलुषधियः सन्तु सुधियः
सतामप्यन्योन्यं भवतु न चिरात् सङ्गतमिह।
सदा भूयाद्भूयोव्यसनमपि शास्त्रेषु कृतिनां
समोदैः संसारक्रममखिलमीशः क्षपयतु॥

परि। एवमस्तु॥

(निष्क्रान्ताः सर्वे)।

इति कौमुदीसुधाकरे प्रकरणे पञ्चमोऽङ्कः॥
समाप्तश्चेदं प्रकरणम्॥

Digitized by Google